नयज्ञः।नमान्यमानोमुदमाददीतनसंप्राप्तंप्राप्नुयाच्छावमानात्।संतःसतःपूजयंतीहलोकेनासाधवःसाधुबु
द्धिंलभंते।इतिदद्यामितियजेदस्यधीयइतिव्रतं।इसेतानिभयान्याकुस्तानिवर्ज्यानिसार्वशः।येचाश्रयंवेद
यन्तेपुराणंमनीषिणोमानसमार्गरुद्धं।तन्निश्रेयस्तेनसंयोगमेत्यपरांशांतिंप्राप्नुयुःप्रेत्यचेह इत्या
दिपर्व्वणिउत्तरयायाते ८६ अष्टकउ चरन्गृहस्थःकथमेतिधर्म्मान्कथंवभिक्षुःकथमाचार्य्य
कर्म्मा।वानप्रस्थःसत्पथेसन्निविष्टोवहून्यस्मिन्संप्रतिदेशयंति ययातिरु आहूताध्यायीगुरुकर्म्म
स्वचोद्यःपूर्व्वोत्थायीचरमंचोपशायी।मृदुर्दांतोधृतिमानप्रमत्तःस्वाध्यायशीलःसिध्यतिब्रह्मचारी।धर्म्मा
गतंप्राप्यधनंयजेतदद्यात्सदैवातिथीन्भोजयेच्च।अनाददानश्चपरैरदत्तमेषागृहस्थोपनिषत्पुराणी।स्ववी
र्यजीवीवृजिनान्निवृत्तोदातापरेभ्योनपरोपतापी।ईदृङ्मुनिःसिद्धिमुपैतिमुख्यांवसन्नरण्येनियताहारचेष्टः।
अशिल्पजीवीगुणवांश्चनित्यंजितेंद्रियःसर्वतोविप्रयुक्तः।अनोकशायीलघुरल्पवासाश्चरन्देशानेकचरः
सभिक्षुः।रात्र्याययाचाभिजिताश्चलोकाभवंतिकामाभिजिताःसुखाश्च।तामेवरात्रिंप्रयतेतविद्वानरण्यसं
स्थोभवितुंसंयतात्मा।दशैवपूर्व्वान्दशचापरांश्चज्ञातीन्सहात्मानमथैकविंशतिं।अरण्यवासीसुकृतेदधा

श्री०प०
१४२

तिविमुच्यारण्येस्वशरीरधातून् अष्टकउ कतिस्विदेवमुनयःकतिमौनानिचाप्युत।भवंतीतितदाच
क्ष्वश्रोतुमिच्छामहेवयं ययातिरु अरण्येवसतोयस्यग्रामोभवतिपृष्ठतः।ग्रामेवावसतोरण्यंसमुनिः
स्याज्जनाधिपः अष्टकउ कथंस्विद्वसतोरण्येग्रामोभवतिपृष्ठतः।ग्रामेवावसतोरण्यंकथंभवतिपृ
ष्ठतः ययातिरु नग्राम्यानुपभुंजीतआरण्येनमुनिर्भवेत्।तथास्यवसतोरण्येग्रामोवसतिपृष्ठतः।
अनग्निरनिकेतश्चअगोत्रचरणोमुनिः।कौपीनाच्छादनंयावत्तावदिच्छेच्चीवरं।यावत्प्राणाभिसंधानंताव
दिच्छेच्चभोजनं।तथास्यवसतोग्रामेरण्यंभवतिपृष्ठतः।यस्तुकामान्परित्यज्यत्यक्तकर्माजितेंद्रियः।आतिष्ठे
त्समुनिर्मौनंलोकेसिद्धिमवाप्नुयात्।धौतदंतंकृत्तनखंसदास्नातमलंकृतं।असितंसितकर्माणंकथंनार्चि
तुमर्हति।तपसाकर्षितंक्षांतंक्षीणमांसास्थिशोणितं।सदाभवतिनिर्द्वंद्वोमुनिर्मौनंसमास्थितः।अथलो १४२
कमिमंजित्वालोकंविजयतेपरं।आस्येनतुसदाहारंगोवन्मृगयतेमुनिः।अथास्यलोकःपूर्वोयःसोमृतत्वा
यकल्पते इत्यादिपर्वण्युत्तरयायाते ८७ अष्टकउ केनासिदूतःप्रहितोद्यराजन्युवास्र
ग्वीदर्शनीयःसुवर्च्चाः।कुतआगतःकतरस्यांदिशित्वंउताहोस्वित्पार्थिवंस्थानमस्ति ययातिरु

इदं भौमं नरकं क्षीणपुण्यः प्रवेष्टुमुर्वीं गगनाद्विप्रहीनः। उक्त्वाहं वः प्रपतिष्याम्यनंतरं त्वरंति मां लोकपा
ब्रह्मणो ये। सतां सकाशे तु वृतः प्रपातस्ते संगता गुणवंतश्च सर्वे। शक्राच्च लब्धो हि वरो मयैष पतिष्यता भू
मितलं नरेंद्र॥ अष्टक उ ॥ पृच्छामि त्वां मा प्रपत प्रपातं यदि लोकाः पार्थिवाः संति मेत्र। यद्यंतरिक्षे यदि
वा दिवि स्थिताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ययातिरु यावत्पृथिव्यां विहितं गवाश्वं सहारण्यैः पशुभिः
पार्वतैश्च। तावल्लोका दिवि वै संस्थितास्ते यथा विजानीहि नरेंद्रसिंह अष्टक उ तांस्ते ददामि मा प्रप
त प्रपातं ये मे लोका दिवि राजेंद्र संति। यद्यंतरिक्षे यदि वा दिवि स्थितास्तानाक्रम क्षिप्रमपेतमोहः ययाति
रुवाच नास्मद्विधो ब्राह्मणो ब्रह्मविच्च प्रतिग्रहे वर्तते राजमुख्यः। यथा प्रदेयं सततं द्विजेभ्यस्तथा ददं पू
र्वमहं नरेंद्र। नाब्राह्मणः कृपणो जातु जीवेद्या वापि स्याद्ब्राह्मणी वीरपत्नी॥ सोहं नैवाकृतपूर्वं चरेयं विवित्स
मानः किमु तत्र साधु प्रतर्दन उ पृच्छामि त्वां स्पृहणीयरूप प्रतर्दनोहं यदि मे संति लोकाः। यद्यंतरि
क्षे यदि वा दिवि श्रुताः क्षेत्रज्ञं त्वां तस्य धर्मस्य मन्ये ययातिरु संति लोका बहवस्ते नरेंद्र अप्येकैकः
सप्त सप्ताप्यहानि। मधुश्च्युतो घृतयुक्ता विशोकास्ते नांतवंतः प्रतिपालयंति प्रतर्दन उ तांस्ते ददामि

आ०प० माप्रपतप्रपातंयेमेलोकास्तवतेवैभवंतु।यद्यंतरिक्षेयदिवादिविश्रितास्तानाक्रमक्षिप्रमपेतमोहः ॥
१४३ ययातिरु   नतुल्यतेजाःसुकृतंकामयीतयोगक्षेमंपार्थिवंपार्थिवःसन्।दैवादेशादापदंप्राप्यविद्वांश्चरे
न्नृशंसंहिनजातुराजा।धर्म्ममार्गयतमानोयशस्यंकुर्य्यान्नृपोधर्म्ममवेक्षमाणः।नमद्विधोधर्म्मबुद्धिःप्रजा
नन्कुर्यादेवंकृपणंमांयथात्थ।कुर्यांचपूर्वंनकृतंयदन्यैर्विवित्समानःकिमुतत्रसाधु।ब्रुवंतमेवंनृपतिंय
ययातिंनृपोत्तमोवसुमानब्रवीत्   वसुमानुवाच   पृच्छेहंत्वांवसुमानौषदश्विर्यद्यस्तिलोकोदिविमेन
रेंद्रायद्यंतरिक्षेदिवितोमहात्मन्क्षेत्रज्ञंत्वांतस्यधर्म्मस्यमन्ये   ययातिरु   यद्यंतरिक्षंपृथिवीयशश्चय
त्तेजसातपतेभानुमांश्च।तावंतस्तेदिविसंस्थितावैतेनांतवंतःप्रतिपालपालयंति   वसुमानुवाच   तांस्ते
ददामिमाप्रपतप्रपातंयेमेलोकास्तवतेवैभवंतु।क्रीणीष्वैतांस्तृणकेनापिराजन्प्रतिग्रहस्तेयदिधीमन्प्रदु १४३
ष्टः   ययातिरु   नमिथ्याहंविक्रयंसंस्मरामिमिथ्यागृहीतंशिशुकंशंकमानः।कुर्यांनचैवाकृतपूर्वमन्यै
र्विवित्समानःकिमुतत्रसाधु   वसुमानुरुवाच   तांस्त्वंलोकान्प्रतिपद्यस्वराजन्मयादत्तान्यदिनेष्टः
क्रयस्ते।अहंनतान्प्रतिगंतानरेंद्रसर्वेलोकास्तवतेवैभवंतु   शिबिरु   पृच्छामित्वांशिबिरौशीनरोहंममा

पिलोकायदिसंतीहतातायद्यंतरिक्षेयदिवादिविस्थिताः क्षेत्रज्ञंत्वांतस्यधर्म्मस्यमन्ये ययातिरु ॥
नत्वंवाचाहृदयेनापिसाधून्परीक्षमाणान्नावमंस्थानरेंद्र।तेनान्नवंतोदिविलोकाःश्रितास्तेविद्युद्रूपाःस्वनवं
तोमहात्नः शिबिरु नास्त्वंलोकान्प्रतिपद्यस्वराजन्मयादत्तान्यदिनेष्टःक्रयस्तोनवाहंतान्प्रतिगं
ताहदत्वायत्रगत्वानानुशोचंतिधीराः ययातिरु यथात्वमिंद्रप्रतिमप्रभावस्तेनाप्यनंतानरदेवलोकाः।
तथात्रलोकेनरमेसदत्तेतस्माछिवेनाभिनंदामिदेयं अष्टकउ नचेदेकैकशोराजन्लोकान्नःप्रतिनंद
सि।सर्व्वप्रदायभवतेगंतारोनरकंवयं ययातिरु यददर्हांहंतद्वदध्वंसंतःसत्याभिनंदिनः।अहंतुनाभि
जानामियत्कृतंनमयापुरा अष्टकउ कस्यैतेप्रतिदृश्यंतेरथाःपंचहिरण्मयाः।यानारुह्यनेरावाह्न
नभिवांछंतिशाश्वतान् ययातिरु युष्मानेतेवहिष्यंतिरथाःपंचहिरण्मयाः।उच्चैःसंतःप्रकाशंतेज्वलि
ताग्निशिखाइव अष्टकउ आतिष्ठस्वरथंतातविक्रमस्वविहायसे।वयमप्यनुयास्यामोयदाकालोभ
विष्यति ययातिरु सर्व्वैरिदानींगंतव्यंसहस्वर्गजितोवयं।एषवोविरजाःपंथादृश्यतेदेवसद्मनः ॥
वैशम् अधिरुह्यरथान्सर्व्वेप्रयातान्नृपसत्तमाः।आक्रामंतोदिवंभाभिर्धर्म्मेणावृत्यरोदसी अष्टक

आ०प०
१४४

अहंमन्येपूर्वमेकोस्मिगंतासखाचेंद्रःसर्वथामेमहात्मा।कस्मादेवंशिबिरौशीनरोयमेकोभिगंतासर्ववेगेनवा
हान्॥ ययातिरु॥ अददद्देवयानाययावद्वित्तमनिंदितः।उशीनरस्यपुत्रोयंतस्माच्छ्रेष्ठोहिवःशिबिः॥दानंदमः
सत्यमथोहिधर्मोह्रीःश्रीःक्षमाशौचमथोविधित्सा।राजन्नेतान्यप्रमेयस्यराज्ञःशिबौस्थितान्यप्रतिमस्यबुध्या
।एवंवृत्तोह्रीनिषेवश्चयस्मात्तस्माच्छिबिरत्यगाद्वैरथेन॥ वैशं॥ अथाष्टकःपुनरेवान्वपृच्छन्मातामहंकौतु
कादिंद्रकल्पं।पृच्छामित्वांनृपतेब्रूहिसत्यंकुतश्चकश्चासिसुतश्चकस्य।कृतंत्वयायद्धिनतस्यकर्त्तालोकेत्वद
न्योब्राह्मणःक्षत्रियोवा॥ ययातिरु॥ ययातिरस्मिनहुषस्यपुत्रःपुरोःपितासार्वभौमस्त्विहासं।सगुह्य
मर्थंमामकेभ्योब्रवीमिमातामहोहंभवतांप्रकामं।सर्वामिमांपृथिवींनिर्जिगायवशेकृत्वाह्यददंब्राह्मणेभ्यः।
मेध्यानश्वानेकशतंसुरूपांस्तदादेवाःपुण्यभाजोभवंति।अदामहंपृथिवींब्राह्मणेभ्यःपूर्णामिमामखिलांसद्भिरश्वैः। १४४
गोभिःसुवर्णेनधनैश्चमुख्यैस्तदाददंगोशतमर्बुदानि।सत्येनमेद्यौश्चवसुंधराचतथैवाग्निर्ज्वलतेमानुषेषुतमेव
थाव्याहृतमेववाक्यंसत्यंहिसंतःप्रतिजल्पयंति।यदष्टकंप्रब्रवीमीहसत्यंप्रतर्दनौशीनरशिबेतथैव।सर्वेचलो
कामुनयश्चदिव्याःसत्येनपूज्याइतिमेमनोगतं।योनःस्वर्गजितःसर्वान्यथावृत्तान्निवेदयेत।अनसूयुर्द्विजा।

ग्रेभ्योलभतेनःसलोकतां वैशं एवंराजन्समहात्मात्वतीवस्वैर्हितैस्तारितोमित्रसाहः।त्यक्त्वामहीय
रमोदारकर्म्मास्वर्ग्गगतःकर्म्मभिर्व्याप्यलोकान् इत्यादिपर्वणिपुत्ररव्यायातंसमाप्तं ८८ जनमेजय
उवाच भगवन्श्रोतुमिच्छामिपूरोर्वंशकरान्नृपान्।यद्वीर्य्यायादृशाश्चैवयावन्तोयत्पराक्रमाः।नह्यस्मिन्
शीलहीनोवानिर्वीर्य्योवानराधिपः।प्रजाविरहितोवापिश्रुतपूर्व्वःकथंचन।तेषांप्रथितकीर्त्तीनांराज्ञांविज्ञानशा
लिनां।चरितंश्रोतुमिच्छामिविस्तरेणतपोधन वैशं हंततेकथयिष्यामियन्मांत्वंपरिपृच्छसि।पूरोर्वंश
करान्वीरान्शक्रप्रतिमतेजसः।प्रवीरश्वरौद्राश्वास्त्रयःपुत्रामहारथाः।पूरोःपौष्ट्यामजायन्तप्रवीरस्तत्रवं
शकृत्।मनस्युरभवत्तस्माच्छूरसेनीसुतःप्रभुः।पृथिव्याश्चतुरन्तायागोप्ताराजीवलोचनः।सिंहसंहननो
वाग्मीसौवीरोवंशकृत्ततः।मनस्योरभवन्पुत्राःशूराःसर्व्वेमहारथाः।अनुयानुप्रभृतयोमिश्रकेश्यांयशस्
स्विनः।रौद्राश्वस्यमहेष्वासादशाप्सरसिसूनवः।जैज्वानोयज्विरेशूराःप्रजावंतोबहुश्रुताः।सर्व्वेशास्त्रवि
द्वांसःसर्व्वेधर्म्मपरायणाः।ऋचेयुरथकक्षेयुःकृपणेयुश्चवीर्यवान्।स्थंडिलेयुर्वनेयुश्चजलेयुश्चमहायशाः।
तेजेयुर्ब्बलवान्धीमान्सत्येयुश्चेंद्रविक्रमः।धर्म्मेयुःसन्नतेयुश्चदशमोधर्म्मविक्रमः।अनाधृष्टिरभूत्तेषांविद्वा

न्नर्थ्येयुनेकराट्।ऋचेयुरथविक्रान्तोदेवानामिववासवः।अनाधृष्टिसुतस्त्वासीद्राजसूयाश्वमेधभाक्।म
तिनारइतिख्यातोराजापरमधार्मिकः।मतिनारसुताराजन्चत्वारोमितविक्रमाः।तंसुर्महानतिरथोद्रुमश्चा
प्रतिमद्युतिः।तेषांतंसुर्महावीर्यःपौरवंवंशमुद्वहन्।आजहारयशोदीप्तंजिगायचवसुंधरां।ईलिनंतुसुतं
तंसुर्जनयामासवीर्यवान्।सोपिकृत्स्नामिमांभूमिंविजिग्येजयतांवरः।रथंतर्यांसुतान्पंचपंचभूतोपमांस्ततः
।ईलिनोजनयामासदुष्मंतःप्रभृतीन्नृपान्।दुष्मंतंशूरभीमौतुप्रवसुंवसुमेवच।तेषांज्येष्ठोभवद्राजादुष्म
न्तोजनमेजय।दुष्मन्ताद्भरतोजज्ञेविद्वान्शाकुंतलोनृपः।तस्माद्भरतवंशस्यविप्रतस्थेमहद्यशः।भरतस्तिसृ
षुस्त्रीषुनवपुत्रानजीजनत्।नाभ्यनंदततान्राजानानुरूपाममेसुता।ततस्तन्मातरःक्रुद्धापुत्रान्निन्युर्यमक्षयं।
ततस्तस्यनरेंद्रस्यवितथंपुत्रजन्मतत्।ततोमहद्भिःक्रतुभिरीजानोभरतस्तदा।लेभेपुत्रंभरद्वाजाद्भुमन्युना
मभारत।ततःपुत्रिणमात्मानंज्ञात्वापौरवनंदनः।भुमन्युंभरतश्रेष्ठयौवराज्येभ्यषेचयत्।ततोदिविरथोना
मभुमन्योरभवत्सुतः।सुहोत्रश्चसुहोताचसुहविःसुजयस्तथा।पुष्करिण्यामृचीकस्यभुमन्योरभवन्सुताः।
तेषांज्येष्टःसुहोत्रस्तुराज्यंप्रापमहीक्षितां।राजसूयाश्वमेधाद्यैरयजद्बहुभिःसह।सुहोत्रःपृथिवींकृत्स्नां

बुभुजेसागरांबरां।पूर्णांहस्तिगवाश्वैश्चबहुरत्नसमाकुलां।ममज्जेवमहीतस्यभूरिभारावपीडिता।हस्त्य
श्वरथसंपूर्णांमनुष्यकलिलाभृशं।सुहोत्रेराजनितदाधर्मतःशासतिप्रजाः।चैत्ययूपांकितांचासीद्भूमिर्श
तसहस्रश।प्रवृद्धजनसस्याचसहसेवव्यरोचत।ऐक्ष्वाकीजनयामाससुहोत्रात्पृथिवीपतेः।अजमीढंसुमी
ढंचपुरुमीढंचभारत।अजमीढोवरस्तेषांतस्मिन्वंशःप्रतिष्ठितः।षट्पुत्रान्सोप्यजनयत्तिसृषुस्त्रीषुभारत।
ऋक्षंधूमिन्यथोनीलीदुष्यंतपरमेष्ठिनौ।केशिन्यजनयज्जन्हुंसुतौचजलरूपिणौ।तथेमेसर्वपांचाला
दुष्यंतपरमेष्ठिनोः।अन्वयात्कुशिकोराजन्जन्होरमिततेजसः।जलरूपिणयोर्ज्येष्ठमृक्षमाहुर्नराधिपंऋ
क्षात्संवरणोजज्ञेराजन्वंशकरःसुतः।तस्मिन्संवरणेराजन्प्रशासतिवसुंधरां।संक्षयःसुमहानासीत्प्रजा
नामितिनःश्रुतं।व्यशीर्यततत्तोराष्ट्रंक्षयैर्नानाविधैस्तथा।क्षुन्मृत्युभ्यामनावृष्ट्याव्याधिभिश्चसमाहतं।अभ्य
घ्नन्भरतांश्चैवसपत्नानांबलानिच।चालयन्वसुधांचेमांबलेनचतुरंगिणा।अभ्ययात्तंचपांचाल्योविजित्य
तरसामहीं।अक्षौहिणीभिर्दशभिःसएनंसमरेजयत्।ततःसदारःसामात्यःसपुत्रःससुहृज्जनः।राजासंव
रणस्तस्मात्पलायतमहाभयात्।सिंधोर्नदस्यमहतोनिकुंजेन्यवसत्तदा।नदीविषयपर्यंतेपर्वतस्यसमीप

आ०प० तः।तत्रावसन्र्वबहून्कालान्भरतादुर्गमाश्रिताः।तेषांनिवसतांतत्रसहस्रपरिवत्सरान्।अथाभ्यगच्छद्भरता
१४६ न्वसिष्ठोभगवानृषिः।तमागतंप्रयत्नेनप्रत्युद्गम्याभिवाद्यच।अर्घ्यमभ्याहरंस्तस्मैवसिष्ठायमहात्मने।निवे
द्यसर्वमृषयेसत्कारेणसुवर्चसे।तंब्रह्मपुत्रंसंगम्यराजावव्रेस्ययंतदा।पुरोहितोभवाननस्तुराज्यायप्रयतेम
हि।ओमित्येववसिष्ठोपिभरतान्प्रत्यभाषत।अथाभिषिच्यतत्साम्राज्येसर्वक्षत्रस्यपौरवं।विषाणभूतंसर्वस्यां
पृथिव्यामितिनःश्रुतं।भरताध्युषितंपूर्वंसोध्यतिष्ठत्पुरोत्तमं।पुनर्बलिभृतश्चैवचक्रेसर्वान्महीक्षितः।
ततःसपृथिवींप्राप्यपुनरीजेमहाबलः।आजमीढोमहायज्ञैर्बहुभिर्भूरिदक्षिणैः।ततःसंवरणात्सौरीसु
षावेतपतीकुरुं।राजत्वेतंप्रजाःसर्वाधर्मज्ञमभिवव्रिरे।तस्यनाम्नाभिविख्यातंपृथिव्यांकुरुजंगलं।कुरु
क्षेत्रंसुतपसापुण्यंचक्रेमहाबलः।अवीक्षितमभिस्वंतंतथाचैत्ररथंमुनिं।जनमेजयंचविख्यातंपुत्रांश्चा १४६
स्यानुशुश्रुमः।पंचैतान्वाहिनीपुत्रान्व्यजायतमनस्विनी।अविक्षितात्परिक्षित्तुशबलाश्वश्चवीर्यवान्।अ
भिराजोविराजश्चशाल्मलश्चमहाबलः।उच्चैःश्रवाभङ्गकारोजितारिश्चाष्टमःस्मृतः।एतेषामन्ववायेतुख्या
तास्तेकर्मजैर्गुणैः।जनमेजयादयःसप्ततथैवान्येमहाबलाः।परिक्षितोभवन्पुत्राःसर्वेधर्मपरायणाः

श्रहसेनोग्रसेनश्चचित्रसेनश्चवीर्यवान्।चंद्रसेनःसुखेनश्चभीमसेनश्चनामतः।जनमेजयस्यतनया
भुविख्यातामहाबलाः।धृतराष्ट्रःप्रथमजःपांडुर्बाह्लीकएवच।निषधश्चमहातेजास्तथाजंबूनदोबली।
कुंडोदरःपदातिश्चवशातिश्चाष्टमस्मृतः।सर्व्वेधर्म्मार्थकुशलाःसर्व्वेभूतहितेरताः।धृतराष्ट्रोथराजासी
त्तस्यपुत्रोथकुंडिकः।हस्तीवितर्कःक्राथश्चकुंडलश्चापिपंचमः।हविश्रवास्तथेंद्राभोसुमन्युश्चापराजितः
।धार्त्तराष्ट्रसुतानांतुत्रीनेतान्प्रथितान्भुवि।प्रतीपंनेत्रधर्म्मंचसुनेत्रंचैवभारत।प्रथितःप्रतीपस्तेषांबभ
भूवाप्रतिमोभुवि।प्रतीपस्यत्रयःपुत्राजज्ञिरेभरतर्षभ।देवापिःशंतनुश्चैववाह्लिकश्चमहारथः।देवापि
स्तुप्रवव्राजतेषांधर्म्मपरीप्सया।शंतनुश्चमहींलेभेवाह्लिकश्चमहारथः।भरतस्यान्वयेजाताःसत्ववं
तोमहाबलाः।देवर्षिकल्पान्नृपतेबहवोराजसत्तमाः।एवंविधाश्चाप्यपरेदेवकल्पामहारथाः।जाताम
नोरन्ववायेऐलवंशविवर्द्धनाः इत्यादिपर्व्वणिपुरुवंशानुकीर्त्तनंनाम ८९ जनमेजयउ
त्वत्तःश्रुतोमयाविप्रपूर्वेषांसंभवोमहान्।उदाराश्चापिवंशेस्मिन्राजानोमेपरिश्रुताः।किंतुलघ्वर्थसं
युक्तंप्रियाख्यानंनमामति।प्रीणात्यतोभवान्भूयोविस्तरेणब्रवीतुमे।एतामेवकथांदिव्यामाप्रजापतितो

आ॰ प॰ १८७ मुने।तेषामाजननंपुण्यंकस्यनप्रीतिमावहेत्।सधर्म्मगुणमाहात्म्यैरभिवर्द्धितमुत्तमं।विष्टभ्यलोकान्त्र
स्त्रीनेतान्यशप्रस्फीतमिवस्थितं।गुणप्रभाववीर्य्योजःसत्वोत्साहवतामहं।नतृप्यामिकथांशृण्वन्नमृता
स्वादसम्मिताम्॥ वै॰शं॰ शृणुराजन्मयासम्यक्पुराद्वैपायनाच्छ्रुतं।प्रोच्यमानमिदंकृत्स्नंस्वद्वंश
जननंमहत्।दक्षस्यादितिरदितेर्व्विवस्वान्विवस्वतोमनुः।मनोरिलाइलायाःपुरूरवाःपुरूरवसआयुःआ
युषोनहुषःनहुषस्ययातिः।ययातेर्द्वेभार्येबभूवतुः।उशनसोदुहितादेवयानीवृषपर्व्वणश्चदु
हिताशर्म्मिष्ठानाम।अत्रानुवंशश्लोकोभवति।यदुंचतुर्व्वसुंचैवदेवयानीव्यजायत।द्रुह्युंचानुंचपूरुं
चशर्म्मिष्ठावार्षपर्व्वणी।तत्रयदोर्यादवाःपूरोःपौरवाः।पूरोस्तुभार्य्याकौशल्यानाम।तस्यामस्यजज्ञेज
नमेजयोनाम।यस्त्रीनश्वमेधानाजहार।विश्वजिताचेष्ट्वावनंविवेश।जनमेजयःखल्वनन्तामुपयेमेमाधवीं १८७
तस्यामस्यजज्ञेप्राचिन्वान्।यःप्राचींदिशंजिगाययावत्सूर्य्योदयादिति।ततस्तस्यप्राचिन्वत्वं।प्राचिन्वानख
ल्वश्मकीमुपयेमेतस्यामस्यजज्ञेसंपातिः।संपातिःखलुदृषद्वतोदुहितरंवरांगींनामोपयेमेतस्याम
स्यजज्ञेहंपातिःसखलुकृतवीर्यस्यदुहितरमुपयेमेभानुमतींनाम।तस्यामस्यजज्ञेसार्व्वभौमःसख

लुजित्वाहरत्कैकेयींसुनंदांनामा।तस्यामस्यजज्ञेजयत्सेनः।सखलुवैदर्भीमुपयेमे।सुसुश्रुवांनामा।तस्या
मस्यजज्ञेऽर्वाचीनः।अर्वाचीनोवैदर्भीमेवापरामुपयेमेमर्यादांनामा।तस्यामस्यजज्ञेऽरिहः।अरिहः
खल्वांगेयीमुपयेमेतस्यामस्यजज्ञेमहाभौमः।महाभौमःखलुप्रासेनजितीमुपयेमेसुयज्ञांनामत।
स्यामस्यजज्ञेऽयुतनायी।यःपुरुषमेधानामयुतमाहरत्।तेनास्यायुतनायित्वं।अयुतनायीखलुपृथु
श्रवसोदुहितरमुपयेमेभासांनामा।तस्यामस्यजज्ञेऽक्रोधनः।अक्रोधनःखलुकालिंगींकरकंडूंनामो
पयेमे।तस्यामस्यजज्ञेदेवातिथिः।देवातिथिर्वैदेहीमुपयेमेमर्यादांनामा।तस्यामस्यजज्ञेऋचेःऋ
चःखल्वांगीमुपयेमेदेवांनामा।तस्यांपुत्रमजीजनत्ऋक्षं।ऋक्षःखलुतक्षकदुहितरमुपयेमेज्वालां।
नामा।तस्यांपुत्रंमतिनारंनामोत्पादयामास।मतिनारश्चखलुसरस्वत्यांगुणसमुदितंद्वादशवार्षिकं
सत्रमाजहार।निवृत्तेसत्रेसरस्वत्यभिगम्यतंभर्त्तारंवरयामास।तस्यांपुत्रमजनयत्।तंसुंनामा।अत्रानु
वंशश्लोकोभवति।तंसुंसरस्वतीपुत्रंमतिनारादजीजनत्।इलिनंजनयामासकालिंग्यांतंसुरात्मजं।
इलिनस्तुरथंतर्यांदुष्यंताद्यान्पंचपुत्रानजनयत्।दुष्यंतःखलुविश्वामित्रदुहितरंशकुंतलांनामो

आ०प०
१४८

पयेमे।तस्यामस्यजज्ञेभरतः तत्रश्लोकौभवतः।मातानाभस्त्रापितुःपुत्रोयेनजातःसएवसः।भरस्वपुत्रं
दुष्यंतमावमंस्थाःशकुंतलां।रेतोधाःपुत्रउन्नयतिनरदेवयमक्षयात्।त्वंचास्यधातागर्भस्यसत्यमा
हशकुंतला।ततोस्यभरतत्वं।भरतःखलुकैकेयीमुपयेमेसार्वसेनींसुनंदांनाम।तस्यामस्यजज्ञेभुम
न्युः।भुमन्युःखलुदाशार्हीमुपयेमे।तस्यामस्यजज्ञेसुहोत्रः।सुहोत्रःखलुइक्ष्वाकुकन्यामुपयेमेसुवर्णां
नाम।तस्यामस्यजज्ञेहस्तीयइदंहस्तिनापुरंस्थापयामास।एतदस्यहास्तिनपुरत्वं।हस्तीखलुत्रैगर्त्तीं
मुपयेमेयशोधरांनाम।तस्यामस्यजज्ञेविकुंठनः।विकुंठनःखलुदासेयीमुपयेमेसुपर्णांनाम।तस्या
मस्यजज्ञेअजमीढः।अजमीढस्यद्वात्रिंशत्पुत्रशतंबभूव।कैकेय्यांनागायांगांधार्यांविमलायांऋक्षा
यांचेति।पृथक्पृथक्वंशकरानृपतयः।तत्रवंशकरःसंवरणः।संवरणश्चवैवस्वतींतपतींनामोपये १४८
मे।तस्यामस्यजज्ञेकुरुः।कुरुःखलुमागधीमुपयेमेअमृतांनाम।तस्यामस्यजज्ञेपरिक्षित्।परिक्षित्ख
लुबाहुदामुपयेमेसुयशांनाम।तस्यामस्यजज्ञेभीमसेनः।भीमसेनःखलुकैकेयीमुपयेमे।सुकु
मारींनाम।तस्यामस्यजज्ञेपर्यश्रवाःयमाहुःप्रतीपन्नाम।प्रतीपःखलुशैब्यामुपयेमे।सुनंदांना

मातस्यां पुत्रानुत्पादयामास। देवापिं शंतनुं वाह्लीकमिति। देवापिः खलु बाल एव वनं विवेश। शं
तनुस्तु महीपालो भवत्। तत्रानुवंशो भवत्। यं यं करेण स्पृशति जीर्णं स सुखमश्नुते। पुनर्युवा च भ
वति तस्मात्तं शंतनुं विदुः। शंतनुः खलु गंगां भागीरथीमुपयेमे। तस्यामस्य जज्ञे देवव्रतो यमाहुर्भी
ष्ममिति। भीष्मः खलु पितुः प्रियचिकीर्षया सत्यवतीमुदावहन्मातरं यामाहुर्गंधवतीति। तस्यां का
नीनो गर्भः पराशरात् द्वैपायनो भवत्। तस्यामेव सत्यवत्यां शंतनुर्द्वौ पुत्रौ जनयामास। चित्रांगदं वि
चित्रवीर्यं च। तयोरप्राप्तयौवन एव चित्रांगदो गंधर्वेण हतः। विचित्रवीर्यस्तु राजा भवत्। विचित्रवी
र्यस्तु कौशल्यात्मजे विकांवालिके काशिराजदुहितरावुपयेमे। विचित्रवीर्यस्त्वनपत्य एव विदेहत्वं
प्राप्तः सत्यवती चिंतयामास। माहं दौष्यंते वंश उच्छिद्येतेति द्वैपायनमृषिं मनसा चिंतयामास। स तस्याः
पुरः स्थित्वोवाच किं करवाणीति। सा तमुवाच। भ्राता तवानपत्य एव स्वर्यातो विचित्रवीर्यः। साध्वप
त्यं तस्योत्पादयेति। स परमित्युक्त्वा त्रीन्पुत्रानुत्पादयामास। धृतराष्ट्रं पांडुं विदुरं चेति। तत्र धृतरा
ष्ट्रस्य राज्ञः पुत्रशतं वभूव। गांधार्यां वरदानात् द्वैपायनस्य। तेषां धृतराष्ट्रपुत्राणां चत्वारः प्रवराव

आ०प०
१४९

भूवुः।दुर्योधनोदुःशासनोविकर्णश्चित्रसेनश्चेति।पांडोस्तुभार्येद्वेबभूवतुः।कुंतीपृथामाद्रीचेति।उभेस्त्री
रत्ने।अथपांडुमृगयांचरन्मैथुनगतमृषिंमृगयावर्त्तमानमपश्यत्।तथैवाप्राप्तसुतमनास्वादितकामरस
मतृप्तंबाणेनजघान।सबाणविद्धउवाचपांडुंचरताधर्ममिमंयेनत्वयाभिद्रेनकामरसस्याहमनवाप्तका
मरसोनिहतस्तस्मात्त्वमेवामवस्थामासाद्यानाप्तकामरसःपंचत्वमवाप्स्यसिक्षिप्रमेवेतिसविवर्णरू
पःपांडुःशापंपरिहरमाणोनोपासर्प्पतभार्येवाक्यंचोवाचस्वचापल्यादिमंप्राप्तवानहंशापंश्रृणोमिन
वानपत्यस्यलोकाःसंतीतिसात्वमदर्थेपुत्रानुत्पादयस्वेति।तत्रकुंतीपुत्रानुत्पादयामास।धर्म्माद्युधिष्ठि
रंवाताद्भीमसेनंशक्रादर्जुनमिति।सहृष्टरूपःपांडुरुवाचेयंतेसपत्न्यनपत्यासाधुस्याअपत्यमुत्पाद्यतामि
ति।सएवमस्त्विति उक्तःकुंत्याततोमाद्र्यामश्विभ्यांनकुलसहदेवावुत्पादितौ।माद्रीखल्वलंकृतांदृष्ट्वापां
डुर्भावंचक्रे।सतांस्पृष्ट्वैवविदेहत्वंप्राप्तःतत्रैनंचितास्थंमाद्रीसमारुरोह।उवाचचकुंतीं।यमयोरार्ययाप्रम
त्तयाभवितव्यमिति।ततस्तेपांडवाःपंचकुंत्यासहिताहस्तिनापुरेआनीतास्तापसैर्भीष्मस्यविदुरस्यनिवे
दिताः।सर्ववर्णानांनिवेद्यान्तर्हितास्तापसाबभूवुः।प्रेक्षतामेवतेषांतद्वाक्यमुपश्रुत्यभगवतामुक्ताः। १४९

अंतरिक्षात्पुष्पवृष्टिःपपात।देवदुंदुभयश्चप्रणेदुःपरिगृह्यताश्चपांडवाःपितुर्न्निधनमावेदयांचक्रुः।त
स्यौर्ध्वदेहिकंन्यायतःकृतवंतःपांडवाःतत्रनिवसंतःपांडवान्बाल्यात्प्रभृतिदुर्योधनोनामर्षयत्।पापा
चारोराक्षसींबुद्धिमास्थितोनेकैरुपायैरुद्धर्त्तुंव्यवसितोभावित्वादर्थस्यनशकिताःसमुद्धर्त्तुंततःधृतरा
ष्ट्रेणव्याजेनवारणावतमनुप्रहिताःगमनमरोचयंस्तत्रापिजतुगृहेदग्धुंसमारब्धाःनशकिताः।विदुरमं
त्रितेनबुद्धिप्रज्ञानीतिबलात्।तस्माद्धिडिंबमंतरालेहत्वैकचक्रांगताः।तस्यामप्येकचक्रायांबकंनामरा
क्षसंहत्वापंचालराज्यमभिगताःतत्रद्रौपदींभार्यामविंदंतस्वविषयंचाजग्मुःकुशलिनः।पुत्रांश्चोत्पाद
यामासुःप्रतिविंध्यंयुधिष्ठिरः।श्रुतसोमंवृकोदरः।श्रुतकीर्त्तिमर्जुनः।शतानीकंनकुलः।श्रुतकर्म्मा
णंसहदेवः।युधिष्ठिरस्तुगोवासनस्यशैब्यस्यदेविकांनामकन्यांस्वयंवरेलेभे।तस्यांपुत्रंजनयामास।यौधे
यंनाम।भीमसेनस्तुकाश्यांबलंधरांनामोपयेमे।वीर्यशुल्कांकन्यांतस्यांपुत्रंसर्वगंनामोत्पादयामास।अर्जु
नःखलुद्वारवत्यांभगिनींवासुदेवस्यसुभद्रांनामभद्रभाषिणींभार्यामुदवहत्।स्वविषयंचाभ्याजगामकु

शालीतस्यांपुत्रमभिमन्युंनामातीवगुणसंपन्नंदयितंवासुदेवस्याजनयत्।नकुलश्चेद्यांरेणुमतींनामकन्या
मुद्वहत्।तस्यांपुत्रंनिरमित्रंनामाजनयत्।सहदेवोपिमाद्रीमेवस्वयंवरेविजयांनामोपयेमे।मद्रराजदुहि
तरंतस्यांपुत्रमजनयत्सुहोत्रं।भीमसेनस्तुपूर्वमेवहिडिंबायांराक्षसंघटोत्कचंनामजनयामास।इत्येतेए
कादशपांडवानांपुत्रास्तेषांवंशकरोभिमन्युः।सविराटस्यदुहितरमुत्तरांनामोपयेमे।तस्यामस्यपरासु
र्गर्भोजायत।तमुत्संगेनष्टथाजग्राह।नियोगात्पुरुषोत्तमस्यवासुदेवस्यषण्मासिकंपरासुंगर्भमहमे
नंजीवयिष्यामीति।सभगवतावासुदेवेनासंजातबलवीर्यपराक्रमोऽकालजातोऽस्त्राग्निनादग्धःतेजसा
स्वेनसंजीवितःसंजीवयित्वाचैनमुवाच।परिक्षीणेकुलेजातोभवत्वंपरिक्षिन्नामेतिपरिक्षित्तुखलुमाद्रवतीं १५०
नामोपयेमेत्वन्मातरंयस्यांभवान्जनमेजयः।भवतोपिवपुष्टमायांद्वौपुत्रौजज्ञाते।शतानीकःसंकृति
श्च।शतानीकस्यापिवैदेह्यांपुत्रमुत्पत्स्यतेसोमदत्तः।इत्येवंपूरोर्वंशःपांडवानांचकीर्त्तितः।धर्म्मःपुण्यः
परमःपवित्रःसततंश्रोतव्योब्राह्मणैर्नियमवद्भिरनंतरंक्षत्रियैःसद्धर्म्मनिरतैःप्रजापालनतत्परैर्वै

न्नैरपि च श्रोतव्योधिगम्य तथा शूद्रैरपि च श्रोतव्यमस्त्रिवर्णैश्च शुश्रूषुभिर्ब्राह्मणांतरितमिति इति हि समिमं
पुण्यं विशेषतः श्रावयिष्यंति ये ब्राह्मणाः श्रोष्यंति वा नियतात्मनः। स्वर्गो जितः पुण्यलोकाः सततं देवब्रा
ह्मणमनुष्याणां मान्याः संपूजनीयाश्च परं हीदं भारतं भगवता व्यासेनोक्तं पावनं ब्राह्मणाद्यो वर्णाः श्रद्द
धाना विमत्सरेण मैत्रा वेदव्रतसंपन्नाः श्रोष्यंति तेपि स्वर्गो जितः सुकृतिनो न शोच्याः कृताकृतैः। भवति चात्र
श्लोकः। इदं हि वेदैः समितं पवित्रमपि चोत्तमं। धन्यं यशस्यमायुष्यं श्रोतव्यं नियतात्मभिः इत्यादिपर्व
णि पुरुवंशानुकीर्त्तनं समाप्तम् ९० वैशं इक्ष्वाकुवंशप्रभवो राजासीत्पृथिवीपतिः। मह
भिष इति ख्यातः सत्यवाक् सत्यविक्रमः। सोश्वमेधसहस्रेण राजसूयशतेन च। तोषयामास देवेंद्रं स्वर्गं ले
भे ततः प्रभुः। ततः कदाचिद्ब्रह्माणमुपासांचक्रिरे सुराः। तत्र राजर्षयो ह्यासन् स च राजा महाभिषः। अथ गंगा
सरिच्छ्रेष्ठा समुपायात्पितामहं। तस्या वासः समुद्धूतं मारुतेन शशिप्रभं। ततोभवन्सुराः सर्वे सहसावाङ्मु
खास्तदा। महाभिषस्तु राजर्षिरशंको दृष्टवान्नदीं। सोपध्यातो भगवता ब्रह्मणा स महाभिषः। उक्तश्च जा
तो मर्त्येषु पुनर्ल्लोकानवाप्स्यसि। स चिंतयित्वा नृपतिर्नृपान् सर्वांस्तपोधनान्। प्रतीपं रोचयामास पितरं भू

आ॰प॰
१५१

रिवर्द्धसे।महाभिषंतुतंदृष्ट्वानदीधैर्य्याच्युतंनृपं।तमेवमनसाध्यायंत्युपावर्त्तत्सरिद्वरा।सातुविध्वस्तव
पुषंकश्मलाभिहतंतदा।नृपंमनसिवैकृत्वाजगामनृपतिंप्रति।ददर्शपथिगच्छंतीवसून्देवान्दिवौक
सः।तथारूपांश्चतान्दृष्ट्वापप्रच्छसरितांवरा॥ गंगोवाच ॥किमिदंनष्टरूपास्थकच्चित्क्षेमंदिवौ
कसः।तामूचुर्वसवोदेवाःशप्ताःस्मोवैमहानदि।अल्पेपराधेसंरंभाद्वसिष्ठेनमहात्मना।विमूढाहिव
यंसर्वेदृष्ट्वातमृषिसत्तमं।संध्यांवशिष्ठमासीनंसमेत्याभिसृताःपुरा।तेनकोपाद्वयंशप्तायोनौसंभवते
तिह।नशक्यमन्यथाकर्त्तुंयदुक्तंब्रह्मवादिना।त्वमस्मान्मानुषीभूत्वासृजपुत्रान्वसून्भुवि।नमानु
षीणांजठरंप्रविशेमवयंशुभे।इत्युक्तातैश्चवसुभिस्तथेत्युक्त्वाब्रवीदिदं॥ गंगोवाच ॥मर्त्येषु
पुरुषव्याघ्रःकोमेभर्त्ताभविष्यति।कथयध्वंसमासेनयथाकर्त्तास्मितत्तथा॥ वसवऊचुः ॥प्रतीप १५१
स्यसुतोराजाशांतनुर्लोकविश्रुतः।भवितामानुषेलोकेसतेभर्त्ताभविष्यति गंगोवाच ममाप्ये
वंमतंदेवाःयथामांवदतानघाः।प्रियंतस्यचिकीर्षामियुष्माकंचैतदीप्सितं वसवऊचुः जातान्कु
मारान्स्वानप्सुप्रक्षेप्तुंवैत्वमर्हसि।यथानचिरकालान्नोनिष्कृतिःस्यात्त्रिलोकगे गंगोवाच एवमेत

त्करिष्यामिपुत्रस्तस्यविधीयतां॥नास्यमोघःसंगमस्यात्पुत्रहेतोर्म्मयासह वसवऊचुः तुरीयार्द्धंप्र
दास्यामोवीर्य्यस्यैकैकशोवयं।तेनवीर्येणपुत्रस्तेभवितातस्यचेप्सितं।नसंपत्स्यतिमर्त्येषुपुनस्तस्यतु
संततिः।तस्मादपुत्रःपुत्रस्तेभविष्यतिसवीर्यवान्॥ वैशं ॥एवंतेसमयंकृत्वागंगायावसवःसहाज
ग्मुःप्रहृष्टमनसोयथासंकल्पमंजसा इत्यादिपर्वणिमहाभिषोपाख्यानं ९१ वैशं ततःप्र
तीपोराजासर्वभूतहितेरतः।निषसादसमाबह्वीर्गंगाद्वारगतोजपन्।तस्यरूपगुणोपेतागंगास्त्रीरूप
धारिणी।उत्तीर्यसलिलात्तस्माल्लोभनीयतमाकृतिः।अधीयानस्यराजर्षेर्दिव्यरूपामनस्विनी।दक्षि
णंशालसंकाशमूरुंभेजेशुभानना।प्रतीपःसमहीपालःतामुवाचमनस्विनीं।किंतेकरोमिकल्याणि
प्रियंयत्तेभिकांक्षितं स्त्र्युवाच त्वामहंकामयेराजन्कुरुश्रेष्ठभजस्वमां।त्यागःकामवशानां
हिस्त्रीणांसद्भिर्विगर्हितः प्रतीपउ नाहंपरस्त्रियंकामाद्गच्छेयंवरवर्णिनि।नचासवर्णांकल्याणिध
र्म्यंतद्धिव्रतंममा।प्रःस्वदारान्परिसज्यपारक्यांसेवतेस्त्रियं।निरयान्नैवमुच्येततयावदाभूतसंप्लवं स्त्री
उवाच नाश्रेयस्यस्मिनागम्यानवक्तव्याचकर्हिचित्।भजस्वमांभजमानांराजन्कांम्यांवरस्त्रियं ॥

आ०प०
१५२

प्रतीपउ मयानिदिष्टमेतत्तेयन्मांदेशयसिप्रिये।अन्यथाप्रतिपन्नंमांनाशयेद्धर्म्मविप्लवः।संप्राप्यद
क्षिणंचोरुंत्वमाश्लिष्टावरांगने।अपत्यानांस्नुषाणांचभीरुविद्ध्येतदासनं।सव्योरुःकामिनीभोग्यस्त्व
यासचविवर्ज्जितः।तदस्मादहंनाचरिष्येत्वयिकामंवरांगने।स्नुषामेभवकल्याणिपुत्रार्थेत्वांवृणोम्य
हं।स्नुषापक्षंहिवामोरुत्वमागम्यसमाश्रिताः स्त्र्युवाच एवमप्यस्तुधर्म्मज्ञसंयुज्याहंसुतेन
ते।त्वद्भक्त्यातुभजिष्यामिविख्यातंभारतंकुलं।पृथिव्यांपार्थिवायेचतेषांयूयंपरायणं।गुणानहि
मयाशक्यावक्तुंवर्षशतैरपि।कुलस्यएवःप्रथितास्तत्साधुत्वमथोत्तमं।समयेनेहधर्म्मज्ञआचरे
यंचयद्विभो।तत्सर्व्वमेतत्पुत्रस्तेनमीमांसेनकर्हिचित्।एवंवसन्तीपुत्रेतेवर्द्धयिष्याम्यहंप्रियं।पुत्रैः
पुण्यैःप्रियैःसर्व्वैःसुखंप्राप्स्यतितेसुतः॥ वैशं ॥तथेत्युक्त्वातुसाराजंस्तत्रैवान्तरधीयत।पुत्रः १५२
जन्मपरीप्सत्सैसराजातदधारयत्।एतस्मिन्नेवकालेतुप्रतीपःक्षत्रियर्षभः।तपस्तेपेसुतस्यार्थेस
भार्ययःकुरुनंदन।तयोःसमभवत्पुत्रोवृद्धयोःसमहाभिषः।शान्तस्यजज्ञेसंतानंतस्मादासीत्सशां
तनुः।संस्मरत्नक्षयान्ल्लोकान्विजितान्स्वेनकर्म्मणा।पुण्यकर्म्मकृदेवासीछांतनुःपुरुषर्षभः।प्र

तीपः शांतनुं पुत्रं यौवनस्थं ततोऽनुशात् प्रतीप उ पुरा मां स्त्री समाभ्यागाच्छांतनो भूतये तव।
त्वामाव्रजेद्यदि रहः सा पुत्र वरवर्णिनी। कामयानातिरूपाढ्या दिव्यस्त्री पुत्रकाम्यया। सा त्वया नाभिव
क्तव्या कासि कस्यासि वांगना। यच्च कुर्यान्न तत्कार्यं संप्रष्टव्या कदाचन। भजमानां नियोगान्मे भजे
थाइत्युवाच तं॥ वैशं ॥ एवं संदिश्य तनयं प्रतीपः शांतनुं तदा। स्वे राज्ये चाभिषिच्यैनं वनं राजा
विवेश सः। स राजा शांतनुर्धीमान् देवराजसमद्युतिः। बभूव मृगयाशीलः सततं वनगोचरः। स मृ
गान्महिषांश्चैव विनिघ्नन्राजसत्तमः। गंगामनुचचारैकः सिद्धचारणसेवितां। स कदाचिन्महाराज
ददर्श परमां स्त्रियं। जाज्वल्यमानां वपुषा साक्षाच्छ्रियमिवापरां। सर्वानवद्यां सुदतीं दिव्याभरणभू
षितां। सूक्ष्मांबरधरामेकां पद्मांतरसमप्रभां। तां दृष्ट्वा हृष्टरोमाभूद्विस्मितो रूपसंपदा। पिबन्निव च ने
त्राभ्यां नातृप्यत नराधिपः। सा च दृष्ट्वैव राजानं विस्मितं तं महाद्युतिं। स्नेहादागतसौहार्द्दा नातृप्यत
विलासिनी। तामुवाचाथ राजा वै शांत्वयन्श्लक्ष्णया गिरा। देवी वा दानवी वा त्वं गंधर्वी यदि वाप्सराः।
यक्षी वा मानुषी वासि पन्नगी वा सुमध्यमे। याचे त्वां सुरगर्भाभे भार्या मे भव शोभने॥ वैशं ॥

आ०प०
१५३

एतछ्रुत्वा वचो राज्ञः सस्मितं मृदु वल्गु च। वसूनां समयं स्मृत्वा साभ्यागछदनिंदिता। उवाच चैनं राजा
नं ह्लादयंती मनो गिरा। भविष्यामि महीपाल महिषी ते वशानुगा। यत्तु कुर्यामहं राजन्शुभं वा यदि वा
शुभं। न तद्वारयितव्यास्मि न वक्तव्यास्मि चाप्रियं। एवं हि वर्त्तमानाहं त्वयि वत्स्यामि पार्थिव। वारिता
विप्रियं चोक्ता त्यजेयं त्वामसंशयं। तथेति राज्ञा सा चोक्ता तदा भारतसत्तम। प्रहर्षमतुलं लेभे प्राप्य तं
पार्थिवोत्तमं। आशाद्य शंतनुस्तांच बुभुजे कामतो वशी। न प्रष्टव्येति मन्वानो न स तां किंचिदूचिवा
न्। स तस्याः शीलवृत्तेन रूपौदार्यगुणेन च। उपचारेण च रहस्तुतोष जगतीपतिः। दिव्यरूपा हि सा देवी
गंगा त्रिपथगामिनी। मानुषं विग्रहं श्रीमद्बिभ्रती सुमनोहरं। भाग्योपनतकामस्य भार्येवोपस्थिताभव
त्। शांतनो राजसिंहस्य देवराजसमद्युतेः। संभोगस्नेहचातुर्यभावालापैर्मनोहरैः। राजानं रमयामा १५३
स यथा रेमे तथैव सः। स राजा रतिशक्तत्वादुत्तमस्त्रीगुणैर्हृतः। संवत्सरानृतून्मासान्न बुबोध बहून्
गतान्। रममाणस्तया सार्द्धं यथाकामं जनेश्वरः। अष्टौ चाजनयत्पुत्रांस्तस्याममरवर्णिनः। जातं जा
तं च सा पुत्रं क्षिपत्यंभसि भारत। प्रीणामि त्वाहमित्युक्त्वा गंगास्रोतस्यमज्जयत्। तस्य तन्न प्रियं राज्ञः

शंतनोरभवद्दाःन सतां किंचनोवाचत्यागाङ्गीतो महीपतिः। अथतामष्टमे जाते पुत्रे प्रहसितामि
वानुवाच राजा दुःखार्त्तः परीप्सन्पुत्रमात्मनः। मावधीः कासि कस्यासी किं हिंससि सुतानिति पु
त्रघ्नि सुमहत्पापं संप्राप्तं तिष्ठ गर्हितं॥ स्त्र्युवाच पुत्रकाम न ते हन्मि पुत्रं पुत्रवतां वर। जी
र्णस्तु मम वासोयं यथा स समयः कृतः। अहं जन्हुसुता गंगा महर्षिगणसेविता। देवकार्यार्थसिद्ध्य
र्थमुषिता हं त्वया सह। अष्टौ ये वसवो देवा महाभागा महौजसः। वशिष्ठशापदोषेण मानुषत्वमुपा
गताः। तेषां जनयिता नान्यस्त्वदृते भुवि विद्यते। मद्विधा मानुषी धात्री लोके नास्तीह काचन। तेषां तु ज
ननीहेतोर्मानुषत्वमुपागताः। जनयित्वा वसूनष्टौ जिता लोकास्त्वया ह्यक्षयाः। देवानां समयो ह्येष वसू
नां तु श्रुतो मया। जातं जातं मोक्षयिष्ये जन्मतो मानुषादिति। तत्ते शापाद्विनिर्मुक्ता आपवस्य महात्म
नः। स्वस्ति ते स्तु गमिष्यामि पाहि पुत्रं महाव्रतं। एष पर्यायवासो मे वसूनां सन्निधौ कृतः। मत्प्रसूतं वि
जानीहि गांगादत्तमिमं सुतं इत्यादिपर्वणि भीष्मोत्पत्तिः ९२ शंतनुरु आपवो ना
मकस्त्वेष वसूनां किंच दुःकृतं। यस्याभिशापात्ते सर्वे मानुषीं योनिमाश्रिताः। अनेन च कुमारेण गां

आ०प०
१५४

गादत्तेन किं कृतं। यस्य चैवं कृते नायं मानुषेषु निवत्स्यति। ईशानाः सर्व्वलोकस्य वसवस्ते तु वै कथं। मा
नुषेषूदपद्यंत तन्ममाचक्ष्व जाह्नवि वैशंपायन उवाच सैवमुक्ता ततो गंगा राजानमिदमब्रवीत्। भर्त्तारं जा
ह्नवी देवी शांतनुं पुरुषोत्तमं॥ गंगोवाच॥ यं लेभे वरुणः पुत्रं पुरा भरतसत्तम। वशिष्ठं नाम तेजं
स्वी ख्यातमापव इत्युत। तस्याश्रमपदं दिव्यं वकुपक्षिगणान्वितं। मेरोः पार्श्वे नगेंद्रस्य सर्व्वर्त्तुकुसुमावृतं।
स वारुणिस्तपस्तेपे तस्मिन्भरतसत्तम। वने पुण्यकृतां श्रेष्ठः स्वादुमूलफलोदके। दक्षस्य दुहिता या
तु सुरभीसमिति श्रुता। सा प्रसूतानु गां देवी कश्यपाद्भरतर्षभ। अनुग्रहार्थं जगतः सर्व्वकामदुघां वरां। तां
गां लेभे तु धर्म्मात्मा होमधेनुं स वारुणिः। सा तस्मिंस्तापसारण्ये वसंती मुनिसेविते। चचारत ह्यनसर्व्वगौरपे
तभयात तदा। अथ तद्वनमाजग्मुः कदाचिद्भरतर्षभ। धृत्वाद्या वसवः सर्व्वे देवदेवर्षिसेवितं। ते सदारा वनं त १५४
त्र व्यचरन्तः समं ततः। रेमिरे रमणीयेषु पर्व्वतेषु वनेषु च। तत्रैकस्याथ भार्या तु वसोर्वासववीक्रम। गां
चरंतीं वने तस्मिन्सा ददर्श सुमध्यमा। आपवस्य महाराज सर्वकामधुगुत्तमां। सा विस्मयसमाविष्टा र
शीलातिशयसंपदा। दिवे वै दर्शयामास गां तां गोवृषभेक्षणं। स्वापीनां च सुदोग्ध्रीं च सुवालधिमुखीं

तथानुपपन्नांगुणैःसर्वैःशीलेनानुत्तमेनच।एवंगुणसमायुक्तांवसवेवसुनंदनी।दर्शयामासराजें
द्रपुरापौरवनंदन।द्यौस्तदातांचदृष्ट्वैवगांगजेंद्रविक्रमानुवाचराजंस्तांदेवींतस्यारूपगुणैर्हृतः॥
एषागौरुत्तमादेविवारुणेरसितेक्षणे।ऋषेस्तस्यवरारोहेयस्येदंवनमुत्तमं।अस्याःक्षीरंपिबेन्म
र्त्यःस्वादुयोवैसुमध्यमे।दशवर्षसहस्राणिसजीवेत्स्थिरयौवनः।एतच्छ्रुत्वातुसादेवीनृपोत्तमसु
मध्यमा।तमुवाचानवद्यांगीभर्त्तारंदीप्ततेजसं।अस्तिमेमानुषेलोकेनरदेवात्मजासखी।नाम्ना
जितवतीनामरूपयौवनशालिनी।उशीनरस्यराजर्षेःसत्यसंधस्यधीमतः।दुहिताप्रथितालोके
मानुषेरूपसंपदा।तस्याहेतोर्महाभागसवत्सांगांममेप्सिता।आनयस्वसुरश्रेष्ठत्वरितंपुण्यवर्द्ध
न।यावदस्याःपयःपीत्वासासखीममतानद।मानुषेषुभवत्वेषाजरारोगविवर्जिता।एतन्ममममहाभा
गकर्त्तुमर्हस्यनिंदित।प्रियंप्रियतरंचस्मान्नास्तिमेन्यत्कथंचन।एतच्छ्रुत्वावचस्तस्यादेव्याःप्रियचि
कीर्षया।ध्रुवाद्यैर्भ्रातृभिःसार्द्धंद्यौस्तथातांजहारगां।तयाकमलपत्राक्ष्यानियुक्तोद्यौस्तदानृप।ऋ
षेस्तस्यतपस्तीव्रंनशशाककनिरीक्षितुं।हृतागौःसातनस्तेनप्रतापश्चनतर्कितः॥अथाश्रमपदंप्रा

द्भः फलान्यादायवारुणिः। नचापश्यत्सगांतत्र सवत्सांकाननोत्तमे। ततः समृगयामास वनेतस्मिंस्त
पोधनः। नाध्यगच्छच्चमृगयंस्तांगांमुनिरुदारधीः। ज्ञात्वातथापनीतांगांवसुभिर्दिव्यदर्शनः। ययौ
क्रोधवशं सद्यः सशापंचवसूंस्तदा। यस्मान्मेवसवोजह्रुर्गांचदोग्ध्रीसुवालधी। तस्मात्सर्वेजनिष्यं
तिमानुषेषुनसंशयः। एवंशशापभगवान्वसूंस्तान्मुनिसत्तमः। वशंक्रोधस्यसंप्राप्तः आपवोट
पसत्तम। शप्त्वाचतान्महाभागस्तपस्येवमनोदधे। एवंसशप्तवान्राजन्वसूनष्टौतपोधनः। मह
प्रभावोदेवर्षिर्देवान्क्रोधसमन्वितः। अथाश्रममनुप्राप्तास्तस्यभूयोमहात्मनः। शप्ताःस्मइतिवाभि
ज्ञास्तमृषिंवसवस्तदा। प्रसादयंतस्तमृषिंवसवःपार्थिवर्षभ। नचालभंततस्मात्तेप्रसादमृषिसत्तमा
त्। आपवात्पुरुषव्याघ्रसर्वधर्म्मविशारदात्। उवाचचसधर्म्मात्माशप्तायूयंध्रुवादयः। अनुसंवत्स १५५
राच्छापंसर्व्वेवैप्रतिमोक्ष्यथ। अयंतुयत्कृतेयूयंमयाशप्ताःसवत्स्यति। द्यौस्तदामानुषेलोकेदीर्घकालं
स्वकर्म्मणा। नानृतंतच्चिकीर्षामिक्रुद्धोयुष्मान्यदब्रुवं। नप्रजास्यतिचाप्येषमानुषेषुमहामतिः। भवि
ष्यतिचधर्मात्मासर्व्वशास्त्रविशारदः। पितुःप्रियहितेयुक्तःस्त्रीभोगान्वर्जयिष्यति। एवमुक्त्वावसून्स

र्द्धान्‌जगामभगवानृषिः।ततोमामुपजग्मुस्तेसमस्तावसवस्तदा।अयाचंतचमांराजन्‌वरंसचमया
धृतः।जातंजातंप्रक्षिपास्मान्‌स्वयंगंगेत्वमंभसि।एवंतेषांवरंसम्पकृशप्तानांराजसत्तम।मोक्षार्थमा
नुषाल्लोकाद्यथावत्कृतवत्यहं।अयंशापादृषेस्तस्यएकएवनृपोत्तम।द्यौराजन्मानुषेलोकेचिरंवत्स्य
तिभारत वैशं एतदाख्यायसादेवीतत्रैवान्तरधीयत।आदायचकुमारंतंजगामचयथेप्सितं।
सतुदेवव्रतोनामगांगेयइतिचाभवत्‌।द्विनामाशांतनोःपुत्रःशांतनोरधिकोगुणैः।शांतनुश्चापिशोकार्त्तो
जगामस्वपुरंततः।तस्याहंकीर्त्तयिष्यामिशांतनोरधिकान्गुणान्‌।महाभाग्यंचनृपतेर्भारतस्ययश
स्विनः।यस्येतिहासोद्युतिमान्‌महाभारतमुच्यते इत्यादिपर्वणिवंश ९२ वैशं ॥
सराजाशांतनुर्द्धीमान्‌ देवराजर्षिसत्कृतः।धर्म्मात्मासर्व्वलोकेषुसत्यवागितिविश्रुतः।दमोदानंक्ष
माबुद्धिर्ह्रीर्धृतिस्तेजमुत्तमं।नित्यान्यासन्महासत्वेशान्तनौपुरुषर्षभे।एवंसगुणसंपन्नोधर्म्मार्थकुश
लोनृपः।आसीद्भरतवंशस्यगोप्तासाधुजनस्यच।कंबुग्रीवःपृथुवक्षामत्तमातंगविक्रमः।अन्वितःपरि
पूर्णार्थैःसर्व्वैर्नृपतिलक्षणैः।तस्यकीर्त्तिमतोवृत्तमवेक्ष्यसततंनराः।धर्म्मएवपरःकामादर्थाच्चेतिमव

आ०प०
१५६

स्थिताः।नचास्यसदृशःकश्चित्क्षत्रियोधर्म्मतोभवत्।वर्त्तमानंहिधर्म्मेस्वेसर्व्वधर्म्मविदांवरं।तंमहीपाम
हीपालंराजराज्येभ्यषेचयन्।वीतशोकभयावाधाःसुखस्वप्नविवोधनाः।पतिंभारतगोप्तारंसमपद्यंतभू
मिपाः।तेनकीर्त्तिमताशिष्टाःशक्रप्रतिमतेजसा।यज्ञदानक्रियाशीलाःसमपद्यंतभूमिपाः।शांतनुप्रमुखै
र्गुप्तेलोकेनृपतिभिस्तदा।नियमात्सर्व्ववर्णानांब्रह्मोत्तरमवर्त्तत।ब्रह्मपर्यचरत्क्षत्रंविशःक्षत्रमनुव्रताः।ब्र
ह्मक्षत्रानुरक्ताश्चशूद्राःपर्यचरन्विशः।सहास्तिनपुरेरम्येकुरूणांपुटभेदने।वसन्सागरपर्यंतामन्वशासत
सवसुंधरां।सदेवराजसदृशोधर्म्मज्ञःसत्यसंगरः।दानधर्म्मतपोयोगाच्छ्रियापरमयायुतः।अरागद्वे
षसंयुक्तःसोमवत्प्रियदर्शनः।तेजसासूर्यसंकाशोवायुवेगसमोजवे।अंतकःप्रतिमःकोपेक्षमयापृ
थिवीसमः।वधःपशुवराहाणांतथैवमृगपक्षिणां।शांतनौपृथिवीपालेनावर्त्ततथानृप।ब्रह्मधर्म्मो १५६
त्तरेराज्येशांतनुर्विनयात्मवान्।समंशशाससभूतानिकामरागविवर्ज्जितः।देवर्षिपितृयज्ञार्थमारभ्यंतत
दाक्रियाः।नचाधर्म्मेणकेषांचित्प्राणिनामभवद्वधः।असुखानामनाथानांतिर्यग्योनिषुवर्त्ततां।सएव
राजाभूतानांसर्व्वेषामभवत्पिता।तस्मिन्कुरुपतिश्रेष्ठेराजराजेश्वरेसति।श्रितावागभवत्सत्यंदानधर्म्मा

श्रितंमनः।समभाःषोडशाष्टौचचतस्रोष्टौतथापराः।रतिमप्राप्नुवन्स्त्रीषुवभूववचनगोचरः।तथानृप
स्तथावारस्तथाद्दत्तस्तथाश्रुतः।गांगेयस्तस्यपुत्रोभून्नाम्नादेवव्रतोवसुः।ससर्वास्त्रेषुनिष्णातःपार्थिवे
ष्वितरेषुच।महाबलोमहावीर्योमहासत्वोमहारथः।सकदाचिन्मृगंविद्ध्वागंगामनुसरन्नदीं।भागीरथी
मल्पजलांशांतनुर्दृष्टवान्नृपः।तांदृष्ट्वाचिंतयामाससशांतनुर्भरतर्षभ।स्पंदतेकिंत्वियंनाद्यसरिछ्रेष्टायथा
पुरा।ततोनिमित्तमन्विछन्ददर्शसुमहायशाः।कुमारंदेवगर्भाभंबृहंतंचारुदर्शनं।दिव्यमस्त्रंविकुर्वा
णंयथादेवंपुरंदरं।कृत्स्नांगंगांसमावृत्यशरैस्तीक्ष्णैरवस्थितं।तांशरैरावृतांदृष्ट्वानदींगंगांतदांतिके।
अभवद्विस्मितोदृष्ट्वाकर्मराजातिमानुषं।जातमात्रंपुरादृष्ट्वातंपुत्रंशांतनुस्तदा।नोपलेभेस्मृतिंधीमान
भिज्ञातुंचतमात्मजं।सतुतंपितरंदृष्ट्वामोहयामाससमायया।संमोह्यचततःक्षिप्रंतत्रैवांतरधीयत।त
दद्भुतंतदादृष्ट्वातत्रराजासशांतनुः।शंकमानःसुतंगंगामब्रवीद्दर्शयेतिच।दर्शयामासतंगंगाबिभ्रतीरू
पमुत्तमं।गृहीत्वादक्षिणेपाणौतंकुमारमलंकृतं।अलंकृतामाभरणैर्विरजोंवरसंवृतां।दृष्टपूर्वामपिस
तींनाभ्यजानतशांतनुः।। गंगोवाच ।।यंपुत्रमष्टमंराजंस्त्वंपुरामय्यजायथाः।सोयंवीरस्तवसुतं

सर्वास्त्रविदनुत्तमः।गृहाणेमंमहाराजमयासंवर्द्धितःसुतः।आदायपुरुषव्याघ्रनयस्वैनंगृहान्विभो।वे
दानधिजगेसांगान्वसिष्ठादेववीर्यवान्।कृतास्त्रःपरमेष्वासोदेवराजसमोयुधि।सुराणांसम्मतोनित्य
मसुराणांचभारत।उशनावेदयच्छास्त्रमयंतद्वेदसर्वशः।तथैवांगिरसःपुत्रःसुरासुरनमस्कृतः।यद्वेद
शास्त्रंतच्चापिकृत्स्नमस्मिन्प्रतिष्ठितं।~~महेष्वासमिमंराजन्~~तवपुत्रेमहाबाहोसांगोपांगमहात्मभिः
।ऋषिःपरैरनाधृष्योजामदग्न्यःप्रतापवान्।यदस्त्रंवेदरामश्चतदप्यस्मिन्प्रतिष्ठितं।महेष्वासमिमंरा
जन्राजधर्मार्थकोविदं।मयादत्तंनिजंपुत्रंगृहाणेमंनराधिप वैशं तथैवसमनुज्ञातःपुत्र
मादायशांतनुः।भ्राजमानंयथादित्यमाययौस्वपुरंप्रति।पौरवस्तत्पुरंगत्वापुरंदरपुरोगमं।सर्वका
मसमृद्धार्थंमेनेसोत्मानमात्मना।पौरवेषुततःपुत्रंराज्यार्थमभयप्रदं।गुणवंतंमहात्मानंयौवराज्येभ्य १५७
षेचयत्।पौरान्स्वशांतनोःपुत्रःपितरंचमहायशाः।राष्ट्रंचरंजयामाससद्वृत्तेनभरतर्षभ।सतथासहपु
त्रेणरममाणोमहीपतिः।वर्त्तयामासवर्षाणिचत्वार्यमितविक्रमः।सकदाचिद्वनंयातोयमुनामभितो
नदीं।महीपतिरनिर्देश्यमाजिघ्रद्गंधमुत्तमं।तस्यप्रभवमन्विच्छन्विचचारसमंततः।सददर्शतदाक

न्यांदासानांदेवरूपिणीं।तामपश्यत्सदृष्ट्वैव१कन्यामसितलोचनां।कस्यत्वमसिकावासिकिंचभी
रुचिकीर्षसि।साब्रवीद्दासकन्यास्मिधर्मार्थंवाह्येतरिं।पितुर्नियोगाद्भद्रंतेदासराज्ञोमहात्मनः।
रूपमाधुर्यगंधैस्तांसंयुक्तांदेवरूपिणीं।समीक्ष्यराजादासेयींकामयामासशंतनुः।सगत्वापितरं
तस्यावरयामासतांतदा।सतुतंप्रत्युवाचेदंदासराजोमहीपतिं।जातमात्रैवसादेयावरायवरवर्णिनी।
हृदिकामस्तुमेकश्चित्तन्निबोधजनेश्वर।यदीमांधर्मपत्नींत्वंमत्तःप्रार्थयसेनघ।सत्यवागसिसत्ये
नसमयंकुरुमेततः।समयेनप्रदद्यांतेकन्यामेतामहंनृप।नहिमेत्वत्समःकश्चिद्वरोराजाभविष्य
ति॥ शंतनुरु ॥श्रुत्वातुवचनंदासस्यप्रवस्येयमहंतव।दातव्यंचेत्प्रदास्यामिनत्वदेयंकथंच
न दाशउ अस्यांजायेतयःपुत्रःसराजापृथिवीपते।त्वदूर्ध्वमभिषेक्तव्योनान्यःकश्चनपार्थि
व वैशं नाकामयततंदातुंवरंदासायशंतनुः।शरीरजेनतीव्रेणदह्यमानोपिभारत।सचिंत
यन्नेवतुतांदासकन्यांमहीपतिः।प्रत्ययाद्धास्तिनपुरंकामोपहतचेतनः।ततःकदाचिच्छोचंतंशंतनुं
ध्यानमास्थितं।पुत्रोदेवव्रतोभ्येत्यपितरंवाक्यमब्रवीत्।सर्वतोलभतःक्षेमंविधेयाःसर्वपार्थिवाः

आ०प० तत्किमर्थमिहाभीक्ष्णं पितः शोचसि दुःखितः। ध्यायन्निव च किं राजन्नाभिभाषसि किंचन। नचाश्वेन
१५८ विनिर्यासि विवर्णो हरिणः कृशः। व्याधिमिच्छामि ते ज्ञातुं प्रतिकुर्यां हि तत्र वै। एवमुक्तः स पुत्रेण शांत
नुः प्रत्यभाषत। असंशयं ध्यानपरं यथा वत्स तथास्म्यहं। अपत्यं नस्त्वमेवैकः श~~तैरपिवरःसुतःन~~
~~चाप्यहंवृथाभूयो~~ कुले महति भारत। शस्त्रनित्यश्च सततं पौरुषे पर्यवस्थितः। अनित्यतां च मर्त्यानां
मनुशोचामि पुत्रक। कथंचित्तव गांगेय विपत्तौ नास्ति नः कुलं। असंशयं त्वमेवैकः शतैरपि वरः सु
तः। न चाप्यहं वृथा भूयो दारान्कर्तुमिहोत्सहे। संतानस्याविनाशार्थं कामये भद्रमस्तु ते। अनपत्यतैकपुत्र तै
त्वमित्याहुर्धर्मवादिनः। चक्षुरेकं च पुत्रश्च अस्ति नास्ति च भारत। चक्षुर्नाशे तनोर्नाशः पुत्रनाशे कुल
क्षयः। अग्निहोत्रं त्रयी विद्या संतानमपि चाक्षयं। सर्वाण्येतान्यपत्यस्य कलां नार्हंति षोडशीं। एषा त्र १५८
यी पुराणानां देवतानां च शाश्वती। त्वं च शूरः सदामर्षी शस्त्रनित्यश्च भारत। नान्यत्र युद्धात्तस्मात्ते नि
धनं विद्यतेनघ। सोस्मि संशयमापन्नस्त्वयि शांते कथं भवेत्। इति ते कारणं तात दुःखस्योक्तमशेषतः।
वैशम्० ततस्तत्कारणं ज्ञात्वा कृत्स्नं चैवमशेषतः। देवव्रतो महाबुद्धिः प्रययावनुचिंतयन्। अभ्यग

छत्त्रश्रेयांस्तु दृष्ट्वामास्वंपितुर्हितं।तमपृच्छंतदाभ्येत्यपितुस्तच्छोककारणं।तस्मैसकुरुमुख्याययथा
वत्परिपृच्छते।वरंशशंसतांकन्यामुद्दिश्यभरर्षभ।बलवत्सपत्नतामत्रदोषंपश्यामिकेवलं।ततोदेव
व्रतोवृद्धैःक्षत्रियैःसहितस्तदा।अभिगम्यदासराजंकन्यांवव्रेपितुःस्वयं।तंदाशःप्रतिजग्राहविधि
वत्प्रतिपूज्यच।अब्रवीच्चैनमासीनंराजसंसदिभारत॥ दाशउ ॥त्वमेवनाथःसंप्राप्तःशंतनोर्नृ
पसत्तमः।पुत्रःप्रवदतांश्रेष्ठःकिंतुवक्ष्यामितेवचः।कोहिसंबंधिकंश्लाघ्यमीप्सितंयौनमीदृशं।अति
क्रामन्नसंतप्येतसाक्षादपिपुरंदरः।अपत्यंचैतदार्यस्ययोयुष्माकंसमोगुणैः।यस्यशुक्रात्सत्यवती
प्रसूतावरवर्णिनी।तेनमेबहुशस्तातपितातेपरिकीर्त्तितः।अर्हःसत्यवतींवोढुंसर्वराजसुभार
ता।असितोह्यपिदेवर्षिःप्रत्याख्यातःपुरामया।सत्यवत्याभृशंह्यर्थीसहिब्रह्मर्षिसत्तमः।कन्याकृ
तेनुकिंचित्तुवक्ष्यामिभरतर्षभ।बलवत्सपत्नतामत्रदोषंपश्यामिकेवलं।यस्यहित्वंसपत्नःस्यागंध
र्वस्यासुरस्यवा।नसजातुचिरंजीवेत्क्रुद्धेत्वयिपरंतप।एतावानत्रदोषोहिनान्यःकश्चनपार्थिव।एत
ज्ज्ञानीहिभद्रंतेदानादानेपरंतप॥ वैशं ॥एवमुक्तस्तुगांगेयस्तदासंप्रत्यभाषत।शृण्वतांभूमि

आ०प० पालानांपितुरर्थायभारत।इदंमेव्रतमादत्स्वसत्यंसत्यवतांवर।नैवजातोनवाजातईदृशंवक्तुमु
१५९ त्सहेत्।एवमेतत्करिष्यामियथात्वमनुभाषसे।योस्यांजनिष्यतेपुत्रःसनोराजाभविष्यति।इत्युक्तः
पुनरेवाथतंदाशःप्रत्यभाषत।चिकीर्षुर्दुष्करंकर्मराज्यार्थेभरतर्षभ।त्वमेवनाथःसंप्राप्तःशा
न्तनोरमितद्युते।कन्यायाश्चैवधर्मात्मन्प्रभुर्दानायचेश्वरः।इदंतुवचनंसौम्यकार्यंचैवनिबोधमे।
कुमारिकाणांशीलेनवक्ष्याम्यहमरिंदम।यत्त्वयासत्यवत्यर्थेसत्यधर्मपरायण।राजमध्येप्रतिज्ञा
तमनुरूपंतवैवतत्।नान्यथातन्महाबाहोसंशयोत्रनकश्चन।तवापत्यंभवेद्यत्तुतत्रनःसंशयोम
हान्॥ वैशं ॥तस्यैतन्मतमाज्ञायसत्यधर्मपरायणः।प्रत्यजानात्तदाराजन्पितुःप्रियचिकीर्ष
या॥ गांगेयउ ॥दाशराजन्निबोधेदंवचनंमेनृपोत्तम।शृण्वतांभूमिपालानांयद्ब्रवीमिपितुःकृ १५९
ते।राज्यंतावत्पूर्वमेवमयात्यक्तंनराधिपाः।अपत्यहेतोरपिचकरिष्येद्यविनिश्चयं।अद्यप्रभृतिमेदाश
ब्रह्मचर्यंभविष्यति।अपुत्रस्यापिमेलोकाभविष्यंत्यक्षयादिवि वैशं तस्यतद्वचनंश्रुत्वासंप्र
हृष्टतनूरुहः।ददानीत्येवतंदाशोधर्मात्माप्रत्यभाषत।ततोंतरिक्षेप्सरसोदेवाःसर्षिगणास्तदा।अ

भ्यवर्षन्कुसुमैर्भीष्मोयमितिचाब्रुवन्॥ततःसपितुरर्थायतामुवाचयशस्विनीं॥अधिरोहरथंमा
तर्गच्छावःस्वगृहानिति॥ वैशं ॥एवमुक्त्वातुभीष्मस्तांरथमारोप्यभामिनीं॥आगम्यहास्तिन
पुरंशांतनोःसन्यवेदयत्॥तस्यतद्दुष्करंकर्मप्रशशंसुर्नराधिपाः॥समेताश्चपृथक्चैवभीष्मोयमि
तिचाब्रुवन्॥तच्छ्रुत्वादुष्करंकर्मकृतंभीष्मेणशांतनुः॥स्वच्छंदमरणंतुष्टोददौतस्मैमहात्मने ॥
इत्यादिपर्व्वणिसत्यवतीलाभे ८४ वैशं ततोविवाहेनिर्वृत्तेसराजाशांतनुर्नृपः॥तांक
न्यांरूपसंपन्नांस्वगृहेसन्यवेशयत्॥ततःशांतनवोधीमान्सत्यवत्यामजायत॥वीरश्चित्रांगदोनाम
वान्पुरुषेश्वरः॥अथापरंमहेष्वासंसत्यवत्यांसुतंप्रभुः॥विचित्रवीर्यंराजानंजनयामासवीर्यवान्॥अ
प्राप्तवतितस्मिंस्तुयौवनंपुरुषर्षभे॥सराजाशांतनुर्धीमान्कालधर्म्ममुपेयिवान्॥स्वर्गतेशांतनौभी
ष्मश्चित्रांगदमरिंदमं॥स्थापयामासवैराज्येसत्यवत्यामतेस्थितः॥सतुचि चित्रांगदःशौर्यात्सर्वांश्चि
क्षेपपार्थिवान्॥मनुष्यंनहिमेनेसकंचित्सदृशमात्मनः॥तंक्षिपंतंसुरांश्चैवमनुष्यानसुरांस्तथा॥गं
धर्वराजोबलवांस्तुल्यनामाभ्ययात्तदा॥तेनास्यसुमहद्युद्धंकुरुक्षेत्रेबभूवह॥तयोर्बलवतोस्तत्रगंध

र्वकुरुमुख्ययोः।नद्यास्तीरेसरस्वत्याःसमास्तिस्रोभवद्रणः।तस्मिन्विमर्देतुमुलेशस्त्रवर्षसमाकुले।माया
धिकोवधीद्वीरंगंधर्वःकुरुसत्तमं।सहत्वातुनरश्रेष्ठंचित्रांगदमरिंदमं।अंतायकृत्वागंधर्वोदिवमाचक्र
मेततः।तस्मिन्पुरुषशार्दूलेनिहतेभूरितेजसि।भीष्मःशांतनवोराजन्प्रेतकार्याण्यकारयत्।विचित्रवीर्यं
चतदाबालमप्राप्तयौवनं।कुरुराज्येमहाबाहुरभ्यषिंचदनंतरं।विचित्रवीर्यःसतदाभीष्मस्यवचनेस्थितः
।अन्वशासन्महाराजपितृपैतामहंपदं।सधर्मशास्त्रकुशलंभीष्मंशांतनवंनृपः।पूजयामासधर्मेणस
चैनंप्रत्यपालयत् इत्यादिपर्व्वणि ९५ वैशं हतेचित्रांगदेभीष्मोबालेभ्रातरिकौरव।पाल
यामासतद्राज्यंसत्यवत्यामतेस्थितः।संप्राप्तयौवनंदृष्ट्वाभ्रातरंधीमतांबरः।भीष्मोविचित्रवीर्यस्यविवा
हायाकरोन्मतिं।अथकाशिपतेर्भीष्मःकन्यास्तिस्रोप्सरोपमाः।सुश्रावसहिताराजन्वृण्वानावैस्वयंवरं। १६०
ततःसरथिनांश्रेष्ठोरथेनैकेनशत्रुजित्।जगामानुमतेमातुःपुरींवाराणसींप्रभुः।तत्रराज्ञःसमुदितान्
सर्वतःसमुपागतान्।ददर्शकन्यास्ताश्चैवभीष्मःशांतनुनंदनः।कीर्त्यमानेषुराज्ञांतुतदानामसुसर्वशः।
एकाकिनंतदाभीष्मंवृद्धंशांतनुनंदनं।सोद्विग्नाइवतंदृष्ट्वाकन्याःपरमशोभनाः।अपक्रामंततासर्वा

द्धुरित्येवचिंतयानावृद्धःपरमधर्मात्मावलीपलितधारणः।किंकारणमिहायातोनिर्लज्जोभरतर्षभः।मिथ्याप्र
तिज्ञोलोकेषुकिंवदिष्यतिभारत।ब्रह्मचारीतिभीष्मोहिवृथैवपलितोभुवि।इत्येवंप्रब्रुवंतस्तेहसंतिस्मनृपाध
माः वैशं क्षत्रियाणांवचःश्रुत्वाभीष्मश्चुक्रोधभारत।भीष्मस्तदास्वयंकन्यावरयामासताःप्रभुः।उ
ग्रा४ वाचचमहीपालान्राजन्जलदनिस्वनः।रथमारोप्यताःकन्याभीष्मःप्रहरतांवरः।आहूयदानंकन्यानांगुण
वद्धःस्मृतंबुधैः।अलंकृत्ययथाशक्तिप्रदायचधनान्यपि।प्रयच्छंत्यपरेकन्यांमिथुनेनगवामपि।वित्तेन
कथितेनान्येबलेनान्येनुमान्यचाप्रमत्तामुपयंत्यन्येस्वयमन्येचविंदति।आर्षंविधिंपुरस्कृत्यदारान्विंदं
तिचापरे।अष्टमंतमथोवित्तविवाहंकविभिर्वृतं।स्वयंवरंतुराजन्याःप्रशंसंत्युपयांतिच।प्रमथ्यतुहृतामा
हुर्ज्यायसींधर्मवादिनः।ताइमाःपृथिवीपालाजिहीर्षामिबलादितः।तेयतध्वंपरंशक्त्याविजयायेतराय
वा।स्थितोहंपृथिवीपालायुद्धायकृतनिश्चयः।एवमुक्त्वामहीपालान्काशिराजंचवीर्यवान्।सर्वाःकन्याःसकौ
रमोरथमारोप्यचस्वकं।आमंत्र्यचशतान्प्रायाच्छीघ्रंकन्याःप्रगृह्यताः।८।ततस्तेपार्थिवाःसर्वेसमुत्पेतुरमर्षि
ताः।संस्पृशंतःस्वकान्बाहून्दशंतोदशनच्छदान्।तेषामाभरणान्याशुत्वरितानांविमुंचतां।आमुंचतांचवर्म्मा

ते२

आ॰प॰ णिसंभ्रमः सुमहानभूत्।ताराणामिव संपातो बभूव जनमेजय।भूषणानां च सर्वेषां कवचानां च सर्वशः।
१६१ सवर्मभिः भूषणैश्च प्रकीर्यद्भिरितस्ततः।सक्रोधामर्षजिह्मभ्रूकषायीकृतलोचनाः।सूतोपक्लृप्तान्रुचि
रान्सदश्वैरुपकल्पितान्।रथानास्थाय ते वीराः सर्वप्रहरणान्विताः।प्रयांतमथ कौरव्यमनुसस्रुरुदा
युधाः।ततः समभवद्युद्धं तेषां तस्य च भारत।एकस्य च बहूनां च तुमुलं लोमहर्षणं।ते त्विषून्दशसाहस्रां
स्तस्मिन्युगपदाक्षिपन्।अप्राप्तांश्चैव तानाशु भीष्मः सर्वांस्तथांतरा।अच्छिनच्छरवर्षेण महता लोमवाहिना।
ततस्ते पार्थिवाः सर्वे सर्वतः परिवार्य तं।ववृषुः शरवर्षेण वर्षेणेवाद्रिमंबुदाः।स तं बाणमयं वर्षं शरैरावार्य
सर्वतः।ततः सर्वान्महीपालान्प्रत्यविध्यत्त्रिभिस्त्रिभिः।एकैकस्तु ततो भीष्मं राजन्विव्याध पंचभिः।स च ता
न्प्रतिविव्याध द्वाभ्यां द्वाभ्यां पराक्रमन्।तद्युद्धमासीत्तुमुलं घोरं देवासुरोपमं।पश्यतां लोकवीराणां शरश १६१
क्तिसमाकुलं।स धनूंषि ध्वजाग्राणि वर्माणि च शिरांसि च।चिच्छेद समरे भीष्मः शतशोथ सहस्रशः।तस्या
ति पुरुषं कर्म लाघवं रथचारिणः।रक्षणं चात्मनः संख्ये शत्रवोप्यभ्यपूजयन्।तान्विनिर्जित्य तु रणे सर्वश
स्त्रभृतां वरः।कन्याभिः सहितः प्रायाद्भारतो भारतान्प्रति।ततस्तु पृष्ठतो राजञ्छाल्वराजो महारथः।अ

स्मागच्छदमेयात्माभीष्मंशांतनवंरणे।वारणंजघनेभिंदन्दंताभ्यामपरोयथा।वासितामनुसंप्राप्तोयूथपो
बलिनांवरः।स्त्रीकामस्तिष्ठतिष्ठेतिभीष्ममाहसपार्थिवः।शाल्वराजोमहावाहुरमर्षेणप्रचोदितः।ततःस
पुरुषव्याघ्रोभीष्मःपरबलार्दनः।तद्वाक्याकुलितःक्रोधाद्विधूमोग्निरिवज्वलन्।विततेषुधनुःपाणिर्विकुं
चितललाटभृत्।क्षत्रधर्म्मंसमास्थायव्यपेतभयसंभ्रमः।निवर्त्तयामासरथंशाल्वंप्रतिमहारथः।निव
र्त्तमानंतंदृष्ट्वाराजानःसर्वएवते।प्रेक्षकाःसमपद्यंतभीष्मशाल्वसमागमे।तौवृषाविवनर्दंतौबलिनौवासि
तांतरे।अन्योन्यमभिवर्त्ततांबलविक्रमशालिनौ।ततोभीष्मंशांतनवंशरैःशतसहस्रशः।शाल्वराजोन
रश्रेष्ठःसमवाकिरदाशुगैः।पूर्वमभ्यर्दितंदृष्ट्वाभीष्मंशाल्वेनतेनृपाः।विस्मिताःसमपद्यंतसाधुसाध्वि
तिचाब्रुवन्।लाघवंतस्यतेदृष्ट्वासमरेसर्वपार्थिवाः।अपूजयंतसंहृष्टाःवाग्भिःशाल्वंनराधिपं।क्षत्रियाणां
ततोवाचःश्रुत्वापरपुरंजयः।क्रुद्धःशांतनवोभीष्मस्तिष्ठतिष्ठेत्यभाषत।सारथिंचाब्रवीत्क्रुद्धोयाहियत्रैषपा
र्थिवः।यावदेनंनिहन्म्यद्यभुजंगमिवपक्षिराट्।ततोस्त्रंवारुणंसम्यग्योजयामासकौरवः।तेनाश्वांश्चतुरो
मृद्नाच्छाल्वराजस्यसंयुगे।अस्त्रैरस्त्राणिसंवार्य्यशाल्वराजस्यकौरवः।भीष्मोनृपतिशार्दूलन्यवधीत्तस्य

सारथिं।अस्त्रेणचास्याथैंद्रेणन्यवधीत्तुरगोत्तमान्॥कन्याहेतोर्नरश्रेष्ठभीष्मःशंतनवस्तदा।जित्वाविस
र्जयामासजीवंतंनृपसत्तमं।ततःशाल्वःस्वनगरंप्रययौभरतर्षभ।स्वराज्यमन्वशाच्चैवधर्मेणनृपतिस्त
दा।राजानोयेचतत्रासन्स्वयंवरदिदृक्षवः।स्वान्येवतेपिराष्ट्राणिजग्मुःपरपुरंजय।एवंविजित्यताःकन्याभी
ष्मःप्रहरतांवरः।प्रययौहास्तिनपुरंयत्रराजासकौरवः।विचित्रवीर्योधर्मात्माप्रशास्तिवसुधामिमां।यथा
पितास्यकौरव्यःशंतनुर्नृपसत्तमः।सोचिरेणैवकालेनअत्यक्रामन्नराधिप।वनानिसरितश्चैवशैलांश्चवि
विधद्रुमान्॥अक्षतःक्षपयित्वारीन्संख्येसंख्येयविक्रमः।आनयामासकाश्यस्यसुताःसागरगासुतः।
स्नुषाइवसधर्मात्माभगिनीरिवचानुजाः।यथादुहितरश्चैवपरिगृह्ययया॑कुरून्॥आनिन्येसमहाबाहुर्
भ्रातुःप्रियचिकीर्षया।ताःसर्वगुणसंपन्नाःभ्राताभ्रात्रेयवीयसे।भीष्मोविचित्रवीर्यायप्रददौविक्रमाहृताः।
एवंधर्मेणधर्मज्ञःकृत्वाकर्मातिमानुषं।भ्रातुर्विचित्रवीर्यस्यविवाहायोपचक्रमे।सत्यवत्यासहमिथःकृ
त्वानिश्चयमात्मवान्॥विवाहंकारयिष्यंतंभीष्मंकाशिपतेःसुता॥ज्येष्ठातासामिदंवाक्यमब्रवीद्धसतीत
दा।मयासौभपतिःपूर्वंमनसाहिवृतःपतिः।तेनचास्मिवृतापूर्वमेषकामश्चमेपितुः।मयावरयितव्यो १६२

छाल्वस्तस्मिन्स्वयंवरे।एतद्विज्ञायधर्मज्ञधर्मतत्वंसमाचर।एवमुक्तस्तयाभीष्मःकन्ययाविप्रसंसदि।
चिंतामभ्यगमद्वीरोयुक्तांतस्यैवकर्मणः।अन्यासक्तात्वियंकन्याज्येष्टाभ्रात्रेमयाजिता।वाचादत्तामनोद
त्ताकृतमंगलकौतुका।निर्दिष्टातुपरस्यैवसावर्ज्यापरचिंतका।इत्युक्त्वाचानुमान्यैवभ्रातरंस्ववशानुगं।
विनिश्चित्यसधर्मज्ञोब्राह्मणैर्वेदपारगैः।अनुजज्ञेतदाज्येष्टामंबांकाशिपतेःसुतां।अंबिकांबालिकेभार्ये
प्रादाद्भ्रात्रेयवीयसे।भीष्मोविचित्रवीर्यायविधिदृष्टेनकर्मणा।तयोःपाणीगृहीत्वासरूपयौवनदर्पितः
।विचित्रवीर्योधर्मात्माकामात्मासमपद्यत।तेचापिबृहतीश्यामेनीलकुंचितमूर्द्धजे।रक्ततुंगनखोपे
तेपीनश्रोणिपयोधरे।आत्मनःप्रतिरूपोसौलब्धःपतिरितिस्थिते।विचित्रवीर्यंकल्याणंपूजयामासतु
शुभे।सचाश्विरूपसदृशोदेवतुल्यपराक्रमः।सर्वासामेवनारीणांचित्तप्रमथनोरहः।ताभ्यांसहसमाःस
प्तविहरन्पृथिवीपतिः।विचित्रवीर्यस्तरुणोयक्ष्मणासमगृह्यत।सुहृदांयतमानानामाप्तैःसहचिकित्स
कैः।जगामास्तमिवादित्यःकौरव्योयमसादनं।धर्मात्मासतुगांगेयश्चिंताशोकपरायणः।प्रेतकार्याणि
सर्वाणितस्यसम्यगकारयत्।राज्ञोविचित्रवीर्यस्यसत्यवत्यामतेस्थितः।ऋत्विग्भिःसहितोभीष्मःसर्वैश्च

आ०प०
१६२

कुरुपुंगवैः॥ इत्यादिपर्वणिविचित्रवीर्योपरमः ९९ वैशं ततःसत्यवतीदीनाकृपणा
पुत्रगृद्धिनी।पुत्रस्यकृत्वाकार्याणिस्नुषाभ्यांसहभारत।समाश्वास्यस्नुषेतेचभीष्मंशस्त्रभृतांवरं।धर्मंच
पितृवंशंचमातृवंशंचभाविनी।प्रसमीक्ष्यमहाभागागांगेयंवाक्यमब्रवीत।शांतनोर्धर्मनित्यस्यकौरव्य
स्ययशस्विनः।त्वयिपिंडश्चकीर्त्तिश्चसंतानंचप्रतिष्ठितं।यथाकर्मशुभंकृत्वास्वर्गोपगमनंध्रुवं।यथाच
युर्ध्रुवंसत्येत्वयिधर्मस्तथाध्रुवः।वेत्थधर्मांश्चधर्मज्ञसमासेनेतरेणच।विविधास्त्वंश्रुतीर्वेत्थवेत्थवेदांश्
चसर्वशः।व्यवस्थानंचतेधर्मेकुलाचारंचलक्षये।प्रतिपत्तिंचकृच्छ्रेषुशुक्रांगिरसयोरिव।तस्मात्सुभृश
माश्वस्यत्वयिधर्मभृतांवर।कार्येत्वांविनियोक्ष्यामितच्छ्रुत्वाकर्तुमर्हसि।ममपुत्रस्तवभ्रातावीर्यवान्सुप्रि
यश्चते।बालएवगतःस्वर्गमपुत्रःपुरुषर्षभ।इमेमहिष्यौभ्रातुस्तेकाशिराजसुतेशुभे।रूपयौवनसंपन्ने १६२
पुत्रकामेचभारत।तयोरुत्पादयापत्यंसंतानायकुलस्यनः।मन्नियोगान्महाबाहोधर्मंकर्त्तुमिहार्हसि।रा
ज्येचैवाभिषिच्यस्वभारताननुसाधिच।दारांश्चकुरुधर्मेणमानिमज्जीःपितामहान्।अग्निहोत्रंत्रयोवेदाः
संतानमपिचाक्षयं।एषात्रयीतुसंप्रोक्तास्वर्गमोक्षफलप्रदा॥ वैशं ॥तथोच्यमानोमात्रासमुहृद्भि

श्च परंतप। इत्युवाचाथ धर्मात्मा धर्म्यमेवोत्तरं वचः। असंशयं परो धर्मस्त्वया मातरुदाहृतः। त्वमपत्यं प्रति
च मे प्रतिज्ञां वेत्थ वै परां। जानासि च यथावृत्तं शुल्कहेतोस्त्वदंतरे। स सत्यवति सत्यं ते प्रतिजानाम्यहं पुनः। प
रित्यजेयं त्रैलोक्यं राज्यं देवेषु वा पुनः। यद्वाप्यधिकमेताभ्यां न तु सत्यं कथंचन। त्यजेच्च पृथिवी गंधमापश्च
रसमात्मनः। ज्योतिस्तथा त्यजेद्रूपं वायुः स्पर्शगुणं त्यजेत्। प्रभां समुत्सृजेदर्को धूमकेतुस्तथोष्मतां। त्यजे
च्छब्दं तथाकाशं सोमः शीतांशुतां त्यजेत्। विक्रमं वृत्रहा जह्याद्धर्मं जह्याच्च धर्मराट्। न त्वहं सत्यमुत्स्रष्टुं व्यव
सेयं कथंच–। एवमुक्ता तु पुत्रेण भूरिद्रविणतेजसा। माता सत्यवती भीष्ममुवाच तदनंतरं। जानामि ते
स्थितिं सत्ये परां सत्यपराक्रम। इच्छन्सृजेथास्त्रींल्लोकानन्यांस्त्वं स्वेन तेजसा। जानामि चैव सत्यं तन्मदर्थं
यदभाषितं। आपद्धर्ममवेक्षस्व वह पैतामहीं धुरं। यथा ते कुलतंतुश्च धर्मश्च न पराभवेत्। सुहृदश्च प्र
हृष्येरंस्तथा कुरु परंतप। लालप्यमानां तामेवं कृपणां पुत्रगृद्धिनीं। धर्मादपेतं ब्रुवतीं भीष्मो भूयोब्रवीदि
दं। राज्ञि धर्मानवेक्षस्व मा नः सर्वान्व्यनीनशः। सत्याच्च्युतिः क्षत्रियस्य न धर्मेषु प्रशस्यते। शंतनोरपि
संतानं यथा स्यादक्षयं भुवि। तत्ते धर्मं प्रवक्ष्यामि क्षात्रं राज्ञि सनातनं। श्रुत्वा तं प्रतिपद्यस्व प्राज्ञैः सह पुरो

आ०प० हितैः। आपद्धर्मार्थकुशलैर्लोकतंत्रमवेक्ष्यच॥ इत्यादिपर्व्वणि महाभारते ८७ भीष्मउ
१६४ जामदग्न्येन रामेण पितुर्वधममृष्यता। राजा परशुना पूर्वं हैहयाधिपतिर्हतः। शतानि दशबाहूनां निकृ
त्तान्यर्जुनस्य वै। लोकस्याचारितो धर्मस्तेनातिकिल दुश्चरः। पुनश्च धनुरादाय महास्त्राणि प्रमुंचता। निर्द
ग्धं क्षत्रमशक्रेण रथेन जयता महीं। एवमुच्चावचैरस्त्रैर्भार्गवेण महात्मना। त्रिःसप्तकृत्वः पृथिवी कृता निःक्ष
त्रिया पुरा। ततः संभूय सर्वाभिः क्षत्रियाभिः समंततः। उत्पादितान्यपत्यानि ब्राह्मणैर्वेदपारगैः। पाणिग्रा
हस्य तनय इति वेदेषु निश्चितं। धर्मं मनसि संस्थाप्य ब्राह्मणांस्ताः समभ्ययुः। ततः पुनः समुदितं क्षत्रं स
मभवत्तदा। इमं चैवात्र वक्ष्येऽहमितिहासं पुरातनं। अथोतथ्य इति ख्यात आसीद्धीमानृषिः पुरा। ममता ना
म तस्यासीद्भार्या परमसम्मता। उतथ्यस्य यवीयांस्तु पुरोधास्त्रिदिवौकसां। बृहस्पतिर्बृहत्तेजा ममतामन्वप १६४
द्यत। उवाच ममता तं तु देवरं वदतां वरं। अन्तर्वत्नी त्वहं भ्रात्रा ज्येष्ठेनारम्यतामिति। अयं च मे महाभाग कुक्षावे
व बृहस्पते। औतथ्यो वेदमत्रैव षडंगं प्रत्यधीयत। अमोघरेतास्त्वं चापि द्वयोर्नास्त्यत्र संभवः। तस्मादेवंग
ते त्वद्य उपारमितुमर्हसि। एवमुक्तस्तदा सम्यग्बृहस्पतिरुदारधीः। कामात्मानं तदात्मानं न शशाक नि

यच्छितुंम्सं वभूव ततः कामी तया सार्द्धमकामया। उत्सृजंतं तु तं रेतः स गर्भस्थोभ्यभाषत। भोस्तात मा गमः
कामं द्वयोर्नास्तीह संभवः। अल्पावकाशो भगवन्पूर्वं चाहमिहागतः। अमोघरेताश्च भवान्न पीडां कर्तुम
र्हसि। अश्रुत्वैव तु तद्वाक्यं गर्भस्थस्य बृहस्पतिः। जगाम मैथुनायैव ममतां चारुलोचनां। शुक्रोत्सर्गं त
तो बुध्वा तस्या गर्भगतो मुनिः। पद्भ्यामारोधयन्मार्गं शुक्रस्य च बृहस्पतेः। स्थानमप्राप्तमथ तद्रेतः प्रतिह
तं तदा। पपात सहसा भूमौ ततः क्रुद्धो बृहस्पतिः। तं दृष्ट्वा पतितं शुक्रं शशाप स रुषान्वितः। उतथ्यपुत्रं गर्भ
स्थं निर्भर्त्स्य भगवानृषिः। यन्मां त्वमीदृशे काले सर्वभूतेप्सिते सति। एवमात्थ वचस्तस्मात्तमो दीर्घं प्रवेक्ष्य
सि। स वै दीर्घतमा नाम शापादृषिरजायत। बृहस्पतेर्बृहत्कीर्तेर्बृहस्पतिरिवौजसा। स पुत्रान्जनयामा
स गोतमादीन्महायशाः। ऋषेरुतथ्यस्य तदा संतानकुलवृद्धये। धर्मात्मा च महात्मा च वेदवेदांगपारगः।
गोधर्मं सौरभेयाच्च सोधीत्य निखिलं मुनिः। प्रावर्त्तत तथा कर्तुं श्रद्धावांस्तमशंकया। ततो वितथमर्यादं तं
दृष्ट्वा मुनिसत्तमाः। क्रोधमोहाभिभूतास्ते सर्वे तत्राश्रमौकसः। अहोयं भिन्नमर्यादो नाश्रमे वस्तुमर्हति।
तस्मादेनं वयं सर्वे पापात्मानं त्यजामहे। इत्यन्योन्यं समाभाष्य ते दीर्घतमसं मुनिं। लोभमोहाभिभूतास्ते पु

आ०प० त्रास्तंगौतमादयः। वध्वोडुपेपरिक्षिप्यगंगायांसमवासृजन्। कस्मादंधश्चवृद्धश्चभर्तव्योयमितिस्म
२६५ ते। चिंतयित्वाततःक्रूराप्रतिजग्मुरथोगृहान्। सोनुस्रोतस्तदाविप्रःप्लवमानोयदृच्छया। जगामसुबहू
न्देशानंधस्तेनोडुपेनह। तंनुराजावलिर्नामसर्वधर्मविदांवरः। अपश्यन्मज्जनगतःस्रोतसाभ्यास
मागतं। जग्राहचैनंधर्मात्मावलिःसत्यपराक्रमः। ज्ञात्वाचैनंसववेथपुत्रार्थेभरतर्षभ। संतानार्थंम
हाभागभार्यासुममनानद। पुत्रान्धर्मार्थकुशलानुत्पादयितुमर्हसि। एवमुक्तःसतेजस्वीतंतथेत्युक्त
वानृषिः। तस्मैसराजास्वांभार्यांसुदेष्णांप्राहिणोत्तदा। अंधंवृद्धंचतंमत्वानसादेवीजगामह। स्वांतुधा
त्रेयिकांतस्मैवृद्धायप्राहिणोत्तदा। तस्यांकाक्षीवदादीन्सशूद्रयोनावृषीर्वशी। जनयामासधर्मात्मापु
त्रानेकादशैवतु। काक्षीवदादीन्पुत्रांस्तुदृष्ट्वावेदानधीयतः। उवाचतमृषिंराजाममैतइतिवीर्यवान्। ने
त्युवाचमहर्षिस्तंममैतइतिदारकाः। शूद्रयोनौमयाहीमेजाताःकाक्षीवदादयः। अंधंवृद्धंचमांदृष्ट्वासुदे २६५
ष्णामहिषीतव। अवमन्यददौमूढाशूद्रांधात्रेयिकांमम। ततःप्रसादयामासपुनस्तमृषिसत्तमं। वलिसु
देष्णांस्वांभार्यांतस्मैसप्राहिणोत्पुनः। तांसदीर्घतमांगेषुस्पृष्ट्वादेवीमथाब्रवीत्। भविष्यंतिकुमारास्ते

नेजसादित्यवर्चसः।अंगोवंगः कलिंगश्च पुंड्रः सुह्मश्च ते सुताः।तेषांदेशाः समाख्याताः स्वनामकथिता
भुवि।अंगस्यांगोभवद्देशो वंगोवंगस्यचस्मृतः।कलिंगविषयश्चैव कलिंगस्यचसंस्मृतः।पुंड्रस्यपुंड्राः
प्रख्याताः सुह्माः सुह्मस्यचस्मृताः।एवंवलेः पुरावंशः प्रख्यातोवैमहर्षिभिः।एवमन्येमहेष्वासा ब्राह्म
णैः क्षत्रियाभुवि।जाताः परमधर्मज्ञावीर्यवंतोमहावलाः।एतच्छ्रुत्वात्वमप्यत्रमातः कुरुयथेप्सितं ॥
इत्यादिपर्वणि ९८ भीष्मउ पुनर्भरतवंशस्य हेतुंसंतानवृद्धयेवक्ष्यामिनियतं मातस्तन्मे
निगदतः शृणु।ब्राह्मणोगुणवान्कश्चिद्धनेनोपनिमंत्र्यतां।विचित्रवीर्यक्षेत्रेषुयः समुत्पादयेत्प्रजाः ॥
वैशं ॥ततः सत्यवतीभीष्मंवाचासंसज्जमानया।विहसंतीवसव्रीडमिदंवचनमब्रवीत्।सत्यमेत
न्महावाहोयथावदसिभारत।विश्वासात्तेप्रवक्ष्यामिसंतानायकुलस्यनः।नतेशक्यमनाख्यातुमापद्ध
र्मतथाविधं।त्वमेवनः कुलेधर्मस्त्वंसत्यंत्वंपरागतिः।तस्मान्निशम्यवाक्यंमेकुरुष्वयदनंतरं।शृणुभी
ष्मवचोमह्यंधर्मार्थसहितंध्रुवं।नचविश्रंभकथितंभवाञ्छोचितुमर्हसि।यस्तुराजावसुर्नामश्रुतस्ते
भरतर्षभ।तस्यशुक्रंधृतवतीमत्सीकुक्षौपुराकिल।मातरंमेजलाद्धृत्वादाशः परमधर्मवित्।मातुस्व

गृहमानीय दुहितृत्वे च विकल्पयत्। धर्मयुक्तस्य धर्मार्थं पितुरासीत्तरो मम। साकदाचिदहं तत्र गता प्रथ
मयौवने। अथ धर्मविदां श्रेष्ठः परमर्षिः पराशरः। आजगाम तरं धीमांस्तरिष्यन्यमुनां नदीं। स तार्य
माणो यमुनां मामुपेत्याब्रवीत्तदा। सांत्वपूर्वं मुनिश्रेष्ठः कामार्त्तो मधुरं वचः। तमहं शापभीता च पितु
र्भीता च भारत। वरैरसुलभैरुक्ता न प्रत्याख्यातुमुत्सहे। अभिभूय स मां बालां तेजसा वशमानयत्। तम
सा लोकमावृत्य नौगतामेव भारत। मत्स्यगंधो महानासीत्पुरा मम जुगुप्सितः। तमपास्य शुभं गंधमि
मं प्रादात्स मे मुनिः। ततो मामाह स मुनिर्गर्भमुत्सृज्य मामकं। द्वीपेस्या एव सरितः कन्यैव त्वं भविष्यसि।
पाराशर्यो महायोगी स बभूव महानृषिः। कन्यापुत्रो मम पुरा द्वैपायन इति श्रुतः। यो व्यस्य वेदांश्चतु
रो स्तपसा भगवानृषिः। लोके व्यासत्वमापेदे कार्ष्ण्यात्कृष्णत्वमेव च। सत्यवादी शमपरस्तपस्वी दग्ध १६६
किल्बिषः। स नियुक्तो मया व्यक्तं त्वया वाप्रतिमद्युतिः। भ्रातुः क्षेत्रेषु कल्याणमपत्यं जनयिष्यति। स हि
मामुक्तवांस्तत्र स्मरेः कृत्येषु मामिति। तं स्मरिष्ये महाबाहो यदि भीष्म त्वमिच्छसि। तव ह्यनुमते भीष्म
नियतं स महातपाः। विचित्रवीर्यक्षेत्रेषु पुत्रानुत्पादयिष्यति वैशं महर्षेः कीर्तने तस्य भी

ष्मः प्रांजलिरब्रवीत।धर्ममर्थंचकामंचत्रीनेतान्योनुपश्यति।अर्थमर्थानुबंधंचधर्मंधर्मानुबंधनं।का
मंकामानुबंधंचविपरीतान्पृथक्पृथक्।योविचिंत्यधियाधीरोव्यवस्यतिसबुद्धिमान्।तदिदंधर्मयुक्तं
चहितंचैवकुलस्यनः।उक्तंभवत्यायच्छ्रेयःपरमंरोचतेभृशं वैशं ततस्तस्मिन्प्रतिज्ञातेभीष्मे
णकुरुनंदन।कृष्णद्वैपायनंकालीचिंतयामासवैमुनिं।सवेदान्विब्रुवन्धीमान्मातुर्विज्ञायचिंतितं।प्रा
दुर्बभूवाविदितःक्षणेनकुरुनंदन।तस्मैपूजांततःकृत्वासुतायविधिपूर्वकं।परिष्वज्यचबाहुभ्यांप्रस्त्रवै
रभ्यषिंचत।मुमोचबाष्पंदाशेयीपुत्रंदृष्ट्वाचिरस्यतु।तामद्भिःपरिषिच्यार्त्तांमहर्षिरभिवाद्यच।मातरंपू
र्वजःपुत्रोव्यासोवचनमब्रवीत।भवत्यायदभिप्रेतंतदहंकर्तुमागतः।शाधिमांतत्वधर्मज्ञेकरवाणिप्रि
यंतव।तस्मैपूजांततोकार्षीत्पुरोधाःपरमर्षये।सचतांप्रतिजग्राहविधिवन्मंत्रपूर्वकं।तमासनगतंमा
तादृष्ट्वाकुशलमव्ययं।सत्यवत्यभिवीक्ष्यैनमुवाचेदमनंतरं।मातापित्रोःप्रजायंतेपुत्राःसाधारणाःक
वे।तेषांपितायथास्वामीतथामातानसंशयः।विधातृविहितःसत्वंयथामेप्रथमःसुतः।विचित्रवीर्यो
ब्रह्मर्षेतथामेवरजःसुतः।यथैवपितृतोभीष्मस्तथात्वमपिमातृतः।भ्राताविचित्रवीर्यस्ययथावापु

आ०प०
१६७

त्वमन्यसे। अयंशांतनवःसत्यंपालयन्सत्यविक्रमः। बुद्धिंनकुरुतेपत्येतथाराज्यानुशासने। सत्वंव्यपे
क्षयाभ्रातुःसंतानायकुलस्यच। भीष्मस्यचास्यवचनान्नियोगाच्चममानघ। अनुक्रोशाच्चभूतानांसर्वे
षांरक्षणायच। आनृशंस्याच्चयद्ब्रूयांतच्छ्रुत्वाकर्तुमर्हसि। यवीयसस्तवभ्रातुर्भार्येसुरसुतोपमे। रूपयौव
नसंपन्नेपुत्रकामेचधर्मतः। तयोरुत्पादयापत्यंसमर्थोह्यसिपुत्रक। अनुरूपंकुलस्यास्यसंतत्याःप्रसव
स्यच॥ व्यासउ ॥ वेत्थधर्मंसत्यवतिपरंचापरमेवच। तथातवमहाप्राज्ञेधर्मेप्रणिहितामतिः। तस्मा
दहंत्वन्नियोगाद्धर्ममुद्दिश्यकारणं। ईप्सितंतेकरिष्यामिदृष्टंह्येतत्सनातनं। भ्रातुःपुत्रान्प्रदास्यामिमित्रा
वरुणयोःसमान्। व्रतंचरेतांतेदेव्यौनिर्दिष्टमिहयन्मया। संवत्सरंयथान्यायंततःशुद्धेभविष्यतः। नहि
मामव्रतोपेताउपेयात्काचिदंगना॥ सत्यवत्यु ॥ सद्योयथाप्रपद्येतदेवीगर्भंतथाकुरु। अरा १६७
जकेषुराष्ट्रेषुप्रजानाथाविनश्यति। नश्यंतिचक्रियाःसर्वानास्तिवृष्टिर्नदेवता। कथंवाराजकंराष्ट्रंशक्यं
धारयितुंप्रभो। तस्माद्गर्भंसमाधत्स्वभीष्मःसंवर्द्धयिष्यति व्यासउ यदिपुत्रःप्रदातव्योमयाभ्रा
तुरकालिकः। विरूपतांमेसहतांतयोरेतत्परंव्रतं। यदिमेसहतेगंधंरूपंवेशंतथावपुः। अद्यैवगर्भंकौ

ग्रात्याविशिष्टंप्रतिपद्यतां वैशं एवमुक्त्वामहातेजाव्यासः सत्यवतींतदा।शयनेसाचकौशल्या
शुचिवस्त्राह्यलंकृता।समागमनमाकांक्षेन्निति सोंतर्हितोमुनिः।ततोभिगम्यासादेवीस्नुषांरहसिसंगतां
।धर्म्यमर्थसमायुक्तमुवाचवचनंहितं।कौशल्येधर्मतंत्रंत्वांयद्ब्रवीमिनिबोधतत्।भरतानांसमुच्छेदोव्य
क्तंमद्भाग्यसंक्षयात्।व्यथितांमांचसंप्रेक्ष्यपितृवंशंचपीडितं।भीष्मोबुद्धिमदान्मह्यंकुलस्यास्यविवृद्धये।
साचबुद्धिस्त्वय्यधीनापुत्रिप्रापयमांतथा।नष्टंचभारतंवंशंपुनरेवसमुद्धर।पुत्रंजनयसुश्रोणिदेवराजसमप्र
भं।सहिराज्यधुरंगुर्वीमुद्वक्ष्यतिकुलस्यनः।साधर्मतोनुनीयैनांकथंचिद्धर्मचारिणीं।भोजयामासविप्रांश्चदे
वर्षीनतिथींस्तदा इत्यादिपर्वणि ९९ वैशं ततःसत्यवतीकालेवधूंस्नातामृतौतदा।
संवेशयंतीशयनेशनैर्वचनमब्रवीत्।कौशल्येदेवरस्तेस्तिसोद्यत्वानुप्रवेक्ष्यति।अप्रमत्ताप्रतीक्षैनंनि
शीथेह्यागमिष्यति।श्वश्र्वास्तद्वचनंश्रुत्वाशयानाशयनेशुभे।साचिंतयत्तदाभीष्ममन्यांश्चकुरुपुंगवा
न्।ततोम्बिकायांप्रथमंनियुक्तःसत्यवागृषिः।दीप्यमानेषुदीपेषुशरणंप्रविवेशह।तस्यकृष्णस्यकपि
लांजटांदीप्तेचलोचने।बभ्रूणिचैवश्मश्रूणिदृष्ट्वादेवीन्यमीलयत्।संबभूवतयासार्द्धंमातुःप्रियचिकीर्ष

आ०प०
१६८

या। भयात्काशिसुता तं तु नाशक्नोदभिवीक्षितुं। ततो निष्क्रांतमागम्य माता पुत्रमुवाच ह। अप्यस्यां गुणवा
न्पुत्र राजपुत्रो भविष्यति। निशम्य तद्वचो मातुर्व्यासः सत्यवतीसुतः। प्रोवाचानीद्रियज्ञानो विधिनासंप्र
चोदितः। नागायुतसमप्राणो विद्वान्राजर्षिसत्तमः। महाभागो महावीर्यो महाबुद्धिर्भविष्यति। तस्य चा
पि शतं पुत्रा भविष्यंति महात्मनः। किंतु मातुः स वैगुण्यादंध एव भविष्यति। तस्य तद्वचनं श्रुत्वा माता
पुत्रमथाब्रवीत्। नांधः कुरूणां नृपतिरनुरूपस्तपोधन। ज्ञातिवंशस्य गोप्तारं पितॄणां वंशवर्द्धनं। द्वि
तीयं कुरुवंशस्य राजानं दातुमर्हसि। स तथेति प्रतिज्ञाय निश्चक्राम महायशाः। सापि कालेन कौशल्या
सुषुवेंधं तमात्मजं। पुनरेव तु सा देवी परिभाष्य स्नुषां ततः। ऋषिमावाहयत्सत्या यथापूर्वमरिंदम।
ततस्तेनैव विधिना महर्षिस्तामपद्यत। अंबालिकामथाभ्यागादृषिं दृष्ट्वा च सापि तं। विवर्णा पांडुसं १६८
काशा समपद्यत भारत। तां भीतां पांडुसंकाशां विषण्णां प्रेक्ष्य भारत। व्यासः सत्यवतीपुत्र इदं वचनम
ब्रवीत्। यस्मात्पांडुत्वमापन्ना विरूपं प्रेक्ष्य मामिह। तस्मादेष सुतस्ते वै पांडुरेव भविष्यति। नाम चास्यैत
देवेह भविष्यति शुभानने। इत्युक्त्वा स निराक्रामद्भगवानृषिसत्तमः। ततो निष्क्रांतमालोक्य सत्या पु

त्रमथाब्रवीत्। शशंस स पुनर्मात्रे तस्य बालस्य पांडुतां। तं माता पुनरेवान्यमेकं पुत्रमयाचत। तथेति
च महर्षिस्तां मातरं प्रत्यभाषत। ततः कुमारं सा देवी प्राप्तकालमजीजनत्। पांडुलक्षणसंपन्नं दीप्य
मानमिव श्रिया। यस्य पुत्रा महेष्वासा जज्ञिरे पंच पांडवाः। ऋतुकाले ततो ज्येष्ठां वधूं तस्मै न्ययोजयत्
। सा तु रूपं च गंधं च महर्षेः प्रविचिंत्य तं। नाकरोद्वचनं देव्या भयात्सुरसुतोपमा। ततः स्वैर्भूषणैर्दासीं
भूषयित्वाप्सरोपमां। प्रेषयामास कृष्णाय ततः काशिपतेः सुता। सा तं ऋषिमनुप्राप्तं प्रत्युद्गम्याभि
वाद्य च। संविवेशाभ्यनुज्ञाता सत्कृत्योपचचार ह। कामोपभोगेन रहस्तस्यां तुष्टिमगादृषिः। तयास
हाषितो राजन्महर्षिः शंसितव्रतः। उत्तिष्ठन्नब्रवीदेनामभुजिष्या भविष्यसि। अयं च ते शुभे गर्भः श्रे
यानुदरमागतः। धर्मात्मा भविता लोके सर्वबुद्धिमतां वरः। स जज्ञे विदुरो नाम कृष्णद्वैपायनात्मजः।
धृतराष्ट्रस्य वै भ्राता पांडोश्चैव महात्मनः। धर्मो विदुररूपेण शापात्तस्य महात्मनः। मांडव्यस्यार्थतत्त्वज्ञः
कामक्रोधविवर्जितः। कृष्णद्वैपायनोप्येतत्तस्यै सर्वं न्यवेदयत्। प्रलंभमात्मनश्चैव शूद्रायाः पुत्रज
न्म च। स धर्मस्यानृणो भूत्वा पुनर्मात्रा समेत्य ह। तस्यै गर्भं समावेद्य तत्रैवांतरधीयत। एते विचित्रवीर्य

श्री०प० स्यक्षेत्रे द्वैपायनादपि। जज्ञिरे देवगर्भाभाः कुरुवंशविवर्द्धनाः इत्यादिपर्वणि विचित्रवीर्यसुतो
१६९ त्पत्तिः १०० जनमेजय उ किं कृतं कर्म धर्मेण येन शापमुपेयिवान्। कस्य शापाच्च ब्रह्म
र्षेः शूद्रयोनावजायत वैशं बभूव ब्राह्मणः कश्चिन्माण्डव्य इति विश्रुतः। धृतिमान्सर्वधर्मज्ञः
सत्ये तपसि च स्थितः। स आश्रमपदद्वारि वृक्षमूले महातपाः। ऊर्द्ध्वबाहुर्महायोगी तस्थौ मौनव्रता
न्वितः। तस्य कालेन महता तस्मिंस्तपसि वर्त्तत ८। तमाश्रममनुप्राप्ता दस्यवो लोप्त्रहारिणः। अनु
ष्यमाणा बहुभिः रक्षिभिर्भरतर्षभ। ते तस्यावशथे लोप्त्रं दस्यवः कुरुसत्तम। निधाय च भयाल्लीना
स्तत्रैवानागते बले। तेषु लीनेष्वथो शीघ्रं ततस्तद्रक्षिणां बलं। आजगाम ततोपश्यंस्तमृषिं तस्करा
नुगाः। तमपृच्छंस्ततो राजंस्तथावृत्तं तपोधनं। कतमेन यथा जातो दस्यवो द्विजसत्तम। तेन ग १६९
च्छामहे ब्रह्मन्यथा शीघ्रतरं वयं। तथा तु रक्षिणां तेषां ब्रुवतां स तपोधनः। न किंचिद्वचनं राजन्नब्रवी
त्साध्वसाधु वा। ततस्ते राजपुरुषा विचिन्वानास्तमाश्रमं। ददृशुस्तत्र लीनांस्तांश्चौरांस्तद्द्रव्यमेव च।
ततः शंका समभवद्रक्षिणां तं मुनिं प्रति। संयम्यैनं ततो राज्ञे दस्यूंश्चैव न्यवेदयन्। तं राजा सह तैश्चौ

रैरन्वेषणाद्ध्यतामिति। स रक्षिभिस्तैरज्ञातः शूले प्रोतो महातपाः। ततस्ते शूलमारोप्य तं मुनिं रक्षि
णस्तदा। प्रतिजग्मुर्महीपालं धनान्यादाय तान्यथ। शूलस्थः स तु धर्मात्मा कालेन महता ततः। नि
राहारोपि विप्रर्षिर्मरणं नाभ्यपद्यत। धारयामास च प्राणानृषींश्च समुपानयत्। शूलाग्रे तप्यमाने
न तपस्तेन महात्मना। संतापं परमं जग्मुर्मुनयस्तपसान्विताः। ते रात्रौ शकुना भूत्वा सन्निपत्य तु भार
त। दर्शयंतो यथाशक्ति तमपृच्छन् द्विजोत्तमं। श्रोतुमिच्छामहे ब्रह्मन् किं पापं कृतवानसि। येनेह समनु
प्राप्तं शूले दुःखभयं महत्   इत्यादिपर्वणि   २१   वैशं   ततः स मुनिशार्दूलस्तानुवा
च तपोधनान्। दोषतः कं गमिष्यामि नहि मेऽन्योपराध्यति। तं दृष्ट्वा रक्षिणस्तत्र तथा बहुतिथेऽहनि
न्यवेदयंस्तथा राज्ञे यथावृत्तं नराधिप। राजा च तमृषिं श्रुत्वा निष्क्रम्य सह मंत्रिभिः। प्रसादयामास
तदा शूलस्थमृषिसत्तमं॥   राजोवाच   ॥यन्मयापकृतं मोहादज्ञानादृषिसत्तम। प्रसादये त्वां त
त्राहं न मे त्वं क्रोद्धुमर्हसि। एवमुक्तस्ततो राज्ञा प्रसादमकरोन्मुनिः। कृतप्रसादं राजानं ततः समवतारय
त्। अवतार्य च शूलाग्रात्तच्छूलं निश्चकर्ष ह। अशक्नुवंश्च निष्क्रष्टुं शूलं शूले स चिच्छिदे। स तथांतर्गते

आ०प०
१७० नैवमूलेनव्यचरन्मुनिः। तेनातितपसा लोकान्विजिग्ये दुर्लभान्परैः॥ अणीमांडव्य इति च नततो लोकेषु गीय
यते। सगत्वासदनं विप्रो धर्मस्य परमात्मवित्। आसनस्थं ततो धर्मं दृष्ट्वोपालभत प्रभुः। किन्नु तद्दुष्कृतं
कर्म मया कृतमजानता। यस्येयं फलनिर्वृत्तिरीदृश्यासादिता मया। शीघ्रमाचक्ष्व मे तत्त्वं पश्य मे तपसो
बलं धर्म उवाच पतंगिकानां पुच्छेषु त्वयेषीका प्रवेशिता। कर्मणस्तस्य ते प्राप्तं फलमेतत्तपोध
न अणीमांडव्य उवाच अल्पेपराधे पि महान्मम दंडस्त्वया धृतः। शूद्रयोनावतो धर्म मानुषः सं
भविष्यसि। मर्यादां स्थापयाम्यद्य लोके कर्मफलोदयां। आचतुर्दशकाद्वर्षान्न भविष्यति पातकं। पर
तः कुर्वतामेव दोष एव भविष्यति वैशं एतेनत्वपराधेन शापात्तस्य महात्मनः। धर्मो विदुररूपे
ण शूद्रयोनावजायत। धर्मे चार्थे च कुशलो लोभक्रोधविवर्जितः। दीर्घदर्शी शमपरः कुरूणां वहितेरतः १७०
॥ इत्यादिपर्वण्यणीमांडव्योपाख्यानम् १२ वैशं तेषु त्रिषु कुमारेषु जातेषु कुरुजां
गलं। कुरवोथ कुरुक्षेत्रं त्रयमेतदवर्द्धत। ऊर्द्ध्वशस्याभवद्भूमिः सस्यानि रसवंति च। यथर्तु वर्षी पर्ज्जन्यो
बहुपुष्पफला द्रुमाः। वाहनानि प्रहृष्टानि मुदिता मृगपक्षिणः। गंधवंति च माल्यानि रसवंति फला

निचावणिग्भिश्चाप्यवकीर्यत्तनगराण्पथ्यक्रीशिल्पिभिः। श्रूराश्चकृतविद्याश्च संतश्च सुखिनोभवन्नानाभव
न्दस्यवः केचिन्नाधर्मरुचयोजनाः। प्रदेशेष्वपिराष्ट्राणांकृतंयुगमवर्त्तत। धर्मक्रियायज्ञशीलाः स
त्यव्रतपरायणाः। अन्योन्यप्रीतिसंयुक्ताः व्यवर्द्धतप्रजास्तदा। मानक्रोधविहीनाश्च नरालोभविवर्ज्जि
ताः। अन्योन्यमभ्यनंदंत धर्मोत्तरमवर्त्तत। तन्महोदधिवत्पूर्णं नगरं वै व्यरोचत। द्वारतोरणनिर्यूहैः यु
क्तमभ्रचयोपमैः। प्रासादशतसंबाधं महेंद्रपुरसन्निभं। नदीषु वनखंडेषु वापीपल्वलसानुषु। कानने
षु च रम्येषु विजह्रुर्मुदिताजनाः। उत्तरैः कुरुभिः सार्द्धं दक्षिणाः कुरवस्तथा। विस्पर्द्धमाना व्यचरंस्तथा अ६
देवर्षिचारणैः। नाभवत्कृपणः कश्चिन्नाभवन्विधवाः स्त्रियः। तस्मिन्जनपदे रम्ये कुरुभिर्बहुलीकृते। कू
पारामसभावाप्यो ब्राह्मणावसथास्तदा। बभूवुः सर्वर्द्धियुतास्तस्मिन्राष्ट्रे सदोत्सवाः। भीष्मेण धर्मतो रा
जन्सर्वतः परिरक्षिते। बभूव रमणीयश्च चैत्ययूपशतांकितः। स देशः परराष्ट्राणि विमृज्याभिप्रवर्द्धितः
। भीष्मेण विहितं राष्ट्रे धर्मचक्रमवर्त्तत। क्रियमाणेषु कृत्येषु कुमाराणां महात्मनां। पौरजानपदाः सर्वे
बभूवुः परमोत्सुकाः। गृहेषु कुरुमुख्यानां पौराणां च नराधिप। दीयतां भुज्यतां चेति वाचोश्रूयंत सर्वशः।

आ०प०
१७१

धृतराष्ट्रश्चपाण्डुश्चविदुरश्चमहामतिः।जन्मप्रभृतिभीष्मेणपुत्रवत्परिपालिताः।संस्कारैःसंस्कृता
स्तेतुव्रताध्ययनसंयुताः।श्रमव्यायामकुशलाःसमपद्यंतयौवनं।धनुर्वेदेचवेदेचगदायुद्धेसिचर्म्मि
णि।तथैवगजशिक्षायांनीतिशास्त्रेचपारगाः।इतिहासपुराणेषुनानाशिक्षासुबोधिताः।वेदवेदां
गतत्वज्ञाःसर्वत्रकृतनिश्चयाः।पांडुर्धनुषिविक्रांतोनरेष्वभ्यधिकोभवत्।अन्येभ्योवलवानासीद्धृत
राष्ट्रोमहीपतिः।त्रिषुलोकेषुनत्वासीत्कश्चिद्विदुरसम्मितः।धर्मनित्यस्तथाराजंधर्मेचपरमंगतः।प्र
नष्टंशांतनोर्वंशंसमीक्ष्यपुनरुद्धृतं।ततोनिर्वचनंलोकेसर्वराष्ट्रेष्ववर्त्तत।वीरसूनांकाशिसुतेदेशा
नांकुरुजांगलं।सर्वधर्मविदांभीष्मःपुराणांगजसाह्वयं।धृतराष्ट्रस्त्वचक्षुष्ट्वाद्राज्यंनप्रत्यपद्यत।पार
सवत्वाद्विदुरोराजापांडुर्वभूवह।कदाचिदथगांगेयःसर्वनीतिमतांवरः।विदुरंधर्मतत्त्वज्ञंवाक्यमा १७१
हयथोचितम्	इत्यादिपर्वणि	१०२	भीष्मउवाच	गुणैःसमुदितंसम्यगिदंनःप्रथितंकु
लं।अत्यन्यान्पृथिवीपालान्पृथिव्यामधिराज्यभाक्।रक्षितंराजभिःपूर्वंधर्मविद्भिर्महात्मभिः।नोच्छेद
मगमच्चेदंकदाचिदिहनःकुलं।मयाचसत्यवत्याचकृष्णेनचमहात्मना।समवस्थापितंभूयोयुष्मासुकु

लतंतुष्ठुानस्त्रैतद्वर्द्धतेभूयःकुलंसागरवद्यथा। तथामयाविधातव्यंत्वयाचैवनसंशयः॥ श्रूयतेयादवी
कन्यास्वनुरूपाकुलस्यनः॥ सुवलस्यात्मजाचैवतथामद्रेश्वरस्यच। कुलीनारूपवत्यश्चताःकन्याःपुत्र
सर्वशः॥ उचिताश्चैवसंवंधेतेस्माकंक्षत्रियर्षभाः। मन्येवरयितव्यास्ताइत्यहंधीमतांवर। संतानार्थंकु
लस्यास्ययद्वाविदुरमन्यसे विदुरउ भवान्पिताभवान्माताभवान्नःपरमोगुरुः। तस्मात्स्व
यंकुलस्यास्यविचार्यकुरुयद्धितं वैशंप अथशुश्रावविप्रेभ्योगांधारीसुवलात्मजा। आरा
ध्यवरदंदेवंभगनेत्रहरंहरं। गांधारीकिलपुत्राणांशतंलेभेवरंशुभं। इतिशुश्रावतत्वेनभीष्मःकुरु
पितामहः। ततोगांधारराजस्यप्रेषयामासभारत। अचक्षुरितितत्रासीत्सुवलस्यविचारणा। कुलंख्या
तिंचवृत्तंचवुध्यातुप्रसमीक्ष्यसः। ददौतांधृतराष्ट्रायगांधारींधर्मचारिणीं। गांधारीत्वथशुश्रावधृत
राष्ट्रमचक्षुषं। आत्मानंदित्सितंचास्मैपित्रामात्राचभारत। ततःसापटमादायकृत्वावहुगुणंतदा। ववं
धनेत्रेस्वेराजन्पतिव्रतपरायणा। नाभ्यसूयांपतिमहमित्येवंकृतनिश्चया। ततोगांधारराजस्यपुत्रःश
कुनिरभ्ययात्। स्वसारंवयसालक्ष्म्यायुक्तामादायकौरवान्। तांतदाधृतराष्ट्रायददौपरमसत्कृतां॥

आ०प०
१७२

भीष्मस्यानुमतेचैवविवाहंसमकारयत्।दत्वासभगिनींवीरोयथार्हंचपरिछदं।पुनरायात्स्वनगरं
भीष्मेणप्रतिपूजितः।गांधार्य्यपिवरारोहाशीलाचारविचेष्टितैः।तुष्टिंकुरूणांसर्वेषांजनयामासभा
रत।वृत्तेनाराधयतान्सर्वान्गुरून्पतिपरायणा।वाचापिपुरुषानन्यान्सुव्रतानान्वकीर्तयत् वैशं
॥ शूरोनामयदुश्रेष्ठोवसुदेवपिताभवत्।तस्यकन्यापृथानामरूपेणाप्रतिमाभुवि।पितृष्वस्री
यायसतामनपत्यायभारत।अग्र्यामग्रेप्रतिज्ञायस्वस्यापत्यस्यसत्यवाक्।अग्रजामथतांकन्यां
शूरोनुग्रहकांक्षिणे।प्रददौकुंतिभोजायसखासख्येमहात्मने।नियुक्तासापितुर्गेहेब्राह्मणातिथि
पूजने।उग्रंपर्यचरत्तत्रब्राह्मणंशंसितव्रतं।निगूढनिश्चयंधर्मेयंतंदुर्वाससंविदुः।तमुग्रंशंसितात्मा
नंसर्वयत्नैरतोषयत्।तस्यैसप्रददौमंत्रमापद्धर्मान्ववेक्षया।अभिचाराभिसंयुक्तमब्रवीच्चैवतांमुनिः। १७२
यंयंदेवंत्वमेतेनमंत्रेणावाहयिष्यसि।तस्यतस्यप्रभावेनतवपुत्रोभविष्यति।तथोक्तासातुपुत्रेणकुं वि
तीकौतूहलान्विता।कन्यासतीदेवमर्कमाजुहावयशस्विनी।साददर्शतमायांतंभास्करंलोकभाव
नं।विस्मिताचानवद्यांगीदृष्ट्वातन्महदद्भुतं।तांसमासाद्यदेवस्तुविवस्वानिदमब्रवीत्।अयमस्म्यसि

तापांगीब्रूहिकिंकरवाणिते कुंत्युवाच कश्चिन्मेब्राह्मणःप्रादाद्वरंविद्यांचशत्रुहन्तद्वि
जिज्ञासयाह्वानंकृतवत्यस्मितेविभो।एतस्मिन्नपराधेत्वांशिरसाहंप्रसादये।योषितोहिसदारक्ष्याः
स्वपराद्धापिनित्यशः सूर्यउ० वेदाहंसर्वमेवैतद्यद्दुर्वासावरंददौ।संत्यज्यभयमेवेहक्रिय
तांसंगमोमम।अमोघंदर्शनंमह्यमाहूतश्चास्मितेशुभे।वृथाह्वानेपितेभीरुदोषःस्यान्नात्रसंशयः
॥ वैशं ॥एवमुक्ताबहुविधंसांत्वपूर्वंविवस्वता।सातुनैच्छद्वरारोहाकन्याहमितिभारत।बं
धुपक्षभयाद्भीतालज्जयाचयशस्विनी।तामर्कःपुनरेवेदमब्रवीद्भरतर्षभ।मत्प्रसादान्नतेराज्ञि
भवितादोषइत्युत।एवमुक्त्वासभगवान्कुंतिराजसुतांतदा।प्रकाशकर्त्तातपनःसंबभूवतयास
ह।तत्रवीरःसमभवत्सर्वशस्त्रभृतांवरः।आमुक्तकवचःश्रीमान्देवगर्भःश्रियावृतः।सहजंकवचंबि
भ्रत्कुंडलोद्योतिताननः।अजायतसुतःकर्णःसर्वलोकेषुविश्रुतः।प्रादाच्चतस्यैकन्यात्वंपुनःसपर
मद्युतिः।दत्वाचतपतांश्रेष्ठोदिवमाचक्रमेततः।दृष्ट्वाकुमारंजातंसावार्ष्णेयीदीनमानसा।एकाग्राचिं
तयामासकिंकृत्वासुकृतंभवेत्।गूहमानापचारंसाबंधुपक्षभयात्तदा।उत्ससर्ज्जकुमारंतंजलेकुं

तीमहावलं।तमुत्सृष्टंजलेगर्भंराधाभर्त्तामहायशाः।पुत्रत्वेकल्पयामाससभार्यःसूतनंदनः।नामधेयं
चचक्रातेतस्यवालस्यतावुभौ।वसुनासहजातोयंवसुषेणोभवत्विति।सवर्द्धमानोवलवान्सर्वास्त्रेषू
द्यतोभवत्।आपृष्टतापादादित्यमुपातिष्ठतवीर्यवान्।तस्मिन्कालेजपतस्तस्यवीरस्यधीमतः।नादे
यंब्राह्मणेष्वासीत्किंचिद्वसुमहीतले।तमिंद्रोब्राह्मणोभूत्वाभिक्षार्थीसमुपागमत्।कवचंप्रार्थयामास
फाल्गुनस्यहितेरतः।स्वशरीरात्समुत्कृत्यकवचंस्वनिसर्गजं।विप्ररूपायशक्रायददौकर्णःकृतांजलिः।
प्रतिगृह्यतुदेवेशस्तुष्टस्तेनास्यकर्मणा।ददौशक्तिंसुरपतिर्वाक्यंचेदमुवाचह।देवासुरमनुष्याणांगंध
र्वोरगरक्षसां।यमेकंजेतुमिच्छेथाःसोनयानभविष्यति।प्राङ्नामतस्यकथितंवसुषेणइतिक्षितौ।कर्ण्णो
वैकर्त्तनस्तेनकर्मणाचैवसोभवत्॥ इत्यादिपर्वणिसंभवे १४ वैशं सत्वरूपगुणोपेता १७२
धर्मारामामहाव्रता।दुहिताकुंतिभोजस्यपृथापृथुललोचना।तांतुतेजस्विनींकन्यांरूपयौवनशालिनीं
।व्यावृण्वन्पार्थिवाःकेचिदतीवस्त्रीगुणैर्युतां।ततःसाकुंतिभोजेनराज्ञाहूयनराधिपान्।पित्रास्वयंवरेद
त्तादुहितराजसत्तमा।ततःसारंगमध्यस्थंतेषांराज्ञांमनस्विनी।ददर्शराजशार्दूलंपांडुंभरतसत्तमं।

सिंहदर्प्पमहोरस्कंवृषभाक्षंमहाबलं।आदित्यमिवसर्वेषांराज्ञांप्रच्छाद्यवैप्रभाः।तिष्टंतंराजसमितौपुरं
दरमिवापरं।तांदृष्ट्वासानवद्यांगीकुंतिभोजसुताशुभा।पांडुंनरवरंरंगेहृदयेनाकुलाभवत्।ततःकाम
परीतांगीसकृत्प्रचलमानसा।व्रीडमानास्रजंकुंतीराज्ञःस्कन्धेसमासजत्।तंनिशम्यवृतंपांडुंकुंत्यास
र्वेनराधिपाः।यथागतंसमाजग्मुर्गजैरश्वैरथैस्तथा।ततस्तस्याःपिताराजन्विवाहमकरोत्प्रभुः।सतया
कुंतिभोजस्यदुहित्राकुरुनंदनः।युयुजेमितसौभाग्यःपौलोम्यामघवानिव।कुंत्याःपांडोश्चराजेंद्रकुंति
भोजोमहीपतिः।कृत्वोद्वाहंतदातंतुनानावसुभिरर्चितं।स्वपुरंप्रेषयामाससराजाकुरुसत्तमं।ततोब
लेनमहतानानाध्वजपताकिना।स्तूयमानःसचाशीर्भिर्ब्राह्मणैश्चमहर्षिभिः।संप्राप्यनगरंराजापांडुःकौ
रवनंदनः।न्यवेशयततांभार्यांकुंतींस्वभवनेप्रभुः इत्यादिपर्वणिकुंतीविवाहे १०५ वैशं
॥ ततःशांतनवोभीष्मोराज्ञःपाण्डोर्यशस्विनः।विवाहस्यापरस्यार्थेचकारमतिमान्मतिं।सोमात्यैःस्थ
विरैःसार्द्धंब्राह्मणैश्चमहर्षिभिः।बलेनचतुरंगेणययौमद्रपतेःपुरं।तमागतमभिश्रुत्यभीष्मंवाह्लीकपुं
गवः।प्रत्युद्गम्यार्चयित्वाचपुरंप्रावेशयन्नृपः।दत्वातस्यासनंशुभ्रंपाद्यमर्घंतथैवच।मधुपर्कंचमद्रेशः

आ॰प॰
१७४

पञ्चस्थागमनेर्थितां।तांभीष्मःप्रत्युवाचेदंमद्रराजंकुरूद्वहः॥आगतंमांविजानीहिकन्यार्थिनमरिंदम।
श्रूयतेभवतःसाध्वीस्वसामाद्रीयशस्विनी।तामहंवरयिष्यामिपांडोरर्थेयशस्विनीं।युक्तरूपोहिसंबंधे
त्वंनोराजन्वयंतव।एतत्संचिंत्यमद्रेशगृहाणास्मान्यथाविधि।तमेवंवादिनंभीष्मंप्रत्यभाषतमद्रपः।
नहिमेन्योवरस्त्वत्तःश्रेयानितिमतिर्मम।पूर्वैःप्रवर्त्तितंकिंचित्कुलेस्मिन्नृपसत्तमैः।साधुवायदिवासाधुत
न्नातिक्रांतुमुत्सहे।व्यक्तंतद्भवतश्चापिविदितंनात्रसंशयः।नचयुक्तंतथावक्तुंभवान्देहीतिसत्तम।कुलध
र्मःसनोवीरप्रमाणंपरमंचनः।तेनत्वांनब्रवीम्येतदसंदिग्धंवचोरिहन्।तंभीष्मःप्रत्युवाचेदंमद्रराजंजना
धिपः॥धर्मएषपरोराजन्स्वयमुक्तःस्वयंभुवा।नात्रकश्चनदोषोस्तिपूर्वैर्विधिरयंकृतः।विदितेयंचतेश
ल्यमर्यादासाधुसम्मता।इत्युक्त्वासमहातेजाःशातकुंभंकृताकृतं।रत्नानिचविचित्राणिशल्यायादात्स १७४
हस्रशः।गजानश्वान्रथांश्चैववासांस्याभरणानिच।मणिमुक्ताप्रवालंचगांगेयोव्यसृजच्छुभं।तत्प्रगृह्य
धनंसर्वंशल्यःसंप्रीतमानसः।ददौतांसमलंकृत्यस्वसारंकौरवर्षभे।सतांमाद्रीमुपादायभीष्मःसागर
गासुतः।आजगामपुरंधीमान्प्रविष्टोगजसाह्वयं।ततइष्टेहनिप्राप्तेमुहूर्त्तेसाधुसम्मते।जग्राहविधिव

त्पाणिंमाद्र्याः पांडुर्नराधिपः।ततोविवाहेनिर्वृत्तेसराजाकुरुनंदनः।स्थापयामासतांभार्यांशुभेवेश्मनि
भामिनीं।सताभ्यांव्यचरत्सार्द्धंभार्याभ्यांराजसत्तमः।कुंत्यामाद्र्याचराजेंद्रोयथाकामंयथासुखं।ततःस
कौरवोराजाविहृत्यत्रिदशानिशाः।जिगीषयामहींपांडुर्निश्चक्रामपुरात्प्रभो।सभीष्मप्रमुखान्वृद्धानभि
वाद्यप्रणम्यच।धृतराष्ट्रंचकौरव्यंतथान्यान्कुरुसत्तमान्।आमंत्र्यप्रययौराजातैश्चैवाभ्यनुमोदितः।मं
गलाचारयुक्ताभिराशीर्भिरभिनंदितः।गजवाजिरथौघेनवलेनमहताऽगमत्।सराजादेवगर्भाभोवि
जिगीषुर्वसुंधरां।हृष्टपुष्टवलैःप्रायात्पांडुःशत्रूननेकशः।पूर्वमागस्कृतोगत्वादशार्णाःसमरेजिताः।
पांडुनानरसिंहेनकौरवाणांयशोभृताः। ततःसेनामुपादायपांडुर्नानाविधध्वजां।प्रभूतहस्त्यश्वयुतां
पदातिरथसंकुलां।आगस्कारीमहीपानांवहूनांवलदर्पितः।गोप्तामगधराष्ट्रस्यदार्वोराजगृहेहतः।
ततःकोशंसमादायवाहनानिचभूरिशः।पांडुनामिथिलांगत्वाविदेहाःसमरेजिताः।तथाकाशिषुसुह्मे
षुपुंड्रेषुचनरर्षभः।स्ववाहुवलवीर्येणकुरूणामकरोद्यशः।तंशरौघमहाज्वालंशस्त्रार्चिषमरिंदमं।
पांडुपावकमासाद्यव्यदह्यंतनराधिपाः।तेससेनाससेनेनविध्वंसितवलान्नृपाः।पांडुनावशगाःकृत्वाकु

आ०प० रुकर्मसुयोजिताः।तेनतेनिर्जिताःसर्वेपृथिव्यांसर्वपार्थिवाः।तमेकंमेनिरेशूरंदेवेष्विवपुरंदरं।तंकृतांज
२७५ लयःसर्वेप्रणतावसुधाधिपाः।उपाजग्मुर्धनंगृह्यरत्नानिविविधानिच।मणिमुक्ताप्रवालंचसुवर्णंरज
तंबहु।गोरत्नान्यश्वरत्नानिरथरत्नानिकुंजरान्।खरोष्ट्रमहिषांश्चैवयच्चकिंचिदजाविकं।कंबलाजिनर
त्नानिरांकवास्तरणानिच।तत्सर्वंप्रतिजग्राहराजानागपुराधिपः।तदादायययौपांडुःपुनर्मुदितवाहनः।
हर्षयिष्यन्स्वराष्ट्राणिपुरंचगजसाह्वयं।शांतनोराजसिंहस्यभरतस्यचधीमतः।प्रनष्टःकीर्तिजःशब्दः
पांडुनापुनराहृतः।येपुराकुरुराष्ट्राणिजह्रुःकुरुधनानिच।तेनागपुरसिंहेनपांडुनाकरदीकृताः।इत्यभा
षंतराजानोराजामात्याश्चसंगताः।प्रतीतमनसोहृष्टाःपौरजानपदैःसह।प्रत्युद्ययुस्तंप्राप्तंसर्वेभी
ष्मपुरोगमाः।तेनदूरमिवाध्वानंगत्वानागपुरालयात्।आवृतंददृशुर्हृष्टाःलोकंबहुविधैर्जनैः।नाना २७५
यानसमानीतैरत्नैरुच्चावचैस्तदा।हस्त्यश्वरथपत्तैश्चगोभिरुष्ट्रैस्तथाविभिः।नांतंददृशुरासाद्यभीष्मे
णसहकौरवाः।सोभिवाद्यपितुःपादौकौशल्यानंदिवर्द्धनः।यथार्हंमानयामासपौरजानपदानपि।प्र
मृद्यपरराष्ट्राणिकृतार्थंपुनरागतं।पुत्रमासाद्यभीष्मस्तुहर्षादश्रूण्यवर्त्तयत्।सतूर्यशतशंखानांभेरी

णांचतथास्वनैः।हर्षयन्सर्वशःपौरान्विवेशगजसाह्वयम् इत्यादिपर्वणिसंभवे ९६ ॥
वैशम् धृतराष्ट्राभ्यनुज्ञातःस्वबाहुविजितंधनं।भीष्मायसत्यवत्यैचमात्रेचोपजहारसः।विदुरा
यचवैपांडुःप्रेषयामासतद्धनं।सुहृदश्चापिधर्मात्माधनेनसमतर्पयत्।ततःसत्यवतींभीष्मंकौशल्यां
चयशस्विनीं।शुभैःपांडुजितैरत्नैस्तोषयामासभारत।ननंदमाताकौशल्यातमप्रतिमतेजसं।जयंतमि
वपौलोमीपरिष्वज्यनरर्षभं।तस्यवीरस्यविक्रांतैःसहस्रशतदक्षिणैः।अश्वमेधशतैरीजेधृतराष्ट्रोम
हामखैः।संप्रयुक्तस्तुकुंत्याचमाद्र्याचभरतर्षभ।जिततंद्रीस्तदापांडुर्बभूववनगोचरः।हित्वाप्रासादनि
लयंशुभानिशयनानिच।अरण्यनित्यःसततंबभूवमृगयापरः।सचरन्दक्षिणंपार्श्वंरम्यंहिमवतोगि
रेः।उवासगिरिपृष्ठेषुमहाशालवनेषुच।रराजकुंत्यामाद्र्याचपांडुःसहवनेचरन्।करेण्वोरिवमध्य
स्थःश्रीमान्पौरंदरोगजः।भारतंसहभार्याभ्यांखड्गबाणधनुर्द्धरं।विचित्रकवचंवीरंपरमास्त्रविदंनृपं
देवोयमित्यमन्यंतचरंतंवनवासिनः।तस्यकामांश्चभोगांश्चनरानित्यमतंद्रिताः।उपजह्रुर्वनांतेषु
धृतराष्ट्रेणचोदिताः।अथपारशवींकन्यांदेवकस्यमहीपतेः।रूपयौवनसंपन्नांसशुश्रावापगासुतः।

ततस्तुवरयित्वातामानीयभरतर्षभः। विवाहंकारयामासविदुरस्यमहामतेः। तस्यांचोत्पादयामास
विदुरःकुरुनंदन। पुत्रान्विनयसंपन्नानात्मनःसदृशान्गुणैः॥ इत्यादिपर्वणिसंभवे १७
वैशं ततःपुत्रशतंजज्ञेगांधार्य्यांजनमेजय। धृतराष्ट्रस्यवैश्यायामेकश्चापिशतात्परः। पांडोःकुं
त्यांचमाद्र्यांचपुत्राःपंचमहारथाः। देवेभ्यःसमपद्यंतसंतानायकुलस्यवै जनमेजयउ ॥
कथंपुत्रशतंजज्ञेगांधार्य्यांद्विजसत्तम। कियताचैवकालेनतेषामायुश्चकिंपरं। कथंचैकःसवैश्या
यांधृतराष्ट्रसुतोभवत्। कथंचसदृशींभार्य्यांगांधारींधर्मचारिणीं। आनुकूल्येवर्त्तमानांधृतराष्ट्रो
त्यवर्त्तत। कथंचशप्तस्यसतःपांडोस्तेनमहात्मना। समुत्पन्नादैवतेभ्यःपुत्राःपंचमहारथाः। एतद्विद्व
थान्यायंविस्तरेणतपोधन। कथयस्वनमेतृप्तिःकथ्यमानेषुबंधुषु॥ वैशं ॥क्षुच्छ्रमाभिप १७६
रिग्लानंद्वैपायनमुपस्थितं। तोषयामासगांधारीव्यासस्तस्यैवरंददौ। सावव्रेसदृशंभर्तुःपुत्राणांश
तमात्मनः। ततःकालेनसागर्भंधृतराष्ट्रादथाग्रहीत्। संवत्सरद्वयंतंतुगांधारीगर्भमाहितं। अप्र
जाधारयामासततस्तांदुःखमाविशत्। श्रुत्वाकुंतीसुतंजातंबालार्कसमतेजसं। उदरस्यात्मनःस्थै

र्यमुपालम्भान्त्वचिंतयन्त्याश्च ज्ञातं धृतराष्ट्रस्य यत्नेन महता ततः। सोदरं घातयामास गांधारी दुः
खमूर्छिता। ततो जज्ञे मांसपेशी लोहाष्ठीलेव संहता। द्विवर्षसम्भृतां कुक्षौ तामुत्स्रष्टुं प्रचक्रमे। अथ द्वै
पायनो ज्ञात्वा त्वरितः समुपागमत्। तां स मांसमयीं पेशीं ददर्श जपतां वरः। ततोऽब्रवीत्सौवलेयीं किमि
दं ते चिकीर्षितं। सा चात्मनो मतं सत्यं शशंस परमर्षये गांधार्युवाच ज्येष्ठं कुंतीसुतं जातं
श्रुत्वा रविसमप्रभं। दुःखेन परमेणेदमुदरं घातितं मया। शतं च किल पुत्राणां वितीर्णं मे त्वया पुरा। इयं च
मे मांसपेशी जाता पुत्रशताय वै व्यास उवाच एवमेतत्सौवलेयि नैतज्जात्वन्यथा भवेत्। वि
तथं नोक्तपूर्वं मे स्वैरेष्वपि कुतोऽन्यथा। घृतपूर्णं कुंडशतं क्षिप्रमेव विधीयतां। शीताभिरद्भिरष्ठीलामिं
मां च परिसिंचत वैशं सा सिच्यमाना त्वष्ठीला वभूव शतधा तदा। अंगुष्ठपर्वमात्राणां गर्भाणां
पृथगेव तु। एकाधिकशतं पूर्णं यथायोगं विशाम्पते। मांसपेश्यास्तदा राजन् क्रमशः कालपर्ययात्। त
तस्तांस्तेषु कुंडेषु गर्भानवदधे तदा। स्वनुगुप्तेषु देशेषु रक्षां च व्यदधात्ततः। शशंस चैव भगवान् काले
नेतावता पुनः। उद्घाटनीयान्येतानि कुंडानीति च सौवलीं। इत्युक्त्वा भगवान्व्यासस्तथा प्रतिनिधाय

श्री०ए०
१७७ चा। जगाम तपसे धीमान् हिमवंतं शिलोच्चयं। जज्ञेऽक्रमेण चैतेन तेषां दुर्योधनो नृप। आजन्मस्तु प्रमाणे
न ज्येष्ठो भ्राता युधिष्ठिरः। तदाख्यातं तु भीष्माय विदुराय च धीमते। यस्मिन्नहनि दुर्द्धर्षो जज्ञे दुर्योध
नस्तदा। तस्मिन्नेव महाबाहुर्जज्ञे भीमोपि वीर्यवान्। स जातमात्र एवाथ धृतराष्ट्रसुतो नृप। रासभारा
वसदृशं रुराव च ननाद च। तं खराः प्रत्यभाषंत गृध्रगोमायुवायसाः। वाताश्च प्रववुश्चापि दिग्दाह
श्चाभवत्तदा। ततस्तु भीतवद्राजा धृतराष्ट्रो ब्रवीदिदं। समानीय बहून्विप्रान् भीष्मं विदुरमेव च। अन्यां
श्च सुहृदो राजन् कुरून्सर्वांस्तथैव च। युधिष्ठिरो राजपुत्रो ज्येष्ठो नः कुलवर्द्धनः। प्राप्तः स्वगुणतो राज्य
न तस्मिन्वाच्यमस्ति नः। अयं त्वनंतरस्तस्मादपि राजा भविष्यति। एतद्धि ब्रूत मे तथ्यं यदत्र भविता ध्रु
वं। वाक्यस्यैतस्य निधने दिक्षु सर्वासु भारत। क्रव्यादाः प्राणदन्घोराः शिवाश्चाशिवशंसिनः। लक्ष १७७
यित्वा निमित्तानि तानि घोराणि सर्वशः। तेऽब्रुवन्ब्राह्मणा राजन्विदुरश्च महामतिः। यथेमानि निमि
त्तानि घोराणि मनुजाधिप। उत्थितानि सुते जाते ज्येष्ठे ते पुरुषर्षभ। व्यक्तं कुलांतकरणो भविता एष ते सु
तस्तव। तस्य शांतिः परित्यागे गुप्तावपनयो महान्। शतमेकोनमप्यस्तु पुत्राणां ते महीपते। स जैन

मेकं शांतिं चेत्कुलस्य द्दुसि भारत। एकेन कुरु वैद्देमं कुलस्य जगतस्तथा। त्यजेदेकं कुलस्यार्थे ग्रामस्या
र्थे कुलं त्यजेत्। ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत्। स तथा विदुरेणोक्तस्तैश्च सर्वैर्द्विजोत्तमैः।
न चकार तथा राजा पुत्रस्नेहसमन्वितः। ततः पुत्रशतं पूर्णं धृतराष्ट्रस्य पार्थिव। मासमात्रेण संजज्ञे कन्या
चैकशताधिका। गांधार्यां क्लिश्यमानायामुदरेण विवर्द्धता। धृतराष्ट्रं महाराजं वैश्या पर्यचरत्किल। त
स्मिन्संवत्सरे राजन्धृतराष्ट्रान्महायशाः। यज्ञे धीमांस्ततस्तस्यां युयुत्सुः करणो नृप ८। एवं पुत्रशतं ज
ज्ञे धृतराष्ट्रस्य धीमतः। महारथानां वीराणां कन्या चैका शताधिका। युयुत्सुश्च महातेजा वैश्यापुत्रः
प्रतापवान् इत्यादिपर्वणि १८ जनमेजय उ धृतराष्ट्रस्य पुत्राणामादितः कथितं
त्वया। ऋषेः प्रसादात्तु शतं न च कन्या प्रकीर्त्तिता। वैश्यापुत्रो युयुत्सुश्च कन्या चैका शताधिका। गांधा
रराजदुहिता शतपुत्रेति चानघ। उक्ता महर्षिणा तेन व्यासेनामिततेजसा। कथं त्विदानीं भगवन्कन्यां त्वं तु
ब्रवीषि मे। यदि भागशतं पेशी कृता तेन महर्षिणा। न प्रजास्यति चेद्भूयः सौबली तु कथंचन। कथं तु सं
भवस्तस्या दुःशलाया वदस्व मे। यथावदिह विप्रर्षे परं मेत्र कुतूहलं वैशं साधु यं प्रश्नमुद्दि

ष्टः पांडवेयब्रवीमिते। तां मांसपेशीं भगवान्स्वयमेव महातपाः। शीताभिरद्भिरासिच्य भागं भागमकल्पय
त्। यो यथाकल्पितो भागस्तं तं धात्र्या तथा नृप। घृतपूर्णेषु कुंडेषु एकैकं प्राक्षिपत्तदा। एतस्मिन्नंतरे साध्वी
गांधारी सुदृढव्रता। दुहितृस्नेहसंयोगमनुध्याय वरांगना। मनसाचिंतयद्देवी एतत्पुत्रशतं मम। भविष्यति
न संदेहो न ब्रवीत्यन्यथा मुनिः। ममेयं परमा तुष्टिर्दुहिता मे भवेद्यदि। एका शताधिका बाला भविष्यति ग
रीयसी। ततो दौहित्रजाल्लोकादवाध्योसौ पतिर्मम। अधिका किल नारीणां प्रीतिर्जामातृजा भवेत्। यदि
नाम ममापि स्याद्दुहितैका शताधिका। कृतकृत्या भवेयं वै पुत्रदौहित्रसंवृता। यदि सत्यं तपस्तप्तं दत्तं वा
प्यथवा हुतं। गुरवस्तोषिता वापि तथास्तु दुहिता मम। एतस्मिन्नेव काले तु कृष्णद्वैपायनः स्वयं। व्यभजत्स
तदा पेशीं भगवानृषिसत्तमः। गणयित्वा शतं पूर्णमंशानामाह सौवलीं॥ व्यास उ ॥ पूर्णं पुत्रशतं १७८
त्वेतन्न मिथ्या वागुदाहृता। दौहित्रयोगाय भाग एकः शिष्टः शतात्परः। एषा ते सुभगा कन्या भविष्यति य
तान्यरा। ततोन्यं घृतकुंडं च समानाय्य महातपाः। तं चापि प्राक्षिपत्तत्र कन्याभागं तपोधनः। एतत्ते कथि
तं राजन्दुःशलाजन्म भारत। ब्रूहि राजेंद्र किं भूयो वर्तयिष्यामि तेनघ इत्यादिपर्वणि संभवे

॥ ८८ ॥ जनमेजय उ॰ ज्येष्टानुज्येष्ठतां तेषां नामानि च पृथक्पृथक् । धृतराष्ट्रस्य पुत्राणामानुपूर्व्या
प्रकीर्त्तय वैशं॰ दुर्योधनो युयुत्सुश्च राजन्दुःशासनस्तथा । दुःसहो दुःशलश्चैव जलसंधः समः
सहः । विंदानुविंदौ दुर्धर्षः सुवाहुर्दुष्प्रधर्षणः । दुर्मर्षणो दुर्मुखश्च दुःकर्णः कर्ण एव च । विविंशतिर्विक
र्णश्च शलः सत्वः सुलोचनः । चित्रोपचित्रौ चित्राक्षश्चारुचित्रः शरासनः । दुर्मदो दुर्विगाहश्च विवित्सुर्विक
टाननः । ऊर्णनाभः सुनाभश्च तथा नंदोपनंदकौ । चित्रवाणश्चित्रवर्मा सुवर्मा दुर्विमोचनः । अयोवाहुर्मह
वाहुश्चित्रांगश्चित्रकुंडलः । भीमवेगो भीमवलो वलाकी वलवर्द्धनः । उग्रायुधः सुषेणश्च कुंडधारो महोद
रः । चित्रायुधो निषंगी च पाशी वृंदारकस्तथा । दृढवर्मा दृढक्षत्रः सोमकीर्त्तिरनूदरः । दृढसंधो जरासंधः
सत्यसंधः सुदस्सवाक् । उग्रश्रवा उग्रसेनः सेनानीर्दुःपराजयः । अपराजितः कुंडशायी विशालाक्षो दुरा
धरः । दृढहस्तः सुहस्तश्च वातवेगसुवर्च्चसौ । आदित्यकेतुर्वह्वाशी नागदत्तोग्रयाय्यपि । कवची क्राथकुं
डो च कुंडधारो धनुर्द्धरः । उग्रभीमरथो वीरो वीरवाहुरलोलुपः । अभयो रौद्रकर्मा च तथा दृढरथाश्रयः ।
अनाधृष्यः कुंडभेदी विरावी दीर्घलोचनः । प्रमथश्च प्रमाथी च दीर्घरोमश्च वीर्यवान् । दीर्घवाहुर्महावाहुर

आ०प० मूढोरुःकनकध्वजः।कुंडाशीर्विरजश्चैवदुःशलाचशताधिका।इतिपुत्रशतंराजन्कन्याचैकशताधिका।
१७९ नामधेयानुपूर्व्येणविद्धिजन्मक्रमंनृप।सर्वेत्वतिरथाःशूराःसर्वेयुद्धविशारदाः।सर्वेवेदविदश्चैवसर्वे
सर्वास्त्रकोविदाः।सर्वेषामनुरूपाश्चकृतादारामहीपते।धृतराष्ट्रेणसमयेपरीक्ष्यविधिवन्नृप।दुःशला
चापिसमयेधृतराष्ट्रोनराधिपः।जयद्रथायप्रददौविधिनाभरतर्षभ इत्यादिपर्वणिसंभवे ॥
॥ ११ जनमेजय उ कथितोधार्त्तराष्ट्राणामार्षःसंभवउत्तमः।अमनुष्योमनुष्याणांभवता
ब्रह्मवादिना।नामधेयानिचाप्येषांकथ्यमानानिभागशः।त्वत्तःश्रुतानिमेब्रह्मन्पांडवानांचकीर्त्तय॥
तेहिसर्वेमहात्मानोदेवराजपराक्रमाः।त्वयैवांशावतरणेदेवभागाःप्रकीर्त्तिताः।तस्मादिच्छाम्यहंश्रो
तुमतिमानुषकर्म्मणां।तेषामाजननंसर्वंवैशंपायनकीर्त्तय वैशं राजापांडुर्महारण्येमृग १७९
व्यालनिषेविते।चरन्मैथुनधर्मस्थंददर्शमृगयूथपं।ततस्तांचमृगींतंचरुक्मपुंखैःसुपत्रिभिः।निर्बिभे
दशरैस्तीक्ष्णैःपांडुःपंचभिराशुगैः।सचराजन्महातेजाऋषिपुत्रस्तपोधनः।भार्ययासहतेजस्वीमृग
रूपेणसंगतः।संसक्तश्चतयामृग्यामानुषीमीरयन्गिरं।क्षणेनपतितोभूमौविललापाकुलेंद्रियः ॥

मृगउवाच कामममन्युपरीतापिबुध्याविरहिताअपि।वर्ज्जयंतिनृशंसानिपापेष्वपिरतानराः।नविधिं
ग्रसतेप्रज्ञाप्रज्ञांतुग्रसतेविधिः।विधिपर्य्यागतानर्थान्प्रज्ञावान्प्रतिपद्यते।शश्वद्धर्मात्मनांमुख्येकुले
जातस्यभारत।कामलोभाभिभूतस्यकथंतेचलितामतिः पांडुरुवाच शत्रूणांयावधेवृत्तिः
सामृगाणांवधेस्मृताः।राज्ञांमृगनमांमोहात्त्वंगर्हयितुमर्हसि।अछद्मनामाययाचमृगाणांवधइष्यते।
सएवधर्मोराज्ञांतुतद्विद्वंकिंनुगर्हसे।अगस्त्यसत्रमासीनश्चकारमृगयामृषिः।आरण्यान्सर्वदैवत्यान्मृ
गान्प्रोक्ष्यमहावने।प्रमाणदृष्टधर्मेणकथमस्मान्विगर्हसे।अगस्त्यस्याभिचारेणयुष्माकंचवधार्हता।
मृगउवाच नरिपून्वैसमुद्दिश्यविमुंचंतिनराःशरान्।रंध्रएषांविशेषेणवधकालःप्रशस्यते पां
डुरुवाच प्रमत्तमप्रमत्तंवाविवृतंघ्नंतिचौजसा।उपायैर्विविधैस्तीक्ष्णैःकस्मान्मृगविगर्हसे मृ
गउवाच नाहंघ्नंतंमृगान्राजन्विगर्हेचात्मकारणात्।मैथुनंतुप्रतीक्ष्यंमेत्वयेहाद्यानृशंस्यतः।स
र्वभूतहितेकालेसर्वभूतेप्सितेतथा।कोहिविद्वान्मृगंहन्याच्चरंतं मैथुनंवने।अस्यांमृग्यांचराजेंद्रहर्षान्मै
थुनमाचरं।पुरुषार्थफलंकर्तुंतत्त्वयाविफलीकृतं।पौरवाणांमहाराजतेषामक्लिष्टकर्मणां।वंशेजात

आ०प० स्यकौरव्यनानुरूपमिदंतव। नृशंसंकर्मसुमहत्सर्वलोकविगर्हितं। अस्वर्ग्यमयशस्यंचाप्यधर्मिष्टंच
१८० भारत। स्त्रीभोगानांविशेषज्ञःशास्त्रधर्मार्थतत्त्ववित्। नार्हस्त्वंसुरसंकाशकर्तुमस्वर्ग्यमीदृशं। त्वया
नृशंसकर्त्तारःपापाचाराश्चमानवाः। निग्राह्याःपार्थिवश्रेष्ठत्रिवर्गपरिवर्जिताः। किंकृतंतेनरश्रेष्ठमा
मिहानागसंघ्नता। मुनिंमूलफलाहारंमृगवेशधरंनृप। वसमानमरण्येषुनित्यंशमपरायणं। त्वयाहं
हिंसितोयस्मात्तस्मात्त्वामप्यहंशपे। द्वयोर्नृशंसकर्त्तारमवशंकाममोहितं। जीवितांतकरोभावएवमे
वागमिष्यति। अहंहिकिमिदमोनामतपसाभावितोमुनिः। व्यपत्रपमनुष्याणांमृगयांमैथुनमाचिरं। मृगोभू
त्वामृगैःसार्द्धंचरामिगहनेवने। नतुतेब्रह्महत्येयंभविष्यत्यविजानतः। मृगरूपधरंहत्वामामेवंकाममो
हितं। अस्यतुत्वंफलंमूढप्राप्स्यसीदृशमेवहि। प्रिययासहसंवासंप्राप्यकामविमोहितः। त्वमप्यस्याम १८०
वस्थायांप्रेतलोकंगमिष्यसि। अंतकालेहिसंवासंयययागंतासिकांतया। प्रेतराजपुरंप्राप्तंसर्वभूतदुरत्य
यं। भक्त्यामतिमतांश्रेष्ठसैवत्वानुगमिष्यति। वर्त्तमानःसुखेदुःखंयथाहंप्रापितस्त्वया। तथात्वांचसुखंप्रा
प्तंदुःखमभ्यागमिष्यति वैशं एवमुक्त्वासुदुःखार्त्तोजीवितात्सव्यमुच्यत। मृगःपांडुश्चदुःखार्त्तः

क्षणेनसमपद्यत इत्यादिपर्वणिसंभवे १११ वैशं तंव्यतीतमतिक्रम्यराजास्वमिववांधवं
।सभार्यःशोकदुःखार्त्तःपर्यदेवयदातुरः॥ पांडुरुवाच ॥सतामपिकुलेजाताःकर्म्मणावतदुर्ग्ग
तिं।प्राप्नुवंत्यकृतात्मानःकामजालविमोहिताः।शश्वद्धर्म्मात्मनाजातोवालएवपितामम।जीवितांतम
नुप्राप्तःकामात्मैवेतिनःश्रुतं।तस्यकामात्मनःक्षेत्रेराज्ञःसंयतवागृषिः।कृष्णद्वैपायनःसाक्षाद्भगवान्मा
मजीजनत्।तस्याद्यव्यसनेवुद्धिःसंजातेयंममाधमा।त्यक्तस्यदेवैरनयान्मृगयांपरिधावतः।सोहमे
वव्यवस्यामिवंधोहिव्यसनंमहत्।सुवृत्तिमनुवर्त्तिष्येतामहंपितुरव्ययां।अतीवतपसात्मानंयोजयि
ष्याम्यसंशयं।तस्मादेकोहमेकाकीएकैकस्मिन्वनस्पतौ।चरन्भैक्ष्यंमुनिर्मुंडश्चरिष्यामिमहीमिमा
मां।पांशुनासमवछन्नःशून्यागारकृतालयः।वृक्षमूलनिकेतोवात्यक्तसर्वप्रियाप्रियः।नशोचन्नप्रहृष्यं
श्चतुल्यनिंदात्मसंस्तुतिः।निराशीर्निर्नमस्कारोनिर्द्वंद्वोनिःपरिग्रहः।नचाप्यवहसन्किंचिन्नकुर्वन्भ्रुकुटीं
क्वचित्।प्रसन्नवदनोनित्यंसर्वभूतहितेरतः।जंगमाजंगमंसर्वमविहिंसंश्चतुर्विधं।स्वासुप्रजास्विवस
दासमंप्राणभृतःप्रति।एककालंचरन्भैक्ष्यंकुलानिदशपंचवा।असंभवेवाभैक्ष्यस्यचरन्ननशनान्यपि।

आ०प०
१८१

अल्पमल्पंचभुंजानःपूर्व्वालाभेनजातुचित॥अन्यान्नविरचरस्तोभादलाभेसप्तपूरयन्॥अलाभेयदिवाल
भेसमदर्शीमहातपाः॥वास्यैकंतक्षतोबाहुंचंदनेनैकमुक्षतः॥नाकल्याणंनकल्याणंचिंतयन्नुभयो
स्तयोः॥नजिजीविषुवत्किंचिन्नमुमूर्षुवदाचरन्॥मरणंजीवितंचैवनाभिनंदन्नचद्विषन्॥याःकाश्चिज्जी
वताःशक्याःकर्त्तुमभ्युदयक्रियाः॥ताःसर्वाःसमतिक्रम्यनिमेषादिष्ववस्थितः॥तासुचाप्यनवस्थासु
त्यक्तसर्वेंद्रियक्रियः॥संपरित्यक्तधर्मार्थःसुनिर्णिक्तात्मकल्मषः॥निर्मुक्तःसर्वपापेभ्योव्यतीतःसर्व
वागुराः॥नवशेकस्यचित्तिष्ठन्सधर्म्मोमातरिश्वनः॥एतयासततंवृत्याचरन्नेवंप्रकारया॥देहंसंस्थापय
यिष्यामिनिर्भयंमार्गमास्थितः॥नाहंसुकृपणेमार्गेस्ववीर्यक्षयशोचिते॥स्वधर्म्मात्सततोपेतेचरेयंवी
र्यवर्जितः॥सत्कृतोसत्कृतोवापियोन्यांकृपणचक्षुषा॥उपैतिवृत्तिंकामात्मासशुनांवर्त्ततेपथि वै १८१
शम् एवमुक्त्वासुदुःखार्त्तोनिश्वासपरमोनृपः॥अपेक्षमाणःकुंतीचमाद्रीचसमभाषत॥कौशल्या
विदुरःक्षत्ताराजाचसहबंधुभिः॥आर्यासत्यवतीभीष्मस्तेचराजपुरोहिताः॥ब्राह्मणाश्चमहात्मानःसो
मपाःशंसितव्रताः॥पौरवृद्धाश्चयेतत्रनिवसंत्यस्मदाश्रयाः॥प्रसाद्यसर्वेवक्तव्याःपांडुःप्रव्रजितोवने॥

निशम्यवचनंभर्त्तुर्वनवासेधृतात्मनः।तत्समंवचनंकुंतीमाद्रीचसमभाषतां।अन्येपिह्याश्रमाःसंतिये
शक्याभरतर्षभ।आवाभ्यांधर्मपत्नीभ्यांसहतप्त्वातपोमहत्।शरीरस्यापिमोक्षाय स्वर्गंप्राप्यमहाफलं।
त्वमेवभविताभर्त्तास्वर्गस्थोपिनसंशयः।प्रणिधायेंद्रियग्रामंभर्त्तृलोकपरायणे।त्यक्त्वाकामसुखेह्या
वांतप्स्यावोविपुलंतपः।यदिचावांमहाप्राज्ञत्यक्ष्यसित्वंविशांपते।अद्यैवावांप्रहास्यावोजीवितंनात्रसंश
य पांडुरुवाच यदिमवसितंह्येतद्युवयोर्धर्मसंहितं।स्वशक्तिमनुवर्त्तिष्येतामहंपितुरव्ययां।त्य
क्त्वाग्राम्यसुखाहारंतप्यमानोमहत्तपः।वल्कलीफलमूलाशीचरिष्यामिमहावने।अग्नौजुह्वदुभौका
लावुभौकालावुपस्पृशन्।कृशःपरिमिताहारश्चीरचर्मजटाधरः।शीतवातातपसहःक्षुत्पिपासान
वेक्षकः।तपसादुश्चरेणेदंशरीरमुपशोषयन्।एकांतशीलीविमृशन्पक्वापक्वेनवर्त्तयन्।पितॄन्देवां
श्चवन्येनवाग्भिरद्भिश्चतर्पयन्।वानप्रस्थजनस्यापिदर्शनंकुलवासिनां।नाप्रियाण्याचरिष्यामिकिंपुन
र्ग्रामवासिनां।एवमारण्यशास्त्राणामुग्रमुग्रतरंविधिं।कांक्षमाणोहमासिष्येदेहस्यास्यसमापनात्
॥ वैशं ॥इत्येवमुक्त्वाभार्येतेराजाकौरवनंदनः।ततश्चूडामणिंनिष्कंमंगदेकुंडलानिच।वासां

सिचमहार्हाणिस्त्रीणामाभरणानिच।प्रदायसर्वविप्रेभ्यःपांडुःपुनरभाषत।गत्वानागपुरंवाच्यंपांडुः
प्रव्रजितोवनं।अर्थंकामंसुखंचैवरतिंचपरमात्मिकां।प्रतस्थेसर्वमुत्सृज्यसभार्यःकुरुनंदनः।ततस्त
स्यानुयातारस्तेचैवपरिचारकाः।श्रुत्वाभरतसिंहस्यविविधाःकरुणागिरः।भीममार्त्तस्वरंकृत्वाहा
हेतिपरिचुक्रुशुः।उष्णमश्रुविमुंचंतस्तंविहायमहीपतिं।ययुर्नागपुरंतूर्णंसर्वमादायतद्वचः।श्रुत्वा
तेभ्यस्ततःसर्वंयथावृत्तंमहावने।धृतराष्ट्रोनरश्रेष्ठःपांडुमेवान्वशोचत।नशय्यासनभोगेषुरतिंविंद
तिकर्हिचित्।भ्रातृशोकसमाविष्टस्तमेवार्थंविचिंतयन्।राजपुत्रस्तुकौरव्यपांडुर्मूलफलाशनः।ज
गामसहपत्नीभ्यांततोनागशतंगिरिं।सचैत्ररथमासाद्यकालकूटमतीत्यच।हिमवंतमतिक्रम्यप्रय
यौगंधमादनं।रक्ष्यमाणोमहाभूतैःसिद्धैश्चपरमर्षिभिः।उवाससमहाराजसमेषुविषमेषुच।इंद्रद्यु
म्नशरःप्राप्यहंसकूटमतीत्यच।शतशृंगेमहाराजतापसःसमपद्यत इत्यादिपर्वणिपांडुचरिते
॥ ११२ वैशंपा तत्रापितपसिश्रेष्ठेवर्त्तमानःसवीर्यवान्।सिद्धचारणसंघानांबभूवप्रियद
र्शनः।शुश्रूषुरनहंवादीसंयतात्माजितेंद्रियः।स्वर्गंगंतुंपराक्रांतःस्वेनवीर्येणभारत।केषांचिदभवद्भ्रा

नाकेषांचिदभवत्सखा।ऋषयस्त्वपरेचैनंपुत्रवत्पर्य्यपालयन्।सतुकालेनमहताप्राप्यनिःकल्मषंत
पः।ब्रह्मर्षिसदृशःपांडुर्वभूवभरतर्षभ।अमावास्यांतुसहिताऋषयःशंसितव्रताः।ब्रह्माणंद्रष्टुकामा
स्तेसंप्रतस्थुर्महर्षयः।संप्रयातानृषीन्दृष्ट्वापांडुर्वचनमब्रवीत्।भवंतःक्कगमिष्यंतिब्रूतमेवदतांव
राः ऋषयऊचुः समवायोमहानद्यब्रह्मलोकेमहात्मनां।देवानांचऋषीणांचपितृणांच
महात्मनां।वयंतत्रगमिष्यामोद्रष्टुकामाःस्वयंभुवं॥ वैशं ॥स्वर्गपारंतितीर्षुःसशतशृंगा
दुदङ्मुखः।प्रतस्थेसहपत्नीभ्यामब्रुवंस्तंचतापसाः।उपर्युपरिगच्छंतःशैलराजमुदङ्मुखाः।दृष्टवं
तोगिरौरम्येदुर्गान्देशान्बहून्वयं।विमानशतसंवाधांगीतस्वरनिनादितां।आक्रीडभूमिंदेवानांगंधर्वाप्स
रसांतथा।उद्यानानिकुवेरस्यसमानिविषमाणिच।महानदीनितंवांश्चगहनान्गिरिगह्वरान्।संतिनित्य
हिमादेशानिर्वृक्षमृगपक्षिणः।संतिक्कचिन्महादर्य्योदुर्गाःकाश्चिद्दुरासदाः।नातिक्रामेतपक्षीयान्कु
तएवेतरेमृगाः।वायुरेकोहियात्यत्रसिद्धाश्चपरमर्षयः।गच्छंत्यौशैलराजेस्मिन्राजपुत्र्यौकथंत्विमे।
नसीदेतामदुःखार्हेमागमोभरतर्षभ पांडुरुवाच अप्रजस्यमहाभागानद्वारंपरिचक्षते।स्वर्गेते

आ॰प॰ नाभितप्तोहमप्रजस्तुब्रवीमिवः।पित्र्यादृणादनिर्मुक्तस्तेनतप्येतपोधनाः।देहनाशेध्रुवोनाशःपितृणा
१८२ मेषनिश्चयः।ऋणैश्चतुर्भिःसंयुक्ताजायंतेमानवाभुवि।पितृदेवर्षिमनुजैर्देयंतेभ्यश्चधर्मतः।एतानितु
यथाकालंयोनबुध्यतिमानवः।नतस्यलोकाःसंतीतिधर्मविद्भिःप्रतिष्ठितं।यज्ञैस्तुदेवान्प्रीणातिस्वाध्या
यतपसामुनीन्।पुत्रैःश्राद्धैःपितृंश्चापिआनृशंस्येनमानवान्।ऋषिदेवमनुष्याणांपरिमुक्तोस्मिध
र्मतः।त्रयाणामितरेषांतुनाशआत्मनिनश्यति।पित्र्यादृणादनिर्मुक्तइदानीमस्मितापसाः।४।इहतस्मा
त्प्रजाहेतोःप्रजायंतेनरोत्तमाः।यथैवाहंपितुःक्षेत्रेजातस्तेनमहर्षिणा।तथैवास्मिन्ममक्षेत्रेकथंवैसं
भवेत्प्रजाः ऋषयऊचुः अस्तिवैतवधर्मात्मन्विद्मदेवोपमंशुभं।अपत्यमनघंराजन्वयंदिव्ये
नचक्षुषा।दैवोदिष्टंनरव्याघ्रकर्मणेहोपपादय।अक्लिष्टंफलमव्यग्रोविंदतेबुद्धिमान्नरः।तस्मिन्दृष्टे १८२
फलेराजन्प्रयत्नंकर्तुमर्हसि।अपत्यंगुणसंपन्नंलब्धाप्रीतिकरंह्यसि वैशं तच्छ्रुत्वातापसवचः
पांडुश्चिंतापरोभवत्।आत्मनोमृगशापेनजानन्नुपहतांक्रियां।सोब्रवीद्विजनेकुंतींधर्मपत्नींयशस्वि
नीं।अपत्योत्पादनेयत्नमापदित्वंसमर्थय।अपत्यंनामलोकेषुप्रतिष्ठाधर्मसंहिताः।इतिकुंतीविदुषी

राः शाश्वतं धर्मवादिनः। इष्टं दत्तं तपस्तप्तं नियमश्च स्वनुष्ठितः। सर्वमेवानपत्यस्य न पावनमिहोच्यते।
सोहमेवं विदित्वैतत्प्रपश्यामि शुचिस्मिते। अनपत्यः शुभाल्लोकान्नावाप्स्यामीति चिंतयन्। मृगाभिशा
पान्नष्टं मे जननं ह्यकृतात्मनः। नृशंसकारिणो भीरु यथैवोपहतं पुरा। इमे वै बंधुदायादाः षट् पुत्रा ध
र्मदर्शने। षडेवाबंधुदायादाः पुत्रास्तान् शृणु मे पृथे। स्वयंजातः प्रणीतश्च परिक्रीतश्च यः सुतः। पौनर्भव
श्च कानीनः स्वैरिण्यां यश्च जायते। दत्तः क्रीतः कृत्रिमश्च उपगच्छेत्स्वयं च यः। सहोढो ज्ञातिरेताश्च हीन
योनिधृतश्च यः। पूर्वपूर्वतमाभावे मत्वा लिप्सेत वै सुतं। उत्तमादेवरात्पुंसः कांक्षंते पुत्रमापदि। अपत्यं
धर्मफलदं श्रेष्ठं विंदंति मानवाः। आत्मशुक्रादपि पृथे मनुः स्वायंभुवोब्रवीत्। तस्मात्प्रहेष्याम्यद्य त्वां ही
नः प्रजननात्स्वयं। सदृशाच्छ्रेयसो वा त्वं विद्ध्यपत्यं यशस्विनी। शृणु कुंति कथामेतां शारदंडायनीं प्रति। सा
वीरपत्नी गुरुणा नियुक्ता पुत्रजन्मनि। पुष्पेण प्रयता स्नाता निशि कुंति चतुष्पथे। वरयित्वा द्विजं सिद्धं हुत्वा
पुंसवनेनलं। कर्मण्यवसिते तस्मिन्सा तेनैव सहावसत्। तत्र त्रीन् जनयामास दुर्जयादीन्महारथान्।
तथा त्वमपि कल्याणि ब्राह्मणात्तपसाधिकात्। मन्नियोगाद्यतक्षिप्रमपत्योत्पादनं प्रति इत्यादि

पर्व्वणि संभवे १२२ वैशं एवमुक्त्वा महाराज कुंती पांडुमभाषत। कुरूणामृषभं वीरं तदा भू-
मिपतिं पतिं। न मामर्हसि धर्मज्ञ वक्तुमेवं कथंचन। धर्मपत्नीमभिरतां त्वयि राजीवलोचन। त्वमेव तु मह-
बाहो मय्यपत्यानि भारत। वीर वीर्योपपन्नानि धर्मतो जनयिष्यसि। स्वर्गं मनुजशार्दूल गच्छेयं सहिता त्व-
या। अपत्याय च मां गच्छ त्वमेव कुरुनंदन। नह्यहं मनसाप्यन्यं गच्छेयं त्वदृते नरं। त्वत्तः प्रतिविशिष्टश्च को
न्योस्ति भुवि मानवः। इमां च तावद्धर्मात्मन्पौराणीं शृणु मे कथां। परिश्रुतां विशालाक्ष कीर्त्तयिष्यामि या-
महं। व्युषिताश्व इति ख्यातो बभूव किल पार्थिवः। पुरा परमधर्मिष्ठः पूरोर्वंशविवर्द्धनः। तस्मिंश्च यजमा-
ने वै धर्मात्मनि महाभुजे। उपागमंस्ततो देवाः सेंद्रा देवर्षिभिः सह। अमाद्यदिंद्रः सोमेन दक्षिणाभिर्द्विजा-
तयः। व्युषिताश्वस्य राजर्षेस्ततो यज्ञे महात्मनः। देवा ब्रह्मर्षयश्चैव चक्रुः कर्म स्वयं तदा। व्युषिताश्वस्ततो
राजन्नति मर्त्यान्व्यरोचत। सर्वभूतान्यति यथा तपनः शिशिरात्यये। स विजित्य गृहीत्वा च नृपतीन्राजसत्त-
मः। प्राच्यानुदीच्यान्पाश्चात्यान्दाक्षिणात्यानकालयत्। अश्वमेधे महायज्ञे व्युषिताश्वः प्रतापवान्।
बभूव स हि राजेंद्रो दशनागबलान्वितः। अप्यत्र गाथां गायंति ये पुराणविदो जनाः। व्युषिताश्वे यशो-

हृष्टमनुष्येंद्रे कुरूत्तम। व्युषिताश्वः समुद्रांतां विजित्येमां वसुंधरां। अपालयत्सर्ववर्णान्पिता पुत्रानि
वौरसान्। यज्ञमानो महायज्ञे ब्राह्मणेभ्यो धनं ददौ। अनंतरत्नान्यादाय स जहार महाक्रतून्। सुषाव
च बहून्सोमान्सोमसंस्थास्तताना च। आसीत्काक्षीवती चास्य भार्या परमसंमता। भद्रा नाम मनुष्येंद्र
रूपेणासदृशी भुवि। कामयामासतुस्तौ च परस्परमिति श्रुतं। स तस्यां कामसंपन्नो यक्ष्मणा समपद्य
त। तेनाचिरेण कालेन जगामास्तमिवांशुमान्। तस्मिन्प्रेते मनुष्येंद्रे भार्यास्य भृशदुःखिता। अपुत्रा पु
रुषव्याघ्र विललापेति नः श्रुतं। भद्रा परमदुःखार्ता तन्निबोध जनाधिप भद्रोवाच नारी परम
धर्मज्ञ सर्वा भर्तृविनाकृता। पतिं विना जीवति या न सा जीवति दुःखिता। पतिं विना मृतं श्रेयो नार्याः क्षत्रि
यपुंगव। त्वद्गतिं गंतुमिच्छामि प्रसीदस्व नयस्व मां। त्वया हीना क्षणमपि नाहं जीवितुमुत्सहे। प्रसादं कु
रु मे राजन्नितस्तूर्णं नयस्व मां। पृष्ठतोनुगमिष्यामि समेषु विषमेषु च। त्वामहं नरशार्दूल गच्छंतमनिव
र्त्तितुं। छायेवानुगता राजन्सततं वशवर्त्तिनी। भविष्यामि नरव्याघ्र नित्यं प्रियहिते रता। अद्यप्रभृति मां
राजन्कष्टा हृदयशोषणाः। आधयोभिभविष्यंति त्वामृते पुष्करेक्षण। अभाग्यया मया नूनं वियुक्ताः

सहचारिणः। तेनमेविप्रयोगोयमुपपन्नस्त्वयासह। विप्रयुक्तातुयापत्यामुहूर्त्तमपिजीवति। दुःखंजी
वतिसापापानरकस्थेवपार्थिव। संयुक्ताविप्रयुक्ताश्चपूर्वदेहेकृतामया। तदिदंकर्मभिः पापैः पूर्वदेहेषु
संचितं। दुःखंमामनुसंप्राप्तंराजस्त्वविप्रयोगजं। अद्यप्रभृत्यहंराजन्कुशसंस्तरशायिनी। भविष्याम्यसु
खाविष्टात्वद्दर्शनपरायणा। दर्शयस्वनरव्याघ्रशाधिमाममसुखान्वितां। कृपणांनाथकरुणंविलपंतीन
रेश्वर   कुंत्युवाच   एवंबहुविधंतस्यांविलपंत्यांपुनःपुनः। तंशवंसंपरिष्वज्यवाक्किलांतर्हिताब्र
वीत। उत्तिष्ठभद्रेगच्छत्वंददानीहवरंतव। जनयिष्याम्यपत्यानित्वय्यहंचारुहासिनि। आत्मकीयेवरारो
हेशयनीयेचतुर्द्दशीं। अष्टमींवाऋतुस्नातासंविशेथामयासह। एवमुक्तातुसादेवीतथाचक्रेपतिव्रता।
यथोक्तमेवतद्वाक्यंभद्रापुत्रार्थिनीतदा। सातेनसुषुवेदेवीशवेनभरतर्षभ। त्रीन्शाल्वांश्चतुरोमद्रान्सु १८५
तान्भरतसत्तम। तथात्वमपिमय्येवंमनसाभरतर्षभ। शक्तोजनयितुंपुत्रांस्तपोयोगबलान्वितः ॥
इत्यादिपर्वणिसंभवे   १२४   वैशं   एवमुक्तस्तयाराजातांदेवींपुनरब्रवीत्। धर्मविद्धर्मसंयु
क्तमिदंवचनमुत्तरं   पांडुरुवाच   एवमेतत्पुराकुंतिव्युषिताश्वश्चकारह। यथात्वयोक्तंकल्या

णि स ह्यासीदमरोपमः। अथ त्विदं प्रवक्ष्यामि धर्मतत्वं निबोध मे। पुराणमृषिभिर्दृष्टं धर्मविद्भिर्महात्मभिः।
अनावृताः किल पुरा स्त्रिय आसन्वरानने। कामचारविहारिण्यः स्वतंत्राश्चारुहासिनि। तासां व्युच्चरमा
णानां कौमारात्सुभगे पतीन्। नाधर्मो भूद्वरारोहे स हि धर्मः पुराभवत्। तं चैव धर्मं पौराणं तिर्यग्योनि
गताः प्रजाः। अद्याप्यनुविधीयंते कामक्रोधविवर्जिताः। प्रमाणदृष्टो धर्मोयं पूज्यते च महर्षिभिः। उत्त
रेषु च रंभोरु कुरुष्वद्यापि पूज्यते। स्त्रीणामनुग्रहकरः स हि धर्मः सनातनः। अस्मिंस्तु लोके न चिरान्म
र्यादेयं शुचिस्मिते। स्थापिता येन यस्माच्च तन्मे विस्तरतः शृणु। बभूवोद्दालको नाम महर्षिरिति नः श्रुतं।
श्वेतकेतुरिति ख्यातः पुत्रस्तस्याभवन्मुनिः। मर्यादेयं कृता तेन धर्म्या वै श्वेतकेतुना। कोपात्कमलपत्रा
क्षि यदर्थं तन्निबोध मे। श्वेतकेतोः किल पुरा समक्षं मातरं पितुः। जग्राह ब्राह्मणः पाणौ गच्छाव इति चा
ब्रवीत्। ऋषिपुत्रस्ततः कोपं चकारामर्षचोदितः। मातरं तां तथा दृष्ट्वा नीयमानां बलादिव। क्रुद्धं तं तु
पिता दृष्ट्वा श्वेतकेतुमुवाच ह। मा तात कोपं कार्षीस्त्वमेष धर्मः सनातनः। अनावृता हि सर्वेषां वर्णा
नामंगना भुवि। यथा गावः स्थिताः पार्थ स्वे स्वे वर्णे तथा प्रजाः। ऋषिपुत्रोथ तं धर्मं श्वेतकेतुर्न चक्ष

आ॰प॰ मे। चकार चैवमर्य्यादामिमां स्त्रीपुंसयोर्भुवि। मानुषेषु महाभाग न त्वेवान्येषु जंतुषु। तदाप्रभृति मर्या
२८६ दा स्थितेयमिति नः श्रुतं। व्युच्चरंत्याः पतिं नार्य्या अद्यप्रभृति पातकं। भ्रूणहत्यासमं घोरं भविष्यत्य
सुखावहं। भार्यां तथा व्युच्चरतः कौमारब्रह्मचारिणीं। पतिव्रतामेतदेव भविता पातकं भुवि। पत्या नि
युक्ता या चैव पत्नी पुत्रार्थमेव च। न करिष्यति तस्याश्च भविष्यति तदेव हि। इति तेन पुरा भीरु मर्यादा
स्थापिता बलात्। उद्दालकस्य पुत्रेण धर्म्या वै श्वेतकेतुना। सौदासेन च रंभोरु नियुक्ता पुत्रजन्मनि।
मदयंती जगामर्षिं वसिष्ठमिति नः श्रुतं। तस्माल्लेभे च सा पुत्रमश्मकं नाम भाविनी। भार्या कल्माष
पादस्य भर्तुः प्रियचिकीर्षया। अस्माकमपि ते जन्म विदितं कमलेक्षणे। कृष्णद्वैपायनाद्भीरु कुरू
णां वंशवृद्धये। अत एतानि सर्वाणि कारणानि समीक्ष्य वै। ममैतद्वचनं धर्म्यं कर्त्तुमर्हस्यनिंदितं। २८६
ऋतावृतौ राजपुत्रि स्त्रिया भर्ता पतिव्रते। नातिवर्तव्य इत्येवं धर्मं धर्मविदो विदुः। शेषेष्वन्येषु काले
षु स्वातंत्र्यं स्त्री किलार्हति। धर्ममेवं जनाः संतः पुराणं परिचक्षते। भर्त्ता भार्यां राजपुत्रि धर्म्यं वाधर्म्म
मेव वा। यद्ब्रूयात्तत्तथा कार्यमिति वेदविदो विदुः। विशेषतः पुत्रगृद्धी हीनः प्रजननात्स्वयं। यथा

हमनवद्यांगिपुत्रदर्शनलालसः।तथारक्तांगुलितलःपद्मपत्रनिभःशुभो।प्रसादार्थंमयातेयंशिर
स्यभ्युद्यतोंजलिः।मन्नियोगात्सुकेशांतेद्विजातेतपसाधिकात्।पुत्रान्गुणसमायुक्तानुत्पादयितुमर्
हसि।त्वत्कृतेहंपृथुश्रोणिगच्छेयंपुत्रिणांगतिं ॥ वैशं ॥ एवमुक्तातत:कुंतीपांडुंपरपुरंजयं।प्र
त्युवाचवरारोहाभर्तुःप्रियहितेरता।पितृवेश्मन्यहंबालानियुक्तातिथिपूजने।उग्रंपर्यचरंतत्रब्राह्मणं
शंसितव्रतं।निगूढनिश्चयंधर्मेयंतंदुर्वाससंविदुः।तमहंशंसितात्मानंसर्वयत्नैरतोषयं।समेभिचा
रसंयुक्तमाचष्टभगवान्वरं।मंत्रंत्विमंचमेप्रादादब्रवीच्चैवमामिदं।यंयंदेवंत्वमेतेनमंत्रेणावाहयि
ष्यसि।अकामोवासकामोवावशंतेसमुपैष्यति।तस्यतस्यप्रसादात्तेराज्ञिपुत्रोभविष्यति।इत्युक्ताहं
तदातेनपितृवेश्मनिभारत।ब्राह्मणस्यवचस्तथ्यंतस्यकालोयमागतः।अनुज्ञातात्वयादेवमाह्वयेय
महंनृपातेनमंत्रेणराजर्षेयथास्यान्नौप्रजाहिता।आवाहयामिकंदेवंब्रूहिसत्यवतांवर।त्वत्तोनुज्ञाप्रती
क्षांमांविद्ध्यस्मिन्कर्मणिस्थितां ॥ पांडुरुवाच ॥ अद्यैवत्वंवरारोहेप्रयतस्वयथाविधि।धर्ममावा
हयशुभेसहिलोकेषुपुण्यभाक्।अधर्मेणननोधर्मःसंयुज्येतकथंचन।लोकश्चायंवरारोहेधर्मोयमि

आ०प० तिमन्यते।धार्मिकश्च कुरूणां स भविष्यति न संशयः।धर्मेण चापि दत्तस्य नाधर्मे रंस्यते मनः।तस्माद्धर्मं पुरस्कृ
१८७ त्य नियता त्वं शुचिस्मिते।उपचाराभिचाराभ्यां धर्ममावाहयस्व वै   वैशं   सा तथोक्ता तथेत्युक्त्वा ते
न भर्त्रा वरांगना।अभिवाद्याभ्यनुज्ञाता प्रदक्षिणमवर्त्तत   इत्यादिपर्वणि संभवे १२५   वैशं
संवत्सरधृते गर्भे गांधार्या जनमेजय।आह्वयामास वै कुंती गर्भार्थं धर्ममच्युतं।सा बलिं त्वरिता देवी ध
र्म्मायोपजहार ह।जजाप विधिवज्जप्यं दत्तं दुर्वाससा पुरा।आजगाम ततो देवी धर्मो मंत्रबलात्ततः।विमाने
सूर्यसंकाशे कुंती यत्र जपस्थिता।विहस्य तां ततो ब्रूयात्कुंति किं ते ददाम्यहं।सा तं विहस्यमानापि पुत्रं देह्य
ब्रवीदिदं।संयुक्ता सा हि धर्मेण योगमूर्त्तिधरेण ह।लेभे पुत्रं वरारोहा सर्वप्राणभृतां हितं।ऐंद्रे चंद्रसमायु
क्ते मुहूर्त्तेऽभिजितेऽष्टमे।दिवा मध्यगते सूर्ये तिथौ पुण्येऽतिपूजिते।समृद्धयशसं कुंती सुषाव प्रवरं सुतं।जा
तमात्रे सुते तस्मिन्वागुवाचाशरीरिणी।एष धर्मभृतां श्रेष्ठो भविष्यति नरोत्तमः।विक्रांतः सत्यवाक्चैव राजा १८७
पृथ्व्यां भविष्यति।युधिष्ठिर इति ख्यातः पांडोः प्रथमजः सुतः।भविता प्रथितो राजा त्रिषु लोकेषु विश्रुतः।
यशसा तेजसा चैव वृत्तेन च समन्वितः।धार्मिकं तं सुतं लब्ध्वा पांडुस्तां पुनरब्रवीत्।प्राहुः क्षत्रं बलज्ये

ष्टं वलज्येष्ठं सुतं हृणा। ततस्तथोक्ता भर्त्रा तु वायुमेवाजुहाव सा। ततस्तामागतो वायुर्मृगारूढो महाव
लः। किं ते कुंति ददाम्यद्य ब्रूहि यत्ते हृदि स्थितं। सा सलज्जा विहस्याह पुत्रं देहि सुरोत्तम। वलवंतं महाका
यं सर्वदर्पप्रभंजनं। तस्माज्जज्ञे महावाहुर्भीमो भीमपराक्रमः। तमप्यतिवलं जातं वागुवाचाशरी
रिणी। सर्वेषां वलिनां श्रेष्ठो जातोयमिति भारत। इदमत्यद्भुतं चासीज्जातमात्रे वृकोदरे। यदंकात्प
तितो मातुः शिलां गात्रैरचूर्णयत्। कुंती व्याघ्रभयोद्विग्ना सहसोत्पतिता किल। नान्वबुध्यत संसुप्त
मुत्संगे स्वे वृकोदरं। ततः स वज्रसंघातः कुमारोभ्यपतद्गिरौ। पतता तेन शतधा शिला गात्रैर्विचूर्णिता।
तां शिलां चूर्णितां दृष्ट्वा पांडुर्विस्मयमागतः। यस्मिन्नहनि भीमस्तु जज्ञे भरतसत्तम। दुर्योधनोपि तत्रै
व प्रजज्ञे वसुधाधिप। जाते वृकोदरे पांडुरिदं वचनमब्रवीत्। कथं नु मे वरः पुत्रो लोकश्रेष्ठो भवेदिति
दैवे पुरुषकारे च लोकोयं सुप्रतिष्ठितः। तत्र दैवं तु विधिना कालयुक्तेन लभ्यते। इंद्रो हि राजा देवानां प्र
धान इति नः श्रुतं। अप्रमेयवलोत्साहो वीर्यवानमितद्युतिः। तं तोषयित्वा तपसा पुत्रं लप्स्ये महावलं।
यं दास्यति स मे पुत्रं स वरीयान्भविष्यति। कर्म्मणा मनसा वाचा तस्मात्तप्स्ये महत्तपः। ततः पांडुर्महा

आ०प० राज्ञोमंत्रयित्वामहर्षिभिः।दिदेशकुंत्याःकौरव्योव्रतंसांवत्सरंशुभं।आत्मनाचमहाबाहुरेकपादस्थितो
१८८ भवत्।उग्रंसतपआस्थायपरमेणसमाधिना।आरिराधयिषुर्देवंत्रिदशानांतमीश्वरं।सूर्येणसहध
र्मात्मापर्य्यतप्यतभारत।तंतुकालेनमहतावासवःप्रत्यपद्यत शक्रउवाच पुत्रंतवप्रदास्यामि
त्रिषुलोकेषुविश्रुतं।ब्राह्मणानांगवांचैवसुहृदांचार्थसाधकं।दुर्हृदांशोकजननंसर्वबांधवनंदनं।
सुतंतेग्र्यंप्रदास्यामिसर्वामित्रविनाशनं।इत्युक्तःकौरवोरा—ज्ञावासवेनमहात्मना।उवाचकुंतींध
र्मात्मादेवराजवचःस्मरन्।उदर्कस्तवकल्याणितुष्टोदेवगणेश्वरः।दातुमिच्छतितेपुत्रंयथासंकल्पि
तंत्वया।अतिमानुषकर्माणंयशस्विनमरिंदमं।नीतिमंतंमहात्मानमादित्यसमतेजसं।दुराधर्षंक्रि
यावंतमतीवाद्भुतदर्शनं।पुत्रंजनयसुश्रोणिधामक्षत्रियतेजसां।लब्धःप्रसादोदेवेंद्रात्तमाह्वयशुचिर १८८
स्मिते वैशं एवमुक्ताततःशक्रमाजुहावयशस्विनी।अथाजगामदेवेंद्रोजनयामासचार्जुनं।
जातमात्रेकुमारेतुवागुवाचाशरीरिणी।महागंभीरनिर्घोषानभोनादयतीतदा।शृण्वतांसर्वभूता
नांतेषांचाश्रमवासिनां।कुंतीमाभाष्यविस्पष्टमुवाचेदंशुचिस्मितां।कार्त्तवीर्यसमःकुंतिशिवतुल्य

पराक्रमः। एषशक्रइवाजय्योयशस्तेप्रथयिष्यति। अदित्याविष्णुनाप्रीतिर्यथाभूदभिवर्द्धिता। तथा
विष्णुसमःप्रीतिंवर्द्धयिष्यतितेर्जुनः। एषमद्रान्वशेकृत्वाकुरूंश्चसहसोमकैः। चेदिकाशिकरूषांश्चकु
रुलक्ष्मींवहिष्यति। एतस्यभुजवीर्येणखांडवेहव्यवाहनः। मेदसासर्वभूतानांतृप्तिंयास्यतिवैपरां। ग्रा
मणीश्चमहीपालानेषजित्वामहाबलः। भ्रातृभिःसहितोवीरस्त्रीन्मेधानाहरिष्यति। जामदग्न्यसमःकौं
तिविष्णुतुल्यपराक्रमः। एषवीर्यवतांश्रेष्ठोभविष्यतिमहायशाः। एषयुद्धेमहादेवंतोषयिष्यतिशंक
रं। अस्त्रंपाशुपतंनामतस्मात्तुष्टादवाप्स्यति। निवातकवचानामदैत्याविबुधविद्विषः। शक्राज्ञयाम
हाबाहुस्तान्वधिष्यतितेसुतः। तथादिव्यानिचास्त्राणिनिखिलेनाहरिष्यति। विप्रनष्टांश्रियंचायमाह
र्तापुरुषर्षभः। एतामत्यद्भुतांवाचंकुंतीशुश्रावसूतके। वाचमुच्चारितामुच्चैस्तांनिशम्यतपस्विनां। बभू
वपरमोहर्षःशतशृंगनिवासिनां। तथादेवनिकायानांसेंद्राणांचदिवौकसां। आकाशेदुंदुभीनांचब
भूवतुमुलस्वनः। उदतिष्ठन्महाघोषःपुष्पवृष्टिभिरावृतः। समवेत्यचदेवानांगणाःपार्थमपूजयन्॥
काद्रवेयावैनतेयागंधर्वाप्सरसस्तथा। प्रजानांपतयःसर्वेसप्तचैवमहर्षयः। भरद्वाजःकश्यपो

आ०प० १०८ गौतमश्चविश्वामित्रोजमदग्निर्वसिष्ठः।यश्चोदितोभास्करेभूत्प्रनष्टेसोप्यत्रात्रिर्भगवानाजगाम॥मरीचि
रंगिराश्चैवपुलस्त्यःपुलहःक्रतुः।दक्षःप्रजापतिश्चैवगंधर्वाप्सरसस्तथा।दिव्यमाल्यांबरधराःसर्वालं
कारभूषिताः।उपगायंतिबीभत्सुंनृत्यंतेप्सरसांगणाः।तथामहर्षयश्चापिजेपुस्तत्रसमंततः।गं
धर्वैःसहितःश्रीमान्प्रागायतचतुंबुरुः।भीमसेनोग्रसेनौचऊर्णायुरनघस्तथा।गोपतिर्धृतराष्ट्र
श्चसूर्यवर्चास्तथाष्टमः।युगपस्तृणपःकार्ष्णिर्नंदिश्चित्ररथस्तथा।त्रयोदशःशालिशिराःपर्जन्यश्च
त्रयोदश।कलिःपंचदशश्चैवनारदश्चात्रषोडशः।शत्वाबृहत्वाबृहकःकरालश्चमहामनाः।ब्रह्मचा
रीबहुगुणःसुवर्णश्चेतिविश्रुतः।विश्वावसुर्भुमन्युश्चसुचंद्रश्चशरुस्तथा।गीतमाधुर्यसंपन्नौविख्या
तौचहाहाहूहू।इत्येतेदेवगंधर्वाजगुस्तत्रनराधिप।तथैवाप्सरसोहृष्टाःसर्वालंकारभूषिताः।ननृतुर्वै १०८
महाभागाजगुश्चायतलोचनाः।अनूचानानवद्याचगुणमुख्यागुणावरा।अद्रिकाचतथासोमामिश्र
केशीत्वलंबुषा।मरीचिःशुचिकाचैवविद्युत्पर्णातिलोत्तमा।अंबिकालक्षणाक्षेमादेवीरंभामनोरमा।अ
सिताचसुबाहुश्चसुप्रियाचवपुस्तथा।पुंडरीकासुगंधाचसुरथाचप्रमाथिनी।काम्यासारद्वतीचैवन

नृतुस्तत्रसंघशः।मेनकासहजन्याचकार्णिकापुंजिकस्थला।ऋतुस्थलाघृताचीचविश्वाचीपूर्वचित्यपि।
उम्लोचेतिचविख्याताप्रम्लोचेतिचतादश।उर्वश्येकादशीतासांजगुश्चायतलोचनाः।धातार्यमाचमित्रश्च
वरुणोंशोभगस्तथा।इंद्रोविवस्वान्पूषाचत्वष्टाचसवितातथा।पर्जन्यश्चैवविष्णुश्चआदित्याद्वादशस्मृ
ताः।महिमानंपांडवस्यवर्द्धयंतोंबरेस्थिताः।मृगव्याधश्चसर्पश्चनिर्ऋतिश्चमहायशाः।अजैकपादहिर्बु
ध्न्यःपिनाकीचपरंतपः।दहनोथेश्वरश्चैवकपालीचविशांपते।स्थाणुर्भगश्चभगवान्रुद्रास्तत्रावतस्थि
रे।अश्विनौवसवश्चाष्टौमरुतश्चमहाबलाः।विश्वेदेवास्तथासाध्यास्तत्रासन्परिसंस्थिताः।कर्कोट
कोथसर्पश्चवासुकिश्चभुजंगमः।कच्छपश्चाप्यकुंडश्चतक्षकश्चमहोरगः।आययुस्तपसायुक्तामहाक्रो
धामहाबलाः।एतेचान्येचबहवस्तत्रनागाव्यवस्थिताः।तार्क्ष्यश्चारिष्टनेमिश्चगरुडश्चासितध्वजः।अरुण
श्चारुणिश्चैववैनतेयाव्यवस्थिताः।तांश्चदेवगणान्सर्वांस्तपःसिद्धामहर्षयः।विमानगिर्यग्रगतान्दद
शुर्नेतरेजनाः।तद्दृष्ट्वामहदाश्चर्यंविस्मितामुनिसत्तमाः।अधिकांस्मततःप्रीतिमवर्त्तन्पांडवान्प्रति।
पांडुस्तुपुनरेवैनांपुत्रलोभान्महायशाः।वक्तुमैच्छद्धर्मपत्नींकुंतीत्वेनमथाब्रवीत्।नातश्चतुर्थंप्रसवमा

श्रा०प० पत्स्वपिवदंस्पुत। अतःपरंस्वैरिणीस्याद्बंधकीपंचमेभवेत्। सत्वंविद्वान्धर्ममिममधिगम्यकथंतुमां। अ
१९० पत्यार्थसमुत्क्रम्यप्रमादादिवभाषसे इत्यादिपर्वणिपांडवोत्पत्तौ १२६ वैशंप्॰ कुंतीपुत्रे
षुजातेषुधृतराष्ट्रात्मजेषुच। माद्रराजसुतापांडुंरहोवचनमब्रवीत्। नमेस्तित्वयिसंतापोविगुणेपिपरंतप।
नावरत्वेवरार्हायाःस्थित्वावानघनित्यदा। गांधार्यांश्चैवनृपतेर्जातंपुत्रशतंतथा। श्रुत्वानमेतथादुःखमभ
वत्कुरुनंदन। इदंतुमेमहद्दुःखंतुल्यतायामपुत्रता। दिष्ट्यात्विदानींभर्तुर्मेकुंत्यामप्यस्तिसंततिः। यदितु
मप्यसंतानंकुंतिराजसुतामयि। कुर्यादनुग्रहोमेस्यात्तवचापिहितंभवेत्। संस्तंभोहिसपत्नीत्वाद्वक्तुंकुं
तिसुतांप्रति। यदितुत्वंप्रसन्नोमेस्वयमेनांप्रचोदय पांडुरुवाच ममाप्येषसदामद्रिहृद्यर्थःपरि
वर्तते। नतुत्वांप्रसहेवक्तुमिष्टानिष्टविवक्षया। तवत्विदंमतंमत्वाप्रयतिष्यामतःपरं। मन्येध्रुवंमयो १९०
क्तासावचनंप्रतिपत्स्यसे वैशं॰ ततःकुंतींपुनःपांडुर्विविक्तइदमब्रवीत्। कुलस्यममसंतानं
लोकस्यचकुरुप्रियं। ममचापिंडनाशायपूर्वेषामेवभाविनि। मत्प्रियार्थंचकल्याणिकुरुकल्याणमुत्तमं।
यशसोर्थायचैवत्वंकुरुकर्मसुदुष्करं। प्राप्याधिपत्यमिंद्रेणयज्ञैरिष्टंयशोर्थिना। तथामंत्रविदोविप्रास्त

पस्तप्त्वासुदुष्करं।गुरूनभ्युपगच्छंतियशसोर्थायभाविनि।तथाराजर्षयःसर्वेब्राह्मणाश्चतपोधना।च
क्रुरुच्चावचंकर्मयशसोर्थायदुष्करं।सात्वंमाद्रीप्लवेनेवतारयैनामनिंदिते।अपत्यसंविभागेनपरां
कीर्तिमवाप्नुहि।एवमुक्ताब्रवीन्माद्रींसकृच्चिंतयदैवतं।तस्मात्तेभवितापत्यमनुरूपमसंशयं।ततोमा
द्रीविचार्यैवजगाममनसाश्विनौ।तावागम्यसुतौतस्यांजनयामासतुर्यमौ।नकुलंसहदेवंचरूपेणा
प्रतिमौभुवि।नथैवतावपियमौवागुवाचाशरीरिणी।सत्वरूपगुणोपेतौभवतोसश्विनाविति।भासतस्ते
जसात्यर्थंरूपद्रविणसंपदा।नामानिचक्रिरेतेषांशतशृंगनिवासिनः।भक्त्याचकर्मणाचैवतथाशी
र्भिर्विशांपते।ज्येष्ठंयुधिष्ठिरेत्येवंभीमसेनेतिमध्यमं।अर्जुनेतितृतीयंचकुंतीपुत्रानकल्पयन्।पूर्वजंन
कुलेत्येवंसहदेवेतिचापरं।माद्रीपुत्रावकथयंस्तेविप्राःप्रीतमानसाः।अनुसंवत्सरंजाताअपितेकुरु
सत्तमाः।पांडुपुत्राव्यराजंतपंचसंवत्सराइव।महासत्वामहावीर्यामहाबलपराक्रमाः।पांडुर्दृष्ट्वासुतांस्तां
स्तुदेवरूपान्महौजसः।मुदंपरमिकांलेभेननंदचनराधिपः।ऋषीणामपिसर्वेषांशतशृंगनिवासिनां।
प्रियावभूवुस्तासांचतथैवमुनियोषितां।कुंतीमथपुनःपांडुर्माद्र्यर्थेसमचोदयत्।तमुवाचपृथाराज

आ०प०
१८१

नूरहस्सुत्कास्तदा सती। उक्ता सकृद्द्वंद्वमेषा लेभे तेनास्मि वंचिता। बिभेम्यस्याः परिभवात्कुस्त्रीणां गतिरीदृ
शी। नाज्ञासिषमहं मूढा द्वंद्वाह्वाने फलद्वयं। तस्मान्नाहं नियोक्तव्या त्वयैषोस्तु वरो मम। एवं पांडोः सुताः पं
च देववद्त्ता महाबलाः। संभूताः कीर्तिमंतश्च कुरुवंशविवर्द्धनाः। शुभलक्षणसंपन्नाः सोमवत्प्रियदर्श
नाः। सिंहदर्पा महेष्वासाः सिंहविक्रांतगामिनः॥ सिंहोरस्काः सिंहसत्वाः सिंहास्याः सिंहविक्रमाः॥ सिंह
ग्रीवा मनुष्येंद्रा ववृधुर्देवविक्रमाः। विवर्द्धमानास्ते तत्र पुण्ये हैमवते गिरौ। विस्मयं जनयामासुर्म
हर्षीणां समेयुषां। ते च पंच शतं चैव कुरुवंशविवर्द्धनाः। सर्वे ववृधुरल्पेन कालेनाप्स्विव नीरजाः॥
इत्यादिपर्वणि संभवे ११७ वैशं दर्शनीयांस्ततः पुत्रान्पांडुः पंच महावने। तान्पश्यन्पर्वते रे
मे स्वबाहुबलमाश्रितः। सुपुष्पितवने काले कदाचिन्मधुमाधवे। भूतसंमोहने राजा सभार्यो व्यचरद्वनं। १८१
पलाशैस्तिलकैश्चूतैश्चंपकैः पारिभद्रकैः। अन्यैश्च बहुभिर्वृक्षैः फलपुष्पसमृद्धिभिः। जलस्थानैश्च वि
विधैः पद्मिनीभिश्च शोभितं। पांडोर्वनं तत्संप्रेक्ष्य प्रजज्ञे हृदि मन्मथः। प्रहृष्टमनसं तत्र विचरंतं यथाम
रं। तं माद्र्यनुजगामैका वसनं बिभ्रती शुभं। समीक्षमाणः स तु तां वयस्थां तनुवाससं। तस्य कामः प्रववृ

तेगहनेग्निरिवोद्धतः।रहस्येकांतुतांदृष्ट्वाराजाराजीवलोचनां।नशशाकनियंतुंतंकामंकामवशीकृतः
।ततएनांबलाद्राजानिजग्राहरहोगतां।वार्य्यमाणस्तयादेव्याविस्फुरंत्यायथाबलं।सतुकामपरीता
त्मातंशापंनान्वबुध्यत।माद्रींमैथुनधर्मेणसोन्वगच्छद्बलादिव।जीवितांतायकौरव्यमन्मथस्यवशंगतः
।शापजंभयमुत्सृज्यविधिनासंप्रचोदितः।तस्यकामात्मनोबुद्धिःसाक्षात्कालेनमोहिता।संप्रमथ्येंद्रिय
ग्रामंप्रनष्टासहचेतसा।सतयासहसंगम्यभार्ययाकुरुनंदनः।पांडुःपरमधर्म्मात्मायुयुजेकालध
र्म्मणा।ततोमाद्रीसमालिंग्यराजानंगतचेतसं।मुमोचदुःखजंशब्दंपुनःपुनरतीवह।सहपुत्रैस्ततः
कुंतीमाद्रीपुत्रौचपांडवौ।आजग्मुःसहितास्तत्रयत्रराजातथागतः।ततोमाद्र्यब्रवीद्राजन्नार्त्ताकुंती
मिदंवचः।एकैवत्वमिहागच्छतिष्ठंत्वत्रैवदारकाः।तच्छ्रुत्वावचनंतस्मास्तत्रैवाधायदारकान्।हताहं
मितिविक्रुश्यसहसैवाजगामसा।दृष्ट्वापांडुंचमाद्रींचशयानौधरणीतले।कुंतीशोकपरीतांगीविल
लापसुदुःखिता।रक्ष्यमाणोमयानित्यंवीरःसततमात्मवान्।कथंत्वामत्यतिक्रांतःशापंजानन्वनौक
सः।ननुनामत्वयामाद्रिरक्षितव्योजनाधिपः।साकथंलोभितवतीविजनेत्वंनराधिपं।कथंदीनस्य

आ०प०
१९२

सततं त्वामासाद्य रहोगतं।तं विचिंतयतः शश्वत्प्रहर्षः समजायत।धन्यात्वमसि वाह्लीकि मत्तो भा
ग्यतरा तथा। दृष्टवत्यसि यद्वक्त्रं प्रहृष्टस्य महीपतेः॥ माद्र्युवाच ॥विलपंत्या मया देवि वा
र्यमाणेन चासकृत्। आत्मा न वारितो नेन सत्यं दिष्टं चिकीर्षुणा कुंत्युवाच अहं ज्येष्ठा धर्म
पत्नी ज्येष्ठं धर्मफलं मम। अवश्यंभाविनो भावान्मा मां माद्रि निवर्त्तय। अन्विष्यामि हि भर्त्तारमहं प्रेत
वशंगतं। उत्तिष्ठ त्वं विसृज्यैनमिमान्पालय दारकान् माद्र्युवाच अहमेवानुयास्यामि भर्त्तार
मपलायिनं। न हि तृप्तास्मि कामानां ज्येष्ठा मामनुमन्यतां। मां चाभिगम्य क्षीणोयं कामाद्भरतसत्तमः।
तमुच्छिंद्याम् अस्य कामं कथं तु यमसादने। न चाप्यहं वर्त्तयंती निर्विशेषं सुतेषु ते। वृत्तिमार्य्ये चरिष्यामि स्पृ
श्येदेनस्तथा च मां। तस्मान्मे सुतयोः कुंति वर्त्तितव्यं स्वपुत्रवत्। मां च कामयमानोयं राजा प्रेतवशंगतः १९२
।राज्ञः शरीरेण सह ममापीदं कलेवरं। दग्धव्यं सुप्रतिच्छन्नमेतदार्य्ये प्रियं कुरु। दारकेष्वप्रमत्ता च
भवेथाश्च हिता मम। अतोन्यन्न प्रपश्यामि संदेष्टव्यं हि किंचन। इत्युक्त्वा तं चिताग्निस्थं धर्मपत्नी नर
र्षभं। मद्रराजसुता तूर्णमन्वारोहद्यशस्विनी इत्यादिपर्वणि संभवे ११९ वैशश ॥

पांडोरूपरमंदृष्ट्वादेवकल्पामहर्षयः।ततोमंत्रविदःसर्वेमंत्रयांचक्रिरेमिथः तापसाऊचुः॥
हित्वाराज्यंचराष्ट्रंचसमहात्मामहायशाः।अस्मिंस्थानेतपस्तप्त्वातापसान्शरणंगतः।सजातमा
त्रान्पुत्रांश्चदारांश्चभवतामिह।प्रादायोपनिधिंराजापांडुःस्वर्गमितोगतः।तस्येमानात्मजान्देहंभा
र्यांचसुमहात्मनः।स्वराष्ट्रंगृह्यगच्छामोधर्मएषहिनःस्मृतः वैशं तेपरस्परमामंत्र्यदेवक
ल्पामहर्षयः।पांडोःपुत्रान्पुरस्कृत्यनगरंनागसाह्वयं।उदारमनसःसिद्धागमनेचक्रिरेमनः।भी
ष्मायपांडवान्दातुंधृतराष्ट्रायचैवहि।तस्मिन्नेवक्षणेसर्वेतानादायप्रतस्थिरे।पांडोर्दारांश्चपुत्रां
श्चशरीरेतेचतापसाः।सुखिनीसापुराभूत्वासततंपुत्रवत्सला।प्रपन्नादीर्घमध्वानंसंक्षिप्तंतद
मन्यत।सात्वदीर्घेणकालेनसंप्राप्ताकुरुजांगलं।वर्द्धमानपुरद्वारमाससादयशस्विनी।द्वारिणं
तापसाऊचूराजानंचप्रकाशय।तेनगत्वाक्षणेनैवसभायांविनिवेदिताः।तंचारणसहस्राणांमु
नीनामागमंतदा।श्रुत्वानागपुरेनृणांविस्मयःसमपद्यत।मुहूर्त्तोदितआदित्येसर्वेबालपुरस्कृ
ताः।सदारास्तापसान्द्रष्टुंनिर्ययुःपुरवासिनः।स्त्रीसंघाःक्षत्रसंघाश्चयानसंघसमास्थिताः।ब्रा

ह्मणैःसहनिर्जग्मुर्ब्राह्मणानांचयोषितः।तथाविट्शूद्रसंघानांमहान्अतिकरोभवत्।नकश्चिदक
श्रा०प० १९३ रोदीर्ष्यामभवन्धर्मबुद्धयः।तथाभीष्मःशांतनवःसोमदत्तोथबाह्लिकः।ब्रह्मावह्नुश्चराजर्षिःकृ
त्वाचविदुरःस्वयं।साचसत्यवतीदेवीकौशल्याचयशस्विनी।राजदारैःपरिवृतागांधारीचापिनिर्य
यौ।धृतराष्ट्रस्यदायादादुर्योधनपुरोगमाः।भूषिताभूषणैश्चित्रैःशतसंख्याविनिर्ययुः।तान्म
हर्षिगणान्हृष्टाञ्शिरोभिरभिवाद्यच।उपोपविविशुःसर्वेकौरव्याःसपुरोहिताः।तथैवशिरसाभूमा
वभिवाद्यप्रणम्यच।उपोपविविशुःसर्वेपौरजानपदाअपि।तमकू— मभिज्ञायजनौघंसर्वशस्त
दा।पूजयित्वायथान्यायंपाद्येनार्घ्येणचप्रभो।भीष्मोराज्यंचराष्ट्रंचमहर्षिभ्योन्यवेदयत्।तेषाम
थोत्कृष्टतमःप्रत्युत्थायजटाजिनी।ऋषीणांमतमाज्ञायमहर्षिरिदमब्रवीत्।यःसकौरव्यदायादः १९३
पांडुर्नामनराधिपः।कामभोगान्परित्यज्यशतशृंगमितोगतः।ब्रह्मचर्यव्रतस्यस्यतस्यदिव्येन
हेतुना।साक्षाद्धर्मादयंपुत्रस्तत्रजातोयुधिष्ठिरः।तथैनंबलिनांश्रेष्ठंतस्यराज्ञोमहात्मनः।मात
रिश्वाददौपुत्रंभीमंनाममहाबलं।पुरुहूतादयंजज्ञेकुंतीसत्यपराक्रमः।यस्यकीर्त्तिर्महेष्वा

सान्सर्वानभिभविष्यति। यौ तु माद्रीमहेष्वासावसूत पुरुषोत्तमौ। अश्विभ्यां पुरुषव्याघ्राविमौ ताव
पि पश्यत। चरता धर्मनित्येन वनवासं यशस्विना। नष्टः पैतामहो वंशः पांडुना पुनरुद्धृतः। पुत्राणां
जन्मवृद्धिं च वैदिकाध्ययनानि च। पश्यतः संततिं पांडोः परां प्रीतिमवाप्स्यथ। वर्त्तमानः सतां वृत्ते पुत्र
लाभमवाप्य च। पितृलोकं गतः पांडुरितः सप्तदशेहनि। तं चितागतमाज्ञाय वैश्वानरमुखे कुंती। प्रवि
ष्टा पावकं माद्री हित्वा जीवितमात्मनः। सा गता सह तेनैव पतिलोकमनुव्रता। तस्यास्तस्य च यत्का
र्यं क्रियतां तदनंतरं। इमे तयोः शरीरे द्वे पुत्राश्चेमे तयोर्वराः। क्रियाभिरनुगृह्यंतां सह मात्रा परं
तपाः। प्रेतकार्ये निर्वृत्ते तु पितृमेधं महायशाः। लभतां सर्वधर्मज्ञः पांडुः कुरुकुलोद्वहः वैश
म् एवमुक्त्वा कुरून्सर्वान्कुरूणामेव पश्यतां। क्षणेनांतर्हिताः सर्वे तापसा गुह्यकैः सह। गंधर्व
नगराकारं तथैवांतर्हितं पुनः॥ ऋषिसिद्धगणं दृष्ट्वा विस्मयं ते परं ययुः इत्यादिपर्वणि संभवे
१२९ धृतराष्ट्र उ पांडोर्विदुर सर्वाणि प्रेतकार्याणि कारय। राजवद्राजसिंहस्य माद्र्याश्चैव
विशेषतः। पशून्वासांसि रत्नानि धनानि विविधानि च। पांडोः प्रयच्छ माद्र्याश्च येभ्यो यावद्वांछितं य

आ०प० धा च कुंती सत्कारं कुर्यान्माद्र्यास्तथा कुरु। यथा न वायुर्नादित्यः पश्येतां तां सुसंवृतां। न शोच्यः पां
१९४ डुरनघः प्रशस्यः स नराधिपः। यस्य पंच सुता वीरा जाताः सुरसुतोपमाः वैशम् विदुरस्तं
तथेत्युक्त्वा भीष्मेण सह भारत। पांडुं संस्कारयामास देशे परमपूजिते। ततस्तु नगरात्तूर्णमाज्यसगंध
पुरस्कृताः। निर्हृताः पावका दीप्ताः पांडो राजन्पुरोहितैः। अथैनमार्त्तवैः पुष्पैर्गंधैश्च विविधैर्वरैः। त्रि
विकां तामलंकृत्य वाससाच्छाद्य सर्वशः। नातथा शोभितां माल्यैर्वासोभिश्च महाधनैः। अमात्या ज्ञा
तयश्चैनं सुहृदश्चोपतस्थि रे। नृसिंहं नरयुक्तेन परमालंकृतेन तं। आवहन्यानमुख्येन सह माद्र्या
सुसंवृतं। पांडुरेणातपत्रेण चामरव्यजनेन च। सर्ववादित्रनादैश्च समलंचक्रिरे ततः। रत्नानि चाप्युपा
दाय बहूनि शतशो नराः। प्रददुः कांक्षमाणेभ्यः पांडोस्तस्यौर्ध्वदैहिके। अथ छत्राणि शुभ्राणि चाम १९४
राणि बृहंति च। आजह्रुः कौरवस्यार्थे वासांसि रुचिराणि च। याजकैः शुक्लवासोभिर्हूयमाना हुता
शनाः। आगच्छन्नग्रतस्तस्य दीप्यमानाः स्वलंकृताः। ब्राह्मणाः क्षत्रिया वैश्याः शूद्राश्चैव सहस्रशः।
रुदंतः शोकसंतप्ता अनुजग्मुर्नराधिपं। अयमस्मानपाहाय दुःखे चाधाय शाश्वते। कृत्वा चास्म

ननाथांस्त्वंक्क्रियास्य सिनराधिप। को शंतः पांडवाः सर्वै भीष्मो विदुर एव च। रमणीये वनोद्देशे गं
गातीरे समे शुभे। न्यासयामासुरथतां शिविकां सत्यवादिनः। सभार्यस्य नृसिंहस्य पांडोरक्लिष्ट
कर्मणः। ततस्तस्य शरीरं तु सर्वगंधविवासितं। शुचिकालीयकादिग्धं दिव्यचंदनभूषितं। पर्य
षिंचन् जलेनाशु शातकुंभमयैर्घटैः। चंदनेन च शुक्लेन सर्वतः समलेपयन्। कालागुरुविमिश्रे
ण तथा तुंगरसेन च। अथैनं देशजैः शुक्लैः वासोभिः समयोजयन्। संछन्नः स नुवासोभिर्जीवन्नि
व नराधिपः। शुशुभे स नरव्याघ्रो महार्हशयनोचितः। याजकैरभ्यनुज्ञाते प्रेतकर्मण्यनुष्ठिते।
घृतावसिक्तं राजानं सह माद्र्यास्वलंकृतं। तुंगपद्मविमिश्रेण चंदनेन सुगंधिना। अन्यैश्च विविधै
र्गंधैर्विस्त्रैस्ते समदाहयन्। ततस्तयोः शरीरे द्वे दृष्ट्वा मोहवशं गता। हा हा पुत्रेति कौशल्या पपात स
हसा भुवि। तां प्रेक्ष्य पतितामार्तां पौरजानपदो जनः। रुरोद दुःखसंतप्तो राजभक्त्या कृपान्वितः। कुं
त्याश्चैवार्तनादेन सर्वाणि च विचुक्रुशुः। मानुषैः सह भूतानि तिर्यग्योनिगतान्यपि। तथा भीष्मः
शांतनवो विदुरश्च महामतिः। सर्वशः कौरवाश्चैव प्राणदन्भृशदुःखिताः। ततो भीष्मोऽथ विदुरो

आ०प० राजाचसहपांडवैः।उदकंचक्रिरेतस्यसर्वाश्चकुरुयोषितः।चुक्रुशुःपांडवाःसर्वेभीष्मःशांतनवस्तथा
१९५ विदुरोज्ञातयश्चैवचक्रुश्चाप्युदकक्रियाः।कृतोदकांस्तानादायपांडवांछोककर्शितान्।सर्वाःप्रक
तयोराजंछोचमानान्यवारयन्।यथैवपांडवाभूमौसुषुपुःसहबांधवैः।तथैवनागराराजंछिश्यिप
रेब्राह्मणादयः।तदकृतानंदमस्वस्थमाकुमारमहृष्टवत्।बभूवपांडवैःसार्द्धंनगरंद्वादशक्षपाः॥
इत्यादिपर्वणिसंभवे १२० वैशम् ततःकुंतीचराजाचभीष्मश्चसहबंधुभिः।ददुःश्राद्धं
तदापांडोःस्वधामृतमयंतदा।कुरूंश्चविप्रमुख्यांश्चभोजयित्वासहस्रशः।रत्नौघान्द्विजमुख्येभ्योद
त्वाग्रामवरांस्तथा।कृतशौचांस्ततस्तांस्तुपांडवान्भरतर्षभान्।आदायविविशुःसर्वेपुरंवारणसा
ह्वयं।सततंस्मान्वशोचंतस्तमेवभरतर्षभं।पौरजानपदाःसर्वेमृतंस्वमिवबांधवं।श्राद्धावसानेतुत १९५
दादृष्ट्वातंदुःखितंजनं।संमूढांदुःखशोकार्त्तांव्यासोमातरमब्रवीत्।अतिक्रांतसुखाःकालाःपर्युप
स्थितदारुणाः।श्वःश्वःपापिष्ठदिवसाःपृथिवीगतयौवना।बहुमायासमाकीर्णोनानादोषस
माकुलः।लुप्तधर्मक्रियाचारोघोरःकालोभविष्यति।कुरूणामनयाच्चापिपृथिवीनभविष्यति॥

गछत्वंयोगमास्थाययुक्तावसतपोवने।माद्राक्षीस्त्वंकुलस्यास्यघोरंसंक्षयमात्मनः।तथेतिस
मनुज्ञायसाप्रविश्याब्रवीत्स्नुषां।अम्बिकेतवपौत्रस्यदुर्नयात्किलभारताः।सानुबंधाविनंक्ष्यं
तिपौत्राश्चैवेतिनःश्रुतं।तत्कौशल्यामिमामार्त्तांपुत्रशोकाभिपीडितां।वनमादायभद्रंतेगच्छाम
यदिमन्यसे।तथेत्युक्तात्वंबिकयाभीष्ममामंत्र्यसुव्रता।वनंययौसत्यवतीस्नुषाभ्यांसहभारत।
ताःसुघोरंतपस्तप्त्वादेव्योभरतसत्तम।देहंत्यक्त्वामहाराजगतिमिष्टांययुस्तदा वैशं
अथाप्नुवंतोवेदोक्तान्संस्कारान्पांडवास्तदा।व्यवर्द्धंतचभोगांस्तेभुंजानाःपितृवेश्मनि।धार्त्तरा
ष्ट्रैश्चसहिताःक्रीडंतोमुदिताःसुखं।बालक्रीडासुसर्वासुविशिष्टास्तेजसाभवन्।जवेलक्ष्याभि
हरणेभोज्येपांशुविकर्षणे।धार्त्तराष्ट्रान्भीमसेनःसर्वान्संपरिमर्द्दति।हर्षादेतान्क्रीडमानांस्तान्गृ
ह्यराजन्निलीयते।शिरःसुचनिगृह्यैतान्विनिहत्यबलाद्बली।चकर्षक्रोशतोभूमौघृष्टजानुशिरों
सकान्।दशवालान्जलेक्रीडन्भुजाभ्यांपरिगृह्यसः।आस्तेस्मसलिलेमग्नोमृतकल्पान्विमुंचति।
फलान्वृक्षमारुह्यविचिन्वंतिचतेयदा।तदापादप्रहारेणभीमःकंपयतिद्रुमान्।प्रहारवेगाभिहता

आ०प० द्रुमाद्व्याघूर्णितास्तदा।सफलाःप्रपतंतिस्मद्रुतंत्रस्ताःकुमारकाः।नतेनयुद्धेनजवेनयोग्यासु
१९६ कदाचन।कुमाराउत्तरंचक्रुःस्पर्द्धमानावृकोदरं।एवंसधार्त्तराष्ट्राणांस्पर्द्धमानोवृकोदरः।अप्रिये
तिष्ठदत्यंतंबाल्यान्नद्रोहचेतसा।ततोबलमतिख्यातंधार्त्तराष्ट्रःप्रतापवान्।भीमसेनस्यतज्ज्ञात्वादुष्ट
भावमदर्शयत्।तस्यधर्मादपेतस्यपापानिपरिपश्यतः।मोहादैश्वर्यलोभाच्चपापामतिरजायत।
अयंबलवतांश्रेष्ठःकुंतीपुत्रोवृकोदरः।मध्यमःपांडुपुत्राणांनिकृत्यासनिगृह्यतां।प्राणवान्विक्र
मीचैवशौर्येणमहतान्वितः।स्पर्द्धतेचापिसहितानस्मानेकोवृकोदरः।तंतुसुप्तंपुरोद्यानेगंगायां
प्रक्षिपामहे।अथतस्मादवरजंश्रेष्ठंचैवयुधिष्ठिरं।प्रसह्यबंधनेबध्वाप्रशासिष्येवसुंधरां।एवंस
निश्चयंपापःकृत्वादुर्योधनस्तदा।नित्यमेवांतरप्रेक्षीभीमस्यासीन्महात्मनः।ततोजलविहारार्थंका १९६
रयामासभारत।चैलकंबलवेश्मानिविचित्राणिमहांतिच।सर्वकामैःसुपूर्णानिपताकोच्छ्रयवंति
च।तत्रसंजनयामासनानागारानुनेकशः।उदकक्रीडनंनामकारयामासभारत।प्रमाणकोट्यां
स्तंदेशंस्थलंकिंचिदुपेत्यह।भक्ष्यभोज्यंचपेयंचचोष्यंलेह्यमथापिच।उपपादितंनरैस्तत्रकुशलैः

सूदकर्मणिान्यवेदयंस्तत्पुरुषाधार्त्तराष्ट्रायवैतदा।ततोदुर्य्योधनस्तत्रपांडवानाहदुर्मतिः।गंगांचै
वानुयास्यामउद्यानवनशोभितां।सहिताभ्रातरः।सर्वेजलक्रीडामवाप्नुमः।एवमस्त्वितितंचापिप्र
त्युवाचयुधिष्ठिरः।ततेरथैर्न्नगराकारैर्देशजैश्चगजोत्तमैः।निर्ययुर्न्नगराच्छूराःकौरवाःपांडवैःसह।उ
द्यानवनमासाद्यविसृज्यचमहाजनं।विशंतिस्मतदावीराःसिंहाइवगिरेर्गुहां।उद्यानमभिपश्यंतोभ्रा
तरःसर्वएवते।उपस्थानगृहैःशुभ्रैर्वलभीभिश्चशोभितं।गवाक्षकैस्तथाजालैःवनसांचारिकैरपि।
संमार्जितंसौधकारैश्चित्रकारैश्चचित्रितं।दीर्घिकाभिश्चपूर्णाभिस्तथापुष्करिणीभिहि।जलंचशुशु
भेच्छन्नंफुल्लैर्जलरुहैस्तथा।उपच्छन्नावसुमतीतथापुष्पैर्यथर्त्तुकैः।तत्रोपविष्टास्तेसर्वेपांडवाःकौ
रवाश्चह।उपच्छन्नान्वहून्कामांस्तेभुंजंतिततस्ततः।ततोदुर्य्योधनःपापस्तद्भक्षेकालकूटकं।विषंप्र
क्षेपयामासभीमसेनजिघांसया।स्वयमुत्थायवैवाथहृदयेनक्षुरोपमः।सवाचामृतकल्पश्चभ्रातृ
वच्चसुहृद्यथा।स्वयंप्रक्षिपतेभक्ष्यंवहुभीमस्यपापकृत्।प्रतीच्छितंस्मभीमेनतंवैदोषमजानता।त
तोदुर्य्योधनस्तत्रहृदयेनहसन्निव।कृतकृत्यमिवात्मानंमन्यतेपुरुषाधमः।ततस्तेसहिताःसर्वे

आ०प०
१८७

जलक्रीडामकुर्वंत पांडवा धार्त्तराष्ट्राश्च तदा मुदितमानसाः। क्रीडावसाने ते सर्वे शुचिवस्त्राः स्वलंकृताः।
दिवसांते परिश्रांता विहृत्य च कुरूद्वहाः। विहारावसथेष्वेव वीरा वासमरोचयन्। खिन्नस्तु बलवान् भीमो
व्यायम्याभ्यधिकं तदा। प्रमाणकोट्यां वासार्थी सुष्वापाचाप्य तत्स्थलं। शीतं वातं समासाद्य श्रांतो मद
विमोहितः। विषेण च परीतांगो निश्चेष्टः पांडुनंदनः। ततो बद्ध्वा लतापाशैर्भीमं दुर्योधनः स्वयं। मृतकं
तं तदा वीरं स्थलाज्जलमपातयत्। स निःसंज्ञो जलस्यांतमथ वै पांडवो विशत्। आक्रामन्नागभवने
तदा नागकुमारकान्। ततः समेत्य बहुभिस्तदा नागैर्महाविषैः। अदस्यत भृशं भीमो महादंष्ट्रैर्विषोल्ब
णैः। ततोस्य दस्यमानस्य तद्विषं कालकूटकं। हतं सर्पविषेणैव स्थावरं जंगमेन तु। दंष्ट्राश्च दंष्ट्रिणां ते
षां मर्मस्वपि निपातिताः। त्वचं नैवास्य विभिदुः सारत्वात्पृथुवक्षसः। ततः प्रबुद्धः कौंतेयः सर्वं संछिद्य १८७
बंधनं। पोथयामास तान्सर्वान्के चिद्भीताः प्रदुद्रुवुः। हतावशेषा भीमेन सर्वे वासुकिमभ्ययुः। ऊचुश्च
सर्पराजानं वासुकिं वासवोपमं। अयं नरो वै नागेंद्र ह्यप्सु बद्ध्वा प्रवेशितः। यथा च नो मतिर्वीर विषपी
तो भविष्यति। निश्चेष्टोस्माननुप्राप्तः स च दष्टोन्वबुध्यत। ससंज्ञश्चापि संवृत्तश्छित्वा बंधनमाशु नः। पो

थयंतंमहावाहुंत्वंचैतंज्ञातुमर्हसि।ततोवासुकिरभ्येत्यनागैरनुगतस्तदा।पश्यतिस्ममहावाहुंभीमं
भीमपराक्रमं।आर्य्यकेणचदृष्टःसपृथायाआर्य्यकेणचा।तदादौहित्रदौहित्रःपरिष्वक्तःसुपीडितं।सु
प्रीतश्चाभवत्तस्यवासुकिःसुमहायशाः।अब्रवीत्तंचनागेंद्रःकिमस्यक्रियतांप्रियं।धनौघोरत्ननिच
योवसुचास्यप्रदीयतां।एवमुक्तस्तदानागोवासुकिंप्रत्यभाषत।यदिनागेंद्रतुष्टोसिकिमस्यधनसंच
येः।रसंपिवेत्कुमारोयंत्वयिप्रीतेमहावलः।वलंनागसहस्रस्ययस्मिन्कुंडेप्रतिष्ठितं।यावत्पिवति
वालोयंतावदस्मैप्रदीयतां।एवमस्त्वितितंनागंवासुकिःप्रत्यभाषत।ततोभीमस्तदानागैःकृतस्व
स्त्ययनःशुचिः।प्राङ्मुखश्चोपविष्टःसरसंपिवतिपांडवः।एकोच्छ्वासात्ततःकुंडंपिवतिस्ममहावलः।ए
वमष्टौसकुंडानिह्यपिवत्पांडुनंदनः।ततस्तुशयनेदिव्येनागदत्तेमहाभुजः।अशेतभीमसेनस्तुयथा
सुखमरिंदमः।। इत्यादिपर्वणि १२१ वैशं ततस्तेकौरवाःसर्वेविनाभीमंचपांडवाः।
वृत्तक्रीडाविहारास्तुप्रतस्थुर्गजसाह्वयं।रथैर्गजैस्तथाचाश्वैर्यानैश्चान्यैरनेकशः।ब्रुवंतोभीमसेन
स्तुयातोह्यग्रतयेवनः।ततोदुर्य्योधनःपापस्तत्रापश्यन्वृकोदरं।भ्रातृभिःसहितोहृष्टोनगरंप्रविवेश

आ०प०
१९८

हायुधिष्ठिरस्तुधर्मात्मा।ध्यविंदध्यायमात्मनि।स्वेनानुमानेनपरंसाधुंसमनुपश्यति।सोभ्युपेत्यतदापा
र्थोमातरंभ्रातृवत्सलः।अभिवाद्याब्रवीत्कुंतीमंवभीमइहागतः।क्कगतोभवितामातर्नेहपश्यामितंशुभे।
उद्यानानिवनंचैवविचितानिसमंततः।तदर्थेनचतंवीरंदृष्टवंतोवृकोदरं।मन्यमानास्ततःसर्वेयातोनः
पूर्वमेवसः।आगतास्ममहाभागेव्याकुलेनांतरात्मना।इहागम्यक्कनुगतस्त्वयावाप्रेषितःक्कनु।कथय
स्वमहाबाहुंभीमसेनंयशस्विनी।नह्रिमेशुध्यतेभावस्तंवीरंप्रतिशोभने।यतःप्रसुप्तमन्येहंभीमंनेति
हतस्तुसः।इत्युक्ताचततःकुंतीधर्मराजेनधीमता।हाहेतिकृत्वासंभ्रांताप्रत्युवाचयुधिष्ठिरं।नपुत्रभी
मंपश्यामिनमामभ्येत्यसाविति।शीघ्रमन्वेषणेयत्नंकुरुतस्मानुजैःसह।इत्युक्त्वातनयंज्येष्ठंहृदयेन
विदूयता।क्षत्तारमानाय्यतदाकुंतीवचनमब्रवीत्।क्कगतोभगवन्क्षत्तर्भीमसेनोनदृश्यते।उद्यानान्नि १९८
र्गताःसर्वेभ्रातरोभ्रातृभिःसह।तत्रैकस्तुमहाबाहुर्भीमोनाभ्येतिमामिह।नचप्रीणयतेचक्षुःसदादुर्योध
नस्यसः।क्रूरोसौदुर्मतिःक्षुद्रोराज्यलुब्धोनपत्रपः।निहन्यादपितंवीरंजातमन्युःसुयोधनः।तेनमेव्याकु
लंचित्तंहृदयंदह्यतीवच विदुरउवाच मैवंवदस्वकल्याणिशेषसंरक्षणंकुरु।प्रत्यादिष्टोहिदु

ष्टात्मान्नोषेपिप्रवरेत्तवादीर्घायुषस्तवसुतायथोवाचमहामुनिः॥आगमिष्यतितेपुत्रःप्रीतिंचोत्पादयिष्य
ति॥ वैशं एवमुक्त्वाययौविद्वान्विदुरःस्वंनिवेशनं।कुंतीचिंतापराभूत्वासमहासीनासुतैर्गृहे।त
तोष्टमेतुदिवसेप्रत्यबुध्यतपांडवः।तस्मिंस्तदारसेजीर्णेसोऽप्रमेयबलोबली।तंदृष्ट्वाप्रतिबुध्यंतंपांडवंतेभु
जंगमाः।सांत्वयामासुरव्यग्रावचनंचेदमब्रुवन्।यत्तेपीतोमहाबाहोरसोयंवीर्यसंभृतः।तस्मान्नागायुत
बलोरणेऽधृष्योभविष्यसि।गच्छाद्यचत्वंस्वगृहंस्नातोदिव्यैरिमैर्जलैः।भ्रातरस्तेतुतप्यंतित्वांविनाकुरुपुं
गव।ततःस्नातोमहाबाहुःशुचिःशुक्लांबरःस्रजः।ततोनागस्यभवनेकृतकौतुकमंगलः।औषधीभिर्विष
घ्नीभिःसुरभीभिर्विशेषतः।भुक्तवान्परमान्नंचनागैर्दत्तंमहाबलैः।पूजितोभुजगैर्वीरआशीर्भिश्चाभिनं
दितः।दिव्याभरणसंछन्नोनागानामंत्र्यपांडवः।उदतिष्ठत्प्रहृष्टात्मानागलोकादरिंदमः।उत्क्षिप्तःसतुना
गेनजलाज्जलरुहेक्षणः।तस्मिन्नेववनोद्देशेस्थापितःकुरुनंदनः।तेचान्तर्दधिरेनागाःपांडवस्यैवपश्यतः।त
तउत्थायकौंतेयोभीमसेनोमहाबलः।आजगाममहाबाहुर्मातुरंतिकमंजसा।ततोभिवाद्यजननींज्येष्ठंभ्रा
तरमेवच।कनीयसःसमाघ्रायशिरःस्वरिविमर्दनः।तैश्चापिसंपरिष्वक्तःसहमात्रानरर्षभैः।अन्योन्यगत

श्री०प०
१९८

सोहार्दादिष्ट्यादिष्ट्येतिचाब्रुवन्।ततस्तत्सर्वमाचष्टदुर्योधनविचेष्टितं।भ्रातॄणांभीमसेनश्चमहाबलपराक्र
मः।नागलोकेचयद्वृत्तंगुणदोषमशेषतः।तच्चसर्वमशेषेणकथयामासपांडवः।ततोयुधिष्ठिरोराजाभीम
माहवचोर्थवत्।तूष्णींभवनतेजल्प्यमिदंकार्यंकथंचन।इतःप्रभृतिकौंतेयारक्षतान्योन्यमादृताः।एवमु
क्त्वामहाबाहुर्धर्मराजोयुधिष्ठिरः।भ्रातृभिःसहितःसर्वैरप्रमत्तोभवत्तदा।एवंदुर्योधनःकर्णःशकुनिश्चा
पिसौबलः।अनेकैरभ्युपायैस्तान्जिघांसंतिस्मपांडवान्।पांडवाश्चापितत्सर्वंप्रत्यज्ञानन्नमर्षिताः।उद्भाव
नमकुर्वंतोविदुरस्यमतेस्थिताः इत्यादिपर्वणि १२२ जनमेजय उ कृपस्यापिममब्रह्मन्सं
भवंवक्तुमर्हसि।शरस्तंबात्कथंजज्ञेकथंचास्त्राण्यवाप्तवान्॥ वैशं ॥महर्षेर्गौतमस्यासीच्छरद्वान्ना
मगौतमः।पुत्रःकिलमहाराजजातःसहशरैर्विभो।नतस्यवेदाध्ययनेतथाबुद्धिरजायत।धनुर्वेदपरत्वा १९८
त्तपसाविपुलेनच।भृशंसंतापयामासदेवराजंसगौतमः।ततोजानपदींनामदेवकन्यांसुरेश्वरः।प्राहि
णोत्तपसोविघ्नंकुरुतस्येतिकौरव।साहिगत्वाश्रमंतस्यरमणीयंशरद्वतः।धनुर्बाणधरंबालालोभ
यामासगौतमं।तामेकवसनांदृष्ट्वागौतमोप्सरसंवने।लोकेऽप्रतिमसंस्थानामुत्फुल्लहृदयोभ

वता।धनुश्चहिच्छराश्चतस्यकराभ्यामपतन्भुवि।वेपथुश्चास्यतांदृष्ट्वाशरीरेसमजायत।सतुज्ञानग
रीयस्त्वात्तपसश्चसमर्थनात्।अवतस्थेमहाप्राज्ञोधैर्येणपरमेणह।यस्तस्यसहसाराजन्विकारः
समदृश्यत।तेनसुस्राववरेतोस्यसचतन्नावबुध्यत।सविहायाश्रमंतंचतांचैवाप्सरसंमुनिः।जगा
मरेतस्तत्तस्यशरस्तंबेपपातच।शरस्तंबेचपतितंद्विधातदभवन्नृप।तस्याथमिथुनंजज्ञेगौतमस्य
शरद्वतः।मृगयांचरतोराज्ञःशंतनोस्तुयदृच्छया।कश्चित्सेनाचरोरण्येमिथुनंतदपश्यत।धनुश्चस
शरंदृष्ट्वातथाकृष्णाजिनानिच।ज्ञात्वाद्विजस्यापत्येवैधनुर्वेदांतगस्यह।सराज्ञेदर्शयामासमिथुनं
सशरंधनुः।सतदादायमिथुनंराजाथकृपयान्वितः।आजगामगृहानेवममपुत्राविति ब्रुवन्।ततः
संवर्द्धयामाससंस्कारैश्चाप्ययोजयत्।प्रातिपेयोनरश्रेष्ठोमिथुनंगौतमस्यतत्।गौतमोपिततोभ्ये
त्यधनुर्वेदपरोभवत्।कृपयायन्मयाबालाविमौसंवर्द्धितावितिा।तस्मात्तयोर्नामचक्रेतदेवसमही
पतिः।गोपितौगौतमस्तत्रतपसासमविंदत।आगत्यतस्मैगोत्रादिसर्वमाख्यातवांस्तदा।चतुर्विधं
धनुर्वेदंशस्त्राणिविविधानिच।निखिलेनास्यतत्सर्वंगुह्यमाख्यातवांस्तदा।सोचिरेणैवकालेन

आ०प० परमाचार्य्यतां गतः। ततोऽधिजग्मुः सर्वेते धनुर्वेदं महारथाः। धृतराष्ट्रात्मजाश्चैव पांडवाः सह्यादवैः।
२०० वृष्णयश्च नृपाश्चान्ये नानादेशसमागताः॥ इत्यादिपर्व्वणि १२२ वैशं विशेषार्थी त
तो भीष्मः पौत्राणां विनयेप्सया। इष्वस्त्रज्ञान्पर्य्यपृच्छदाचार्य्यान्वीर्य्यसंमतान्। नाल्पधीर्न्नामहाभा
गस्तथानानस्त्रकोविदः। नादेवसत्वो विनयेत्कुरून स्त्रेमहावलान्। इति संचिन्त्यगांगेयस्तदाभरतस
त्तमः। द्रोणाय वेदविदुषे भारद्वाजाय धीमते। पांडवाकौरवांश्चैव ददौ शिष्यान्नरर्षभः। शास्त्रतः
पूजितश्चैव सम्यक्तेन महात्मना। सभीष्मेण महाभागस्तुष्टोस्त्रविदुषांवरः। प्रतिजग्राह तान्सर्वान्
शिष्यत्वेन महायशाः। शिक्षयामास च द्रोणो धनुर्वेदमशेषतः। तेऽचिरेणैव कालेन सर्वशस्त्रविशा
रदाः। वभूवुः कौरवा राजन्पांडवाश्चामितौजसः। जनमेजय उ कथं समभवद्द्रोणः कथं वा २००
स्त्राण्यवाप्तवान्। कथं चागात्कुरून्ब्रह्मन्कस्य पुत्रः स वीर्य्यवान्। कथं वास्य सुतो जातः सोश्वत्थामा
स्त्रवित्तमः। एतदिच्छाम्यहं श्रोतुं विस्तरेण प्रकीर्त्तय वैशं गंगाद्वारं प्रति महान्बभूव भगवान्
षिः। भरद्वाज इति ख्यातः सततं संशितव्रतः। सोभिषेक्तुं ततो गंगां पूर्वमेवागमन्नदीं। ददर्शाप्सरसं

साक्षात्घृताचीमाप्लुतामृषिभिः।तस्याःपुनर्नदीतीरेवसनंपर्यवर्त्तत।व्यपकृष्टांवरांदृष्ट्वातामृषिश्च
कमेततः।तत्रसंसक्तमनसोभरद्वाजस्यधीमतः।ततोस्यरेतश्चस्कंदतदृषिर्द्रोणआदधे।ततःस
मभवद्द्रोणःकलशेतस्यधीमतः।अध्यगीष्टसवेदांश्चवेदांगानिचसर्वशः।अग्निवेश्यंमहाभागंभा
रद्वाजःप्रतापवान्।प्रत्यपादयदाग्नेयमस्त्रमस्त्रविदांवरः।अग्नेस्तुजातःसमुनिस्ततोभरतसत्तम
।भारद्वाजंतदाग्नेयंमहास्त्रंप्रत्यपादयत्।भरद्वाजसखाचासीत्पृषतोनामपार्थिवः।तस्यापिद्रुपदो
नामतदासमभवत्सुतः।सनित्यमाश्रमंगत्वाद्रोणेनसहपार्षतः।चिक्रीडाध्ययनंचैवचकारक्षत्रिय
र्षभः।ततोव्यतीतेपृषतेसराजाद्रुपदोभवत्।पांचालेषुमहाबाहुरुत्तरेषुनरेश्वरः।भरद्वाजोपिभग
वानारुरोहदिवंतदा।तत्रैवचवसन्द्रोणस्तपस्तेपेमहातपाः।वेदवेदांगतत्वज्ञस्तपसादग्धकिल्बि
षः।ततःपितृनियुक्तात्मापुत्रलोभान्महायशाः।शारद्वतींततोभार्यांकृपींद्रोणोन्वविंदत।अग्निहोत्रेचध
र्मेचदमेचसततंरतां।अलभद्गौतमीपुत्रमश्वत्थामानमेवच।सजातमात्रोव्यनदद्यथैवोच्चैःश्रवा
हयः।तच्छ्रुत्वांतर्हितंभूतमंतरिक्षस्थमब्रवीत्।अश्वस्येवास्ययत्स्थामनदतःप्रदिशोगतं।अश्वत्था

मेव वालोयं तस्मान्नाम्नाभविष्यति। सुतेन तेन सुप्रीतो भारद्वाजस्ततोभवत्। तत्रैव च वसन्धीमान्धनुर्वेदप
रोभवत्। सशुश्राव महात्मानं जामदग्न्यं परंतपं। सर्वज्ञानविदं विप्रं सर्वशस्त्रभृतां वरं। ब्राह्मणेभ्यस्तथा रा
जन्दित्संतं च वसु सर्वशः। स रामस्य धनुर्वेदं दिव्यान्यस्त्राणि चैव ह। श्रुत्वा तेषु मनश्चक्रे नीतिशास्त्रे तथैव च।
ततः स व्रतिभिः शिष्यैस्तपोयुक्तैर्महातपाः। वृतः प्रायान्महाबाहुर्महेन्द्रं पर्वतोत्तमं। ततो महेन्द्रमासाद्य भा
रद्वाजो महातपाः। क्षांतं दांतममित्रघ्नमपश्यद्भृगुनंदनं। ततो द्रोणो वृतः शिष्यैरुपगम्य भृगूद्वहं। आ
चख्यावात्मनो नाम जन्म चांगिरसः कुले। निवेद्य शिरसा भूमौ पादौ चैवाभ्यवादयत्। ततस्तं सर्वमु
त्सृज्य वनं जिगमिषुं तदा। जामदग्न्यं महात्मानं भारद्वाजोब्रवीदिदं। भरद्वाजात्समुत्पन्नं तथा त्वं मामयो
निजं। आगतं वित्तकामं मां विद्धि द्रोणं द्विजोत्तमं। तमब्रवीन्महात्मा स सर्वक्षत्रियमर्दनः। स्वागतं ते द्वि २०२
जश्रेष्ठ यदिच्छसि वदस्व मे। एवमुक्तस्तु रामेण भारद्वाजोब्रवीद्वचः। रामं प्रहरतां श्रेष्ठं दित्संतं विवुधं व
सु। अहं धनमनंतं हि प्रार्थयेविपुलव्रत रामउवाच हिरण्यं मम यच्चान्यद्वसु किंचिदिह स्थितं।
ब्राह्मणेभ्यो मया दत्तं सर्वमेतत्तपोधन। तथैवेयं धरा देवी सागरान्ता सपत्तना। कश्यपाय मया दत्ता कृ

त्रानगरमालिनी। शरीरमात्रमेवाद्य ममेदमवशेषितं। अस्त्राणि च महार्हाणि शस्त्राणि विविधानि च।
अस्त्राणि वा शरीरं वा वरमेतन्मयोद्यतं। वृणीष्व किं प्रयच्छामि तुभ्यं द्रोण वदाशु तत् द्रोण उ ॥
अस्त्राणि मे समग्राणि ससंहाराणि भार्गव। सप्रयोगरहस्यानि दातुमर्हस्यशेषतः। तथेत्युक्त्वा ततस्त
स्मै प्रादादस्त्राणि भार्गवः। सरहस्यव्रतं चैव धनुर्वेदमशेषतः इत्यादिपर्वणि १२४ वैशं
ततो द्रुपदमासाद्य भारद्वाजः प्रतापवान्। अब्रवीत्पार्थिवं राजन्सखायं विद्धि मामिह। इत्येवमुक्तः सख्या
स प्रीतिपूर्वं जनेश्वरः। भारद्वाजेन पांचाल्यो नामृष्यत वचोस्य तत्। स क्रोधामर्षजिह्मभ्रूः कषायीकृ
तलोचनः। ऐश्वर्यमदसम्पन्नो द्रोणं राजाब्रवीदिदं द्रुपद उ अकृतेयं तव प्रज्ञा ब्रह्मन्नातिस
मजसी। यन्मां ब्रवीषि विप्र त्वं सखा तेहमिति द्विज। नहि राज्ञामुदीर्णानामेवंभूतैर्नरैः क्वचित्। सख्यं भ
वति मंदात्मन् श्रिया हीनैर्धनच्युतैः। सौहृदान्यपि जीर्यन्ते कालेन परिजीर्यता। सौहृदं मे त्वया ह्यासीत्पू
र्वं सामर्थ्यबंधनं। न सख्यमजरं लोके हृदि तिष्ठति कस्यचित्। कालो ह्येनं विहरति क्रोधो वैनं हरत्युत। मै
वं जीर्णमुपास्स्व त्वं सख्यं भवत्वपाकृधि। आसीत्सख्यं द्विजश्रेष्ठ त्वया मेर्थनिबंधनं। न दरिद्रो वसुमतो ना

आ०प० विद्वांश्चाविदुषःसखा।नशूरस्यसखाक्लीवःसखिपूर्वंकिमिष्यते।ययोरेवसमंवित्तंययोरेवसमंश्रुतं।
२०२ तयोर्विवादःसख्यंचनतुपुष्टविपुष्टयोः।नाश्रोत्रियःश्रोत्रियस्यनारथीरथिनःसखा।नाराजापा
र्थिवस्यापिसखिपूर्वंकिमिष्यसे वैशं द्रुपदेनैवमुक्तस्तुभारद्वाजःप्रतापवान्।मुहूर्तंचिंत
यित्वातुमन्युनाभिपरिप्लुतः।सविनिश्चित्यमनसापांचाल्यंप्रतिबुद्धिमान्।जगामकुरुमुख्यानांनग
रंनागसाह्वयं।सनागपुरमागम्यगौतमस्यनिवेशने।भारद्वाजोवसत्तत्रप्रच्छन्नंद्विजसत्तमः।ततोऽस्य
तनुजःपार्थान्कृपस्यानंतरंप्रभुः।अस्त्राणिशिक्षयामासनाबुध्यंतचतंजनाः।एवंसतत्रगूढात्मा
कंचित्कालमुवासह।कुमारास्त्वथनिष्क्रम्यसमेतागजसाह्वयात्।क्रीडंतोवीटयातत्रवीराःपर्य
चरन्मुदा।पपातकूपेसावीटातेषांवैक्रीडतांतदा।ततस्तेयत्नमातिष्ठन्वीटामुद्धर्तुमादृताः।नचतेप्र २०२
त्यपद्यंतकर्मवीटोपलब्धये।ततोऽन्योन्यमवैक्षंतव्रीडयावनताननाः।तस्यायोगमविंदंतोभृशंचो
त्कंठिताभवन्।तेपश्यन्ब्राह्मणंश्याममापन्नंपलितंकृशं।कृत्यवंतमदूरस्थमग्निहोत्रपुरस्कृ
तं।तेतंदृष्ट्वामहात्मानमुपगम्यकुमारकाः।भग्नोत्साहक्रियात्मानोब्राह्मणंपर्य्यवारयन्।अथ

द्रोणःकुमारांस्तान्दृष्ट्वाकृत्यवतस्तदा।प्रहस्यमंदंपैशल्यादभ्यभाषतवीर्यवान्।अहोवोधिग्ब
लंक्षात्रंधिगेतांवःकृतास्त्रतां।भरतस्यान्वयेजातायेवीटांनाधिगच्छथ।वीटांचमुद्रिकांचैवह्य
हमेतदपिद्वयं।उद्धरेयमिषीकाभिर्भोजनंमेप्रदीयतां।एवमुक्त्वाकुमारांस्तान्द्रोणःस्वांगुलिवे
ष्टनं।कूपेनिरुदकेतस्मिन्नपातयदरिंदमः।ततोब्रवीत्तदाद्रोणंकुंतीपुत्रोयुधिष्ठिरः युधि
ष्ठिरउ कृपस्यानुमतेब्रह्मन्भिक्षामप्नुहिशाश्वतीं।एवमुक्तःप्रत्युवाचप्रहस्यभरतानिदं।
द्रोणउवाच एषमुष्टिरिषीकाणांमयास्त्रेणाभिमंत्रितः।अस्यावीर्यंनिरीक्षध्वंयदन्यस्यनवि
द्यते।भेत्स्यामीषीकयावीटांतामिषीकांतथान्यया।तामन्ययासमायोगेवीटायाग्रहणंमम
वैशं ततोयथोक्तंद्रोणेनतत्सर्वंकृतमंजसा।तदवेक्ष्यकुमारास्तेविस्मयोत्फुल्ललोचनाः।आश्च
र्यमिदमत्यंतमितिमत्वावचोब्रुवन् कुमाराऊचुः मुद्रिकामपिविप्रर्षेशीघ्रमेतांसमुद्धर
वैशं ततस्सशरमादायधनुर्द्रोणोमहायशाः।शरेणविद्ध्वांमुद्रांतामूर्ध्वमावाहयत्प्रभुः।सशरंस
मुपादायकूपादंगुलिवेष्टनं।ददौततःकुमाराणांविस्मितानामविस्मितः।मुद्रिकामुद्धृतांदृष्ट्वातमा

आ०प० कुन्तेकुमारकाः कुमाराऊचुः अभिवादयामहे ब्रह्मन्नैतदन्येषुविद्यते। कोसिकस्मासिजा
२०३ नीमोवयंकिंकरवामहे वैशं एवमुक्तस्तानोद्रोणःप्रत्युवाचकुमारकान्॥ द्रोणउ ॥आच
क्ष्ध्वंवभीष्मायरूपेणचगुणैश्चमां। सएवसुमहातेजाःसांप्रतंप्रतिपत्स्यते वैशं तथेत्युक्त्वाच
गत्वाचभीष्ममूचुःकुमारकाः। ब्राह्मणस्यवचस्तथ्यंतच्चकर्मतथाविधं। भीष्मःश्रुत्वाकुमाराणांद्रो
णंतंप्रत्यजानत। युक्तरूपःसहिगुरुरित्येवमनुचिन्त्यच। अथैनमानीयतदास्वयमेवसुसत्कृतं। परि
पप्रच्छनिपुणंभीष्मःशस्त्रभृतांवरः। हेतुमागमनेतच्चद्रोणःसर्वन्यवेदयत् द्रोणउ महर्षे
रग्निवेशस्यसकाशमहमच्युत। अस्त्रार्थमगमंपूर्वंधनुर्वेदचिकीर्षया। ब्रह्मचारीविनीतात्माजटि
लोवहुलाःसमाः। अवसंसुचिरंतत्रगुरुशुश्रूषणेरतः। पांचाल्योराजपुत्रश्चयज्ञसेनोमहावलः। इ २०३
ष्वस्त्रहेतोर्न्यवसत्तस्मिन्नेवगुरौप्रभुः। समेतत्रसखाचासीदुपकारीप्रियश्चमे। तेनाहंसहसंगम्यव
र्तयन्सुचिरंविभो। वाल्यात्प्रभृतिकौरव्यसहाध्ययनमेवच। समेसखासदातत्रप्रियवादीप्रियंकरः।
अव्रवीदितिमांभीष्मवचनंप्रीतिवर्द्धनं। अहंप्रियतमःपुत्रःपितुर्द्रोणमहात्मनः। अभिषेक्ष्यतिमांरा

ज्येसयांचाल्यो यदा तदा। त्वद्भोग्यं भविता राज्यं सखे सत्येन ते शपे। मम भोगाश्च वित्तं च त्वदधीनं सु
खानि च। एवमुक्ताथ वव्राज कृतास्त्रः पूजितो मया। तच्च वाक्यमहं नित्यं मनसा धारयंस्तदा। सोहं पि
तृनियोगेन पुत्रलोभाद्यशस्विनीं। नातिकेशीं महाप्राज्ञामुपयेमे महाव्रतां। अग्निहोत्रे च सत्ये च दमे च
मनतं रतां। अलभं गौतमी पुत्रमश्वत्थामानमौरसं। भीमविक्रमकर्माणमादित्यसमतेजसं। पुत्रेण
तेन प्रीतोहं भरद्वाजो मया यथा। गोक्षीरं पिबतो दृष्ट्वा धनिनस्तत्र पुत्रकान्। अश्वत्थामारुदद्बालस्त
न्मे संदेहयद्दिशः। नस्नातकोऽवसीदेत वर्त्तमानः स्वकर्मसु। इति संचिंत्य मनसा तं देशं बहुशो भ्रम
न्। विशुद्धमिच्छन्गांगेय धर्म्योपेतं प्रतिग्रहं। अंतादंतं परिक्रम्य नाध्यगच्छं पयस्विनीं। अथ पिष्टोदके
नैनं लोभयंति कुमारकाः। पीत्वा पिष्टरसं बालः क्षीरं पीतं मयापि च। ननर्त्तोत्थाय कौरव्य हृष्टो बाल्या
द्विमोहितः। तं दृष्ट्वा नृत्यमानं तु बालैः परिवृतं सुतं। हास्यतामुपसंप्राप्तं कश्मलं तत्र मे भवत्। द्रोणं धि
गस्त्वधनिनं यो धनं नाधिगच्छति। पिष्टोदकं सुतो यस्य पीत्वा क्षीरस्य तृष्णया। नृत्यति स्म मुदाविष्टः क्षी
रं पीतं मयाप्युत। इति संभाषतां वाचं श्रुत्वा मे बुद्धिरभ्यवत्। आत्मानं चात्मना गर्हन्मनसेदं व्यचिंतयं।

आ०प०
२०४

अपिचाहंपुराविप्रैर्वर्जितोगर्हितोभृशं।परोपसेवांपापिष्ठांनचकुर्य्यांधनेप्सया।इतिमत्वाप्रियंपुत्रं
भीष्मादायततोह्यहं।पूर्वस्नेहानुरागित्वात्सदारःसौमकिंगतः।अभिषिक्तंतुश्रुत्वैवकृतार्थोस्मीति
चिंतयन्।प्रियंसखायंसुप्रीतोराज्यस्थंसमुपागमं।संस्मरन्संगमंचैववचनंचैवतस्यतत्।ततोद्रुप
दमागम्यसखिपूर्वमहंप्रभो।अब्रुवंपुरुषव्याघ्रसखायंविद्धिमामिति।उपस्थितस्तुद्रुपदंसखिव
च्चास्मिसंगतः।समांनिराकारमिवप्रहसन्निदमब्रवीत्।अकृतेयंतवप्रज्ञाब्रह्मन्नातिसमंजसा।यद
दात्थमांत्वंप्रसभंसखातेहमितिद्विज।संगतानीहजीर्य्यंतेकालेनपरिजीर्य्यता।सोहृदंमेत्वयाह्या
सीत्पूर्वंसामर्थ्यबंधनं।नाश्रोत्रियःश्रोत्रियस्यनारथीरथिनःसखा।साम्याद्धिसख्यंभवतिवैषम्यान्नो
पपद्यते।नसख्यमजरंलोकेविद्यतेजातुकस्यचित्।कालोवैनंविहरतिक्रोधोवैनंहरत्युत।मैवंजीर्ण २०४
मुपास्वत्वंसख्यंभवत्वपाकृधि।आसीत्सख्यंद्विजश्रेष्ठत्वयामेर्थनिबंधनं।नह्यनाढ्यःसखाढ्यस्यना
विद्वान्विदुषःसखा।नशूरस्यसखाक्लीवःसखिपूर्वंकिमिष्यते।नहिराज्ञामुदीर्णानामेवंभूतैर्न्नरैःक्व
चित्।सख्यंभवतिमंदात्मन्श्रियाहीनैर्द्धनच्युतैः।नाश्रोत्रियःश्रोत्रियस्यनारथीरथिनःसखा।ना

राज्ञापार्थिवस्यापिसखिपूर्वंकिमिष्यते।अहंत्वयानजानामिराज्यार्थेसंविदंकृतां।एकरात्रंतुतेब्रह्म
कामंदास्याभिभोजनं।एवमुक्तस्त्वहंतेनसदारःप्रस्थितस्तदा।तांप्रतिज्ञांप्रतिज्ञाययांकर्त्तास्म्यवि
रादिव।द्रुपदेनैवमुक्तोहंमन्युनाभिपरिप्लुतः।अभ्यगच्छंकुरून्भीष्मशिष्यैरर्थीगुणान्वितैः।ततोहंभ
वतःकामंसंवर्द्धयितुमागतः।इदंनागपुरंरम्यंब्रूहिकिंकरवाणिते वैशं एवमुक्तस्तदाभीष्मो
भारद्वाजमभाषत भीष्मउ अपज्यंक्रियतांचापंसाध्वस्त्रंप्रतिपादय।भुंक्ष्वभोगान्भृशंप्री
तःपूज्यमानःकुरुक्षये।कुरूणामस्तियद्वित्तंराज्यंचेदंसराष्ट्रकं।त्वमेवपरमोराजासर्वेचकुरवस्त
वायच्चतेप्रार्थितंब्रह्मन्कृतंतदितिचिन्त्यतां।दिष्ट्याप्राप्तोसिविप्रर्षेमहान्मेनुग्रहःकृतः इत्या
दिपर्वणि १२५ वैशं ततःसंपूजितोद्रोणोभीष्मेणद्विपदांवरः।विशश्राममहातेजाःपूजि
तःकुरुवेश्मनि।विश्रांतेथगुरौतस्मिन्पौत्रानादायकौरवान्।शिष्यत्वेनददौभीष्मोवसूनिविविधानि
चागृहंचसुपरिच्छिन्नंधनधान्यसमाकुलं।भारद्वाजायसुप्रीतःप्रत्यपादयतप्रभुः।सतांच्छिष्यान्महेष्वा
सःप्रतिजग्राहकौरवान्।पांडवान्धार्त्तराष्ट्रांश्चद्रोणोमुदितमानसः।प्रतिगृह्यचतान्सर्वान्द्रोणोवचनम

आ॰प॰ ब्रुवीत। रहस्येकः प्रतीतात्मा कृतोपसदनांस्तथा॥ द्रोण उ ॥कार्य्यमेकं कांक्षितं किंचिद्धृदि संपरिवर्त्ति
२०५ ते। कृतास्त्रैस्तत्प्रदेयं मे तदृतं वदतानघाः वैशं तच्छ्रुत्वा कौरवायास्ते तूष्णीमासन्विशांपते। अर्जुन
स्तु ततः सर्वं प्रतिजज्ञे परंतप। ततोऽर्जुनं तदा मूर्द्ध्नि समाघ्राय पुनः पुनः। प्रीतिपूर्वं परिष्वज्य प्ररुरोद
मुदा तदा। ततो द्रोणः पांडुपुत्रानस्त्राणि विविधानि च। ग्राहयामास दिव्यानि मानुषाणि च वीर्य्यवान्। रा
जपुत्रास्तथा चान्ये समेत्य भरतर्षभ। अभिजग्मुस्ततो द्रोणमस्त्रार्थे द्विजसत्तमं। वृष्णयश्चांधकाश्चैव
नानादेश्याश्च पार्थिवाः। सूतपुत्रश्च राधेयो गुरुं द्रोणमियात्तदा। स्पर्द्धमानस्तु पार्थेन सूतपुत्रोऽत्यमर्ष
णः। दुर्योधनमुपाश्रित्य सोऽवमन्यत पांडवान्। अभ्ययात्स ततो द्रोणं धनुर्वेदचिकीर्षया। शिक्षाभुज
बलोद्योगैस्तेषु सर्वेषु पांडवः। अस्त्रविद्यानुरागाच्च विशिष्टोऽभवदर्जुनः। तुल्येष्वस्त्रप्रयोगेषु लाघवे २०५
सौष्ठवेषु च। सर्वेषामेव शिष्याणां बभूवाभ्यधिकोऽर्जुनः। ऐंद्रिमप्रतिमं द्रोण उपदेशेष्वमन्यत। एवं सर्व
कुमाराणामिष्वस्त्रं प्रत्यपादयत्। कमंडलुं च सर्वेषां प्रायच्छच्छिरकारणात्। पुत्राय च ददौ कुंभमविलं
बनकारणात्। यावत्ते नोपगच्छंति तावदस्मै परां क्रियां। द्रोण आचष्ट पुत्राय तत्कर्म्म जिष्णुरौहत। ततः

सवारुणास्त्रेणपूरयित्वाकमंडलुंसममाचार्य्यपुत्रेणगुरुमभ्येतिफाल्गुनः।आचार्य्यपुत्रात्तस्मात्तु वि
शेषोपचयेपृथक्।नव्यहीयतमेधावीपार्थोप्यस्त्रविदांवरः।अर्जुनःपरमंयत्नमातिष्ठद्गुरुपूजने।अ
स्त्रेचपरमंयोगंप्रियोद्रोणस्यचाभवत्।तंदृष्ट्वानित्यमुद्युक्तमिष्वस्त्रंप्रतिफाल्गुनं।आहूयवचनंद्रोणो
रहःसूदमभाषत।अंधकारेर्जुनायान्नंनदेयंतेकदाचन।नचाख्येयमिदंचापिमद्वाक्यंविजयेत्वया।ततः
कदाचिद्भुंजानेप्रववौवायुरर्जुने।तेनतत्रप्रदीपःसदीप्यमानोविलोपितः।भुंक्तएवतुकौंतेयोनास्याद
न्यत्रवर्त्तते।हस्तस्तेजस्विनस्तस्यअनुग्रहणकारणात्।तदभ्यासकृतंमत्वारात्रावपिसपांडवः।योगं
चक्रेमहाबाहुर्धनुषापांडुनंदनः।तस्यज्यातलनिर्घोषंद्रोणःशुश्राववभारत।उपेत्यचैनमुत्थायपरिष्वज्ये
दमब्रवीत्॥ द्रोणउ ॥प्रयतिष्येतथाकर्त्तुंयथानान्योधनुर्द्धरः।त्वत्समोभवितालोकेसत्यमेत
द्ब्रवीमिते वैशं ततोद्रोणोर्जुनंभूयोहयेषुचगजेषुच।रथेषुभूमावपिचरणशिक्षामशिक्षयत्।
गदायुद्धेसिचर्य्यायांतोमरप्रासशक्तिषु।द्रोणःसंकीर्णयुद्धेचशिक्षयामासकौरवान्।तस्यतत्कौ
शलंश्रुत्वाधनुर्वेदजिघृक्षवः।राजानोराजपुत्राश्चसमाजग्मुःसहस्रशः।ततोनिषादराजस्यहिरण्य

आ०प० धनुषः सुतः। एकलव्यो महाराज द्रोणमभ्याजगाम ह। न स तं प्रतिजग्राह नैषादिरिति चिंतयन्॥ शिष्यं ध
२०६ नुषि धर्मज्ञस्तेषामेवान्ववेक्षया। स तु द्रोणस्य शिरसा पादौ गृह्य परंतपः। अरण्यमनुसंप्राप्य कृत्वा द्रोणं
महीमयं। तस्मिन्नाचार्यवृत्तिं च परमामास्थितस्तदा। इष्वस्त्रे योगमातस्थे परं नियममास्थितः। परया श्र
द्धयोपेतो योगेन परमेण च। विमोक्षादानसंधाने लघुत्वं परमापसः। अथ द्रोणाभ्यनुज्ञाताः कदाचित्कुरु
पांडवाः। रथैर्विनिर्ययुः सर्वे मृगयामरिमर्द्दनाः। तत्रोपकरणं गृह्य नरः कश्चिद्यदृच्छया। राजन्ननुजगामैः
कः श्वानमादाय पांडवान्। तेषां विचरतां तत्र तत्तत्कर्मचिकीर्षया। श्वा चरन्स वने मूढो नैषादिं प्रति जग्मि
वान्। स कृष्णमलदिग्धांगं कृष्णाजिनजटाधरं। नैषादिं श्वा समालक्ष्य भषंस्तस्थौ तदंतिके। तदा तस्याथ
भषतः शुनः सप्तशरान्मुखे। लाघवं दर्शयन्नस्त्रे मुमोच युगपद्यथा। स तु श्वा शरपूर्णास्यः पांडवानाज २०६
गाम ह। तं दृष्ट्वा पांडवा वीराः परं विस्मयमागताः। लाघवं शब्दवेधित्वं दृष्ट्वा तत्परमं तदा। प्रेक्ष्य तं व्रीडिताश्चा
सन्प्रशशंसुश्च सर्वशः। तं ततोन्वेषमाणास्ते वने वननिवासिनं। ददृशुः पांडवा राजन्नस्यंतमनिशं शरा
न्। न चैनमभ्यजानंस्ते तदा विकृतदर्शनं। तथैनं परिपप्रच्छुः को भवान्कस्य वे सुत   एकलव्य उवाच

निषादाधिपतेर्वीराद्धिरण्यधनुषः सुतं। द्रोणं शिष्यं च मां वित्त धनुर्वेदकृतश्रमं वैशं नैनमाज्ञा
यतत्वेन पुनरागम्य पांडवाः। यथावृत्तं वने सर्वं द्रोणायाचख्युरद्भुतं। कौंतेयस्त्वर्जुनो राजन्नेकलव्यमनु
स्मरन्। रहो द्रोणं समासाद्य प्रणयादिदमब्रवीत् अर्जुन उ तदाहं परिरभ्यैकः प्रीतिपूर्वमिदं वचः
भवतोक्तो न मे शिष्यस्त्वद्विशिष्टो भविष्यति। अथ कस्मान्मद्विशिष्टो लोकादपि च वीर्यवान्। अन्योस्ति भव
तः शिष्यो निषादाधिपतेः सुतः वैशं मुहूर्त्तमिव तं द्रोणश्चिंतयित्वा विनिश्चयं। सव्यसाचिनमा
दाय नैषादिं प्रतिजग्मिवान्। ददर्श मलदिग्धांगं जटिलं चीरवाससं। एकलव्यं धनुष्पाणिमस्यंतमनि
शं स तान्। एकलव्यस्तु तं दृष्ट्वा द्रोणमायांतमंतिकात्। अभिगम्योपसंगृह्य जगाम शिरसा महीं। पूजयि
त्वा ततो द्रोणं विधिवत्स निषादजः। निवेद्य शिष्यमात्मानं तस्थौ प्रांजलिरग्रतः। ततो द्रोणोब्रवीद्राजन्ने
कलव्यमिदं वचः। यदि शिष्योसि मे वीर वेतनं दीयतां मम। एकलव्यस्तु तच्छ्रुत्वा प्रीयमाणोब्रवीदिदं
एकलव्य उ किं प्रयच्छामि भगवन्नाज्ञापयतु मां गुरुः। न हि किंचिददेयं मे गुरवे ब्रह्मवित्तमः वै
शं तमब्रवीत्त्वयांगुष्ठो दक्षिणो दीयतामिति। एकलव्यस्तु तच्छ्रुत्वा वचो द्रोणस्य दारुणं। प्रतिज्ञामा

त्मनोरक्षन्सत्येचनियतःसदा।तथैवहृष्टवदनस्तथैवादीनमानसः।छित्वाविचार्य्यतंप्रादाद्द्रोणायां
गुष्ठमात्मनः।ततःशरंतुनैषादिरंगुलीभिर्व्यकर्षत।नतथावनशीघ्रोभूद्यथापूर्वंनराधिप।ततोर्जु
नःप्रीतमनावभूवविगतज्वरः।द्रोणश्चसत्यवागासीन्नान्योभिभवितार्जुनं।द्रोणस्यतुतदाशिष्यौ
गदायोग्यौवभूवतुः।दुर्य्योधनश्चभीमश्चसदासंरब्धमानसौ।अश्वत्थामारहस्येषुसर्वेष्वभ्यधिको
भवत्।तथातिपुरुषानन्यान्सारुकौयमजावुभौ।युधिष्ठिरोरथश्रेष्ठःसर्वत्रतुधनंजयः।प्रथितःसा
गरांतायांरथयूथपयूथपः।बुद्धियोगवलोत्साहैःसर्वास्त्रेषुचनिष्ठितः।अस्त्रेगुर्व्वनुरागेचविशि
ष्टोभवदर्ज्जुनः।तुल्येष्वस्त्रोपदेशेषुसौष्ठवेनचवीर्य्यवान्।एकःसर्व्वकुमाराणांवभूवातिरथोर्जुनः।प्रा
णाधिकंभीमसेनंकृतविद्यंधनंजयं।धार्त्तराष्ट्रादुरात्मानोनामृष्यन्तपरस्परं।तांस्तुसर्वान्समानीय
सर्व्वविद्यासुशिक्षितान्।द्रोणःप्रहरणज्ञानेजिज्ञासुःपुरुषर्षभः।कृत्रिमंभासमारोप्यवृक्षाग्रेशिल्पि
भिःकृतं।अविज्ञातंकुमाराणांलक्ष्यभूतमुपादिशत् द्रोणउ शीघ्रंभवन्तःसर्वेपिधनूंष्यादाय
सर्व्वशः।भासमेतंसमुद्दिश्यतिष्ठध्वंसंहिते षवः।मद्वाक्यसमकालंतुशिरोस्यविनिपात्यतां।एकैक

शोनियोद्धामितथाकुरुतपुत्रकाः॥ वैशं ॥ततोयुधिष्ठिरंपूर्वमुवाचांगिरसांवरः।संधत्स्ववाणं
दुर्द्धर्षमद्वाक्यांतेविमुंचतं।ततोयुधिष्ठिरःपूर्वंधनुर्गृह्यपरंतपः।तस्थौभासंसमुद्दिश्यगुरुवाक्यप्रचोदि
तः।ततोविततधन्वानंद्रोणस्तंकुरुनंदनं।समुहूर्त्तादुवाचेदंवचनंभरतर्षभ।पश्यैनंत्वंद्रुमाग्रस्थंभा
संनरवरात्मज।पश्यामीत्येवमाचार्यंप्रत्युवाचयुधिष्ठिरः।समुहूर्त्तादिवपुनर्द्रोणस्तंप्रत्यभाषत
द्रोणउ अथवृक्षमिमंमांवाभ्रातॄन्वापिप्रपश्यसि।तमुवाचसकौंतेयःपश्याम्येनंवनस्पतिं।भ
वंतंचतथाभ्रातॄन्भासंचेतिपुनःपुनः।तमुवाचापसर्प्पेतिद्रोणोऽप्रीतमनाइव।नैतच्छक्यंत्वया
वेद्धुंलक्ष्यमित्येवकुत्सयन्।ततोदुर्य्योधनादींस्तान्धार्त्तराष्ट्रान्महायशाः।तेनैवक्रमयोगेनजिज्ञा
सुःपर्यपृच्छत।अन्यांश्चशिष्यान्भीमादीन्राज्ञश्चैवान्यदेशजान्।तथाचसर्वेतत्सर्वंपश्यामइतिकुर
त्सिताः इत्यादिपर्वणिसंभवःसमाप्तः १२६ ततोधनंजयंद्रोणःस्मयमानोभ्यभाषत।
त्वयेदानींप्रहर्त्तव्यमेतल्लक्ष्यंविलोक्यतां।मद्वाक्यसमकालंतेमोक्तव्योत्रभवेच्छरः।विततस्वकार्मुकं
वतिष्ठतावन्मुहूर्त्तकं।एवमुक्तःसव्यसाचीमंडलीकृतकार्मुकः।तस्थौभाससमुद्दिश्यगुरुवाक्य

आ०प० श्चोदितः।मुहूर्त्तादिवतंद्रोणस्तथैवसमभाषत॥ततःप्रीतमनाद्रोणोमुहूर्त्तादिवतंपुनः।प्रत्यभाषत
२०८ दुर्द्धर्षःपांडवानांमहारथं।भासंपश्यसियद्येनंतथाब्रूहिपुनर्वचः।शिरःपश्यामिभासस्यनगात्रमि
तिसोब्रवीत।अर्ज्जुनेनैवमुक्तस्तुद्रोणोहृष्टतनूरुहः।मुंचस्वेत्यब्रवीत्पार्थंसमुमोचाविचारयन्॥ततस्त
स्यनगस्थस्यक्षुरेणनिशितेनच।शिरउत्कृत्यतरसापातयामासपांडवः।तस्मिकर्म्मणिसंसिद्धेपर्य
ष्वजत्पांडवं।मेनेचद्रुपदंसंख्येसानुबंधंपराजितं।कस्यचित्त्वथकालस्यसशिष्योंगिरसांवरः।ज
गामगंगामभितोमज्जितुंभरतर्षभ।अवगाढमथोद्रोणंसलिलेसलिलेचरः।ग्राहोजग्राहबलवा
जंघांतेकालचोदितः।ससमर्थोपिमोक्षायशिष्यान्सर्वानचोदयन्।ग्राहंहत्वातुमोक्षध्वंमामितित्वरय
न्निव।तद्वाक्यसमकालंतुबीभत्सुर्निशितैःशरैः।आचार्य्यैःपंचभिर्ग्राहमंभस्यनमताडयत्।इ २०८
तरेत्वथसंमूढास्तत्रतत्रप्रपेदिरे।तंतुदृष्ट्वाक्रियोपेतंद्रोणोमन्यतपांडवं।विशिष्टंसर्वशिष्येभ्यःप्रीति
मांश्चाभवत्तदा।सपार्थबाणैर्बहुधाखंडशःपरिकल्पितः।ग्राहःपंचत्वमापेदेजंघांमुक्त्वामहात्म
नः।अथाब्रवीन्महात्मानंभारद्वाजोमहारथं।गृहाणेदंमहाबाहोविशिष्टमतिदुर्द्धरं।अस्त्रंब्रह्मशि

ब्रह्मशिरोनामसप्रयोगंसनिवर्त्तनं॥ नचतेमानुषेष्वेतत्प्रयोक्तव्यंकथंचन॥जगद्विनिर्दहेदेतदल्पतेजसिपाति
तं॥असामान्यमिदंतातलोकेष्वस्त्रंनिगद्यते॥तद्धारयेथाःप्रयतःशृणुचेदंवचोमम॥बाधेतामानुषःश
त्रुर्यदित्वांवीरकश्चन॥तद्वधायप्रयुंजीथास्तदास्त्रमिदमाहवे॥तथेतिसप्रतिश्रुत्यबीभत्सुःसकृतांजः
लिः॥जग्राहपरमास्त्रंतदाहचैनंपुनर्गुरुः॥भवितात्वत्समोनान्यःपुमांल्लोकेधनुर्द्धरः इत्यादिदे
वेति १२७ वैशं कृतास्त्रान्धार्त्तराष्ट्रांश्चपांडुपुत्रांश्चभारत॥दृष्ट्वाद्रोणोऽब्रवीद्राजन्धृ
तराष्ट्रंजनेश्वरं॥कृपस्यसोमदत्तस्यबाल्हीकस्यचधीमतः॥गांगेयस्यचसान्निध्येव्यासस्यविदुरस्य
च॥राजन्संप्राप्तविद्यास्तेकुमाराःकुरुसत्तम॥तेदर्शयेयुःस्वांशिक्षांराजन्ननुमतेतव॥ततोऽब्रवीन्म
हाराजःप्रहृष्टेनांतरात्मना॥ धृतराष्ट्र ॥भारद्वाजमहत्कर्मकृतंतेद्विजसत्तम॥यदानुमन्य
सेकालंयस्मिन्देशेयथायथा॥तथातथाविधानायस्वयमाज्ञापयस्वमां॥स्पृहयाम्यद्यनिर्वेदात्पुरुषा
णामचक्षुषां॥अस्त्रहेतोःपराक्रांतान्येमेद्रक्ष्यंतिपुत्रकान्॥क्षत्तर्यद्गुरुराचार्योब्रवीतिकुरुतत्तथा॥न
हीदृशंप्रि — मन्येभविताधर्मवत्सल॥ततोराजानमामंत्र्यविदुरोनिर्गतोबहिः॥भारद्वाजोमहाप्राज्ञोमा

श्रा०प०
२०९

पयामासमेदिनीं।समामवृक्षांनिर्गुल्मामुदकप्रस्रवणान्वितां।तस्यांभूमौबलिंचक्रेतिथौनक्षत्रपूजि
ते।अवघुष्टेसमाजेचतदर्थंवदतांवर।रंगभूमौसुविपुलंशास्त्रदृष्टंयथाप्रतिप्रेक्षागारंसुविहितंचक्रु
स्तेतस्यशिल्पिनः।राज्ञःसर्वायुधोपेतंस्त्रीणांचैवनरर्षभः।मंचांश्चकारयामासुस्तत्रजानपदाजनाः।वि
पुलानुच्छ्रयोपेतांश्छिविकाश्चमहाधनाः।तस्मिंस्ततोऽहनिप्राप्तेराजाससचिवस्तदा।भीष्मंप्रमुखतः
कृत्वाकृपंचाचार्यसत्तमं।मुक्ताजालपरिक्षिप्तंवैडूर्यमणिशोभितं।शातकुंभमयंदिव्यंप्रेक्षागारमु
पागमत्।गांधारीचमहाभागाकुंतीचजयतांवर।स्त्रियश्चराज्ञःसर्वास्ताःसप्रेक्ष्याःसपरिछदाः।ह
र्षादारुरुहुर्मंचान्मेरुंदेवस्त्रियोयथा।ब्राह्मणक्षत्रियाद्यंचचातुर्वर्ण्यंपुराद्द्रुतं।दर्शनेप्सुसमभ्यगा
त्कुमाराणांकृतास्त्रतां।क्षणेनैकस्थतांतत्रदर्शनेप्सुर्जगामह।प्रवादितैश्चवादित्रैर्जनकौतूहले २०९
नच।महार्णवइवक्षुब्धःसमाजःसोऽभवत्तदा।ततःशुक्लांवरधरःशुक्लयज्ञोपवीतवान्।शुक्लकेशः
सितश्मश्रुःशुक्लमाल्यानुलेपनः।रंगमध्यंतदाचार्यःसपुत्रःप्रविवेशह।नभोजलधरैर्हीनंसांगा
रकइवांशुमान्।सयथासमयंचक्रेबलिंबलवतांवरः।ब्राह्मणांस्तुसुमंत्रज्ञान्कारयामासमंगलं।

सुखपुण्याहघोषस्यपुण्यस्यसमनंतरं।विविशुर्विविधंगृह्यशास्त्रोपकरणंनराः।ततोवद्धांगुलित्रा
णावद्धकक्षामहारथाः।वद्धतूणाःसधनुषोविविशुर्भरतर्षभाः।अनुज्येष्ठंतुतेतत्रयुधिष्ठिरपुरोग
माः।चक्रुरस्त्रंमहावीर्य्याःकुमाराःपरमाद्भुतं।केचिच्छराक्षेपभयाच्छिरांस्यवननामिरे।मनुजाधृष्टम
परेवीक्षांचक्रुःसुविस्मिताः।तेस्मलक्षाणिविविधुर्वाणैर्नामांकशोभितैः।विविधैर्लाघवोत्सृष्टैरुह्यं
तोवाजिभिर्द्रुतं।तत्कुमारवलंतत्रगृहीतशरकार्मुकं।गंधर्वनगराकारंप्रेक्ष्यतेविस्मिताभवन्।सहसा
चुक्रुशुश्चान्येनराःशतसहस्रशः।विस्मयोत्फुल्लनयनाःसाधुसाध्वितिभारत।कृत्वाधनुषितेमा
र्गांश्चेरुःसर्वासुभूमिषु।लाघवंसौष्ठवंशोभांस्थिरत्वंदृढमुष्टितां।ददृशुस्तत्रसर्वेषांप्रयोगंखड्गच
र्मणो।अथतौनित्यसंहृष्टौसुयोधनवृकोदरौ।अवतीर्णौगदाहस्तावेकशृंगाविवाचलौ।वद्धकक्षौम
हावाहूपौरुषेपर्य्यवस्थितौ।वृंहंतौवासिताहेतोःसमदाविवकुंजरौ।विदुरोधृतराष्ट्रायगांधार्य्याः
पांडवारणिः।न्यवेदयेतांतत्सर्वंपांडवानांविचेष्टितं इत्यादिपर्वणि १२८ वैशम् ॥
कुरुराजेहिरंगस्थेभीमेचवलिनांवरे।पक्षपातकृतस्नेहःसद्विधेवाभवज्जनः।हाभीमकुरुराजेति

आ०प० हाभीमइतिजल्पतां।पुरुषाणांसुविपुलाःप्रणादाःसहसोत्थिताः।ततःक्षुब्धार्णवनिभंरंगमा
२१० लोक्यबुद्धिमान्।भारद्वाजःप्रियंपुत्रमश्वत्थामानमब्रवीत्॥ द्रोणउ ॥वारयैतौमहावीर्यौकृ
तयोग्यावुभाव।माभूद्रंगेप्रकोपोयंभीमदुर्योधनोद्भवः वैशं ततस्तावुद्यतगदौगुरुपुत्रेण
वारितौ।युगांतानिलसंक्षुब्धौमहावेलाविवार्णवौ।ततोरंगांगणगतोद्रोणोवचनमब्रवीत्।निवार्य
वादित्रगणंमहामेघनिभस्वनं।योमेपुत्रात्प्रियतरःसर्वशस्त्रविशारदः।ऐंद्रिनिंद्रानुजसमसपा
र्थोदृश्यतामिति।आचार्यवचनेनाथकृतस्वस्त्ययनोयुवा।बद्धगोधांगुलित्राणःपूर्णतूणःसकार्मुकः।कां
चनंकवचंबिभ्रत्प्रत्यदृश्यतफाल्गुनः।सार्कःसेंद्रायुधतडित्ससंध्यइवतोयदः।ततःसर्वस्यरंगस्यसमुत्थि
जल्पकोभवत्।प्रवाद्यंतचवाद्यानिसशंखानिसमंततः।एषकुंतीसुतःश्रीमानेषमध्यमपांडवः।एषपुत्रो २१०
महेंद्रस्यकुरूणामेषरक्षिता।एषोस्त्रविदुषांश्रेष्ठएषधर्मभृतांवरः।एषशीलवतांचापिशीलज्ञाननिधिः
परः।इत्येवमतुलावाचःशुश्रुवुःप्रेक्षकेरिताः।कुंत्याःप्रस्नवसंयुक्तैरस्रैःक्लिन्नास्वरोभवत्।तेनशब्देनमह
तापूर्णश्रुतिरथाब्रवीत्।धृतराष्ट्रोनरःश्रेष्ठोविदुरंहृष्टमानसः।क्षत्तःक्षुब्धार्णवनिभःकिमेषसुमहास्वनः।

सहसैवोत्थितोरंगेभिंदन्निवनभस्तलं विदुरोवाच एषपार्थोमहाराजफाल्गुनःपांडुनंदनः।अवती
र्णःसकवचस्तत्रैवसुमहास्वनः धृतराष्ट्र उ धन्योस्म्यनुगृहीतोस्मिरक्षितोस्मिमहामते।एवमारणिस
मुद्भूतैस्त्रिभिःपांडववह्निभिः वैशं तस्मिन्प्रमुदितेरंगेकथंचित्प्रत्युपस्थिते।दर्शयामाससबीभत्सु
राचार्यायास्त्रलाघवं।आग्नेयेनासृजद्वह्निंवारुणेनासृजत्पयः।वायव्येनासृजद्वायुंपार्जन्येनासृजद्घना
न्।भौमेनप्राविशद्भूमिंपार्वतेनाभवद्गिरिः।अंतर्धानेनचास्त्रेणपुनरंतर्हितोभवत्।गव्येविषाणकोषेच
चलेरज्जुचलंविनि।निचखानमहावीर्यःसायकानेकविंशतिं।इत्येवमादिसुमहत्खड्गेधनुषिचानघ।
गदायांशस्त्रकुशलोमंडलानिप्रदर्शयन्।ततःसमाप्तभूयिष्ठेतस्मिन्कर्मणिभारत।मंदीभूतेसमाजेचवा
दित्रस्यचनिस्वने।द्वारदेशात्समुद्भूतोमाहात्मावलसूचकः।वज्रनिःपेषसदृशःसुश्रुवेभुजनिस्वनः।दी
र्यंतेकिंनुगिरयःकिंस्विद्भूमिर्विदीर्यते।किंस्विदापूर्यतेव्योमजलधाराघनैर्घनैः।रंगस्यैवंगतिरभूत्तद्दे
णनवसुधाधिप।द्वारंचाभिमुखाःसर्वेबभूवुःप्रेक्षकास्तदा।पंचभिर्भ्रातृभिःपार्थैर्द्रोणःपरिवृतोवभौ।पं
चतारेणसंयुक्तःसावित्रेणेवचंद्रमाः।अश्वत्थाम्नाचसहितंभ्रातृणांशतमूर्जितं।दुर्योधनममित्रघ्नमुत्थि

आ०प०
२११

तंपर्य्यवारयंस्तत्र।शतैस्तदाभ्रातृभिरुद्यतायुधैर्गदाग्रपाणिभिःसमवस्थितैर्वृतः।वभौस्तदादानवसंक्षयेपु
रापुरंदरोदेवगणैःसमावृतः   इत्यादिपर्वणि   १२९   वैशम्   दत्तेचकाशेपुरुषैर्विस्मयो
त्फुल्ललोचनः।विवेशरंगंविस्तीर्णंकर्णःपरपुरंजयः।सहजंकवचंविभ्रत्कुंडलोद्योतिताननः।सधनुर्बद्ध
निस्त्रिंशःपादचारीवपर्वतः।कन्यागर्भःपृथुयशाःपृथायाःपृथुलोचनः।तीक्ष्णांशोर्भास्करस्यांशःकर्णो
ऽरिगणसूदनः।सिंहर्षभगजेंद्राणांवलवीर्यपराक्रमः।दीप्तिकांतिद्युतिगुणैःसूर्येंदुज्वलनोपमः।प्रांशुः
कनकतालाभःसिंहसंहननोयुवा।असंख्येयगुणःश्रीमान्भास्करस्यात्मसंभवः।सनिरीक्ष्यमहावाहुःस
र्वतोरंगमंडलं।प्रणामंद्रोणकृपयोर्नात्यादृतमिवाकरोत्।ससमाजजनःसर्वोनिश्चलःस्थिरलोचनः।कोय
मित्यागतक्षोभःकौतूहलपरोभवत्।सोब्रवीन्मेघगंभीरस्वरेणवदतांवरः।भ्राताभ्रातरमज्ञातंसावित्रःपाक २११
शासनिं।पार्थयंतेकृतंकर्मविशेषवदहंततः।करिष्येपश्यतांनृणांपार्थमाविस्मयंगमः।असमाप्तेतत
स्तस्यवचनेवदतांवर।यंत्रोत्क्षिप्तइवोत्तस्थौक्षिप्तंवैसर्वतोजनः।प्रीतिश्चमनुजव्याघ्रंदुर्योधनमुपावि
शत्।ह्रीश्चक्रोधश्चवीभत्सुंक्षणेनान्वविवेशह।ततोद्रोणाभ्यनुज्ञातःकर्णःप्रियरणःसदा।यत्कृतंतत्रपा

र्थेनतच्चकारमहाबलः। अथदुर्य्योधनस्तत्रभ्रातृभिःसहभारत॥८। कर्णंपरिष्वज्यमुदाततोवचनमब्रवीत्
॥ दुर्य्योधनउ ॥ स्वागतंतेमहाबाहोदिष्ट्याप्राप्तोसिमानद। अहंचकुरुराज्यंचयथेष्टमुपभुज्यतां॥
कर्णउ कृतंसर्वमहंमन्येसखित्वंचत्वयाहृणे। द्वंद्वयुद्धंचपार्थेनकर्तुमिच्छाम्यहंप्रभो दुर्य्योधनउ
भुंक्ष्वभोगान्मयासार्द्धंबंधूनांप्रियकृद्भव। दुर्हृदांकुरुसर्वेषांमूर्द्धिपादमरिंदम वैशं ततःक्षिप्तमहा
त्मानंमत्वापार्थोभ्यभाषत। कर्णंभ्रातृसमूहस्यमध्येऽचलमिवस्थितं। अनाहूतोपसृष्टानामनाहूतोपजल्पि
नां। येलोकास्तान्हतःकर्णमयात्वंप्रतिपत्स्यसे कर्णउ रंगोयंसर्वसामान्यःकिमत्रतवफाल्गुन। वी
र्य्यश्रेष्ठाश्चराजानोबलंधर्मोनुवर्त्तते। किंक्षेपैर्दुर्बलायासैःशरैःकथयभारत। गुरोःसमक्षंयावत्तेहराम्यद्य
शिरःशरैः॥ वैशंम ॥ ततोद्रोणाभ्यनुज्ञातःपार्थःपरपुरंजयः। भ्रातृभिस्त्वरयाश्लिष्टोरणायोपजगा
मतं। ततोदुर्य्योधनेनापिसभ्रात्रासमरोद्यतः। परिष्वक्तःस्थितःकर्णःप्रगृह्यसशरंधनुः। ततःसविद्युत्स्तनितैः ध्रु२
सेंद्रायुधपुरोगमैः। आवृतंगगनंमेघैर्बलाकापंक्तिहासिभिः। ततःस्नेहाद्धरिहयंदृष्ट्वारंगावलोकिनं। भा
स्करोथनयंत्रासंसमीपोपगतान्घनान्। मेघच्छाययोपगूढस्तुततोदृश्यतफाल्गुनः। सूर्य्यातपपरिक्षिप्तःक

र्णौपितसमद्द्युती।धार्त्तराष्ट्रायतःकर्णस्तस्मिन्देशेव्यवस्थिताः।भारद्वाजःकृपोभीष्मोयतःपार्थस्त
तोभवन्।द्विधारंगःसमभवत्स्त्रीणांवैधमजायत।कुंतिभोजसुतामोहंविज्ञातार्थाजगामहातात
थामोहमापन्नांविदुरःसर्वधर्मवित्।कुंतीमाश्वासयामासप्रेष्याभिश्चंदनोदकैः।ततःप्रत्यागत
प्राणातावुभौपरिदंशितौ।पुत्रौदृष्ट्वासुसंभ्रांतानान्वपद्यतकिंचन।तावुद्यतमहाचापौकृपःशार
द्वतोब्रवीत्।द्वंद्वयुद्धसमाचारेकुशलःसर्वधर्मवित्।अयंपृथायास्तनयःकनीयान्पांडुनंदनः।
कौरवोभवतासार्द्धंद्वंद्वयुद्धंकरिष्यति।त्वमप्येवंमहाबाहोमातरंपितरंकुलं।कथयस्वनरेंद्राणां
येषांत्वंकुलभूषणः।ततोविदित्वापार्थस्त्वांप्रतियोत्स्यतिवानवा।वृथाकुलसमाचारैर्नयुध्यंतेनृ
पात्मजाः वैशं एवमुक्तस्यकर्णस्यव्रीडावनतमाननं।बभौवर्षांबुविक्लिन्नंपद्ममागलितंय २१२
था॥ दुर्योधन उ आचार्यत्रिविधायोनीराज्ञांशास्त्रविनिश्चये।सत्कुलीनश्चशूरश्चयश्चसेनां
प्रकर्षति।यद्ययंफाल्गुनोयुद्धेनाराज्ञायोद्धुमिच्छति।तस्मादेषोंगविषयेमयाराज्येभिषिच्यते
वैशं ततस्तस्मिन्क्षणेकर्णःसलाजकुसुमैर्घटैः।कांचनैःकांचनेपीठेमंत्रविद्भिर्महारथः।अभिषि

क्तोंगराज्येसश्रियायुक्तोमहाबलः।सछत्रबालव्यजनोजयशद्बोत्तरेणचाउवाचकौरवंराजावचनंस
वृषस्तदा।अस्यराज्यप्रदानस्यसदृशंकिंददामिते।प्रब्रूहिराजशार्दूलकर्ताह्यस्मितथानृप।अत्यंतंस
ख्यमिछामीत्याहतंससुयोधनः।एवमुक्तस्ततःकर्णस्तथेतिप्रत्युवाचतं।हर्षाच्चोभौसमाश्लिष्यपरं
मुदमवापतुः इत्यादिपर्वणि १२· वैशं ततःस्रस्तोत्तरपटःसप्रस्वेदःसवेपथुः।विवे
शाधिरथोरंगंयष्टिप्राणोह्वयन्निव।तमालोक्यधनुस्त्यक्त्वापितृगौरवयंत्रितः।कर्णोभिषेकार्द्रशि
राःशिरसासमवंदत।ततःपादावबछाद्यपटांतेनससंभ्रमः।पुत्रेतिपरिपूर्णार्थमब्रवीद्रथसारथिः
परिष्वज्यचतस्याथमूर्द्धानंस्नेहविक्लवः।अंगराज्याभिषेकार्द्रमश्रुभिःसिषिचेपुनः।तंदृष्ट्वासूतपु
त्रोयमितिसंचिंत्यपांडवः।भीमसेनस्तदावाक्यमब्रवीत्प्रहसन्निव।नत्वमर्हसिपार्थेनसूतपुत्रर
णेवधं।कुलस्यसदृशस्तूर्णंप्रतोदोगृह्यतांत्वया।अंगराज्यंचनार्हस्त्वमुपभोक्तुंनराधम।श्वाहु
ताशसमीपस्थंपुरोडाशमिवाध्वरे।एवमुक्तस्ततःकर्णःकिंचित्प्रस्फुरिताधरः।गगनस्थंविनिः
श्वस्यदिवाकरमुदैक्षत।ततोदुर्योधनःकोपादुत्पपातमहाबलः।भ्रातृपद्मवनात्तस्मान्मदोत्कटइव

आ०प०
२१२

ह्निपः।सोब्रवीद्भीमकर्म्माणंभीमसेनमवस्थितं।वृकोदरेणयुक्तंतेवचनंवक्तुमीदृशं।क्षत्रियाणांव
लंज्येष्ठंयोद्धव्यंक्षत्रबंधुना।शूराणांचनदीनांचदुर्विदाःप्रभवाःकिल।सलिलादुत्थितोवह्निर्येनव्या
प्तंचराचरं।दधीचस्यास्थितोवज्रंकृतंदानवसूदनं।आग्नेयःकृत्तिकापुत्रोरौद्रोगांगेयइत्यपि।श्रूय
तेभगवान्देवःसर्वगुह्यमयोगुहः।क्षत्रियेभ्यश्चयेजाताब्राह्मणास्तेचतेश्रुताः।विश्वामित्रप्रभृतयःप्रा
प्ताब्रह्मत्वमव्ययं।आचार्य्यःकलशाज्जातोद्रोणःशस्त्रभृतांवरः।गौतमस्यान्ववायेचशरस्तंबाद्गौ
तमः।भवतांचयथाजन्मतदप्यागमितंमया।सकुंडलंसकवचंसर्वलक्षणलक्षितं।कथमादित्यस
दृशंमृगीव्याघ्रंजनिष्यति।पृथिवीराज्यमर्होयंनांगराज्यंनरेश्वरः।अनेनबाहुवीर्य्येणमयाचाज्ञानुव
र्तिना।यस्यवामनुजस्येदंनेष्टंतंतच्छिचेष्टिती।रथमारुह्यपद्भ्यांसविनामयतुकार्मुकं।ततःसर्वस्यरंगस २१२
हाहाकारोमहानभूत्।साधुवादानुसंबद्धःसूर्य्यश्चास्तमुपागमत्।ततोदुर्य्योधनःकर्णमालंब्याग्रकरेण्
पः।दीपिकाग्निकृतालोकस्तस्माद्रंगाद्विनिर्ययौ।पांडवाश्चसहद्रोणाःसकृपाश्चविशांपते।भीष्मेणस
हिताःसर्वेययुःस्वंस्वंनिवेशनं।अर्जुनेतिजनःकश्चित्कश्चित्कर्णेतिभारत।कश्चिद्दुर्य्योधनेत्येवंब्रुवंतःप्र

स्थितास्तदाकुंत्याश्च प्रत्यभिज्ञाय दिव्यलक्षणसूचितं पुत्रमंगेश्वरं स्नेहाच्छन्नाप्रीतिरजायत दुर्यो
धनस्यापि तदा कर्णमासाद्य पार्थिव। भयमर्जुनसंजातं क्षिप्रमंतरधीयत॥ सचापि वीरः कृतशस्त्रनिः
श्रमः परेण साम्नाभ्यवदत्सुयोधनं। युधिष्ठिरस्याप्यभवत्तदा मतिर्न्न कर्णतुल्योस्ति धनुर्द्धरः क्षितौ ॥
इत्यादिपर्वणि १२१ वैशं ततः शिष्यान्समानीय आचार्यार्थमचोदयत्। द्रोणः सर्वानशेषे
ण दक्षिणार्थं महीपते। पांचालराजं द्रुपदं गृहीत्वा रणमूर्द्धनि। पर्य्यानयत भद्रं वः सा स्यात्परमदक्षिणा।
तथेत्युक्त्वा तु ते सर्वे रथैस्तूर्णं प्रहारिणः। आचार्यधनदानार्थं द्रोणेन सहिताययुः। ततोभिजग्मुः पांचा
लान्निघ्नंतस्ते नरर्षभाः। दुर्योधनश्च कर्णश्च जलसंधः सुलोचनः। एते चान्ये च बहवः कुमारा बहुविक्र
माः। अहं पूर्वमहं पूर्वमित्येवं क्षत्रियर्षभाः। ततो वररथारूढाः कुमाराः सादिभिः सह। प्रविश्य नगरं स
र्वे राजमार्गमुपाययुः। तस्मिन्काले तु पांचालः श्रुत्वा दृष्ट्वा महद्बलं। भ्रातृभिः सहितो राजन्त्वरया निर्ययौ
गृहात्। ततस्तु कृतसंनाहो यज्ञसेनो महीधरः। शरवर्षाणि मुंचंतः प्रणेदुः सर्व एव ते। ततो रथेन शुभ्रेण
समासाद्य तु कौरवान्। यज्ञसेनः शरान्घोरान्ववर्ष युधि दुर्जयः वैशं पूर्वमेव तु संमंत्र्य पार्थो द्रोण

मथाब्रवीत्दर्पादेकाकुमाराणामाचार्यद्विजसत्तम।एषांपराक्रमस्यांतेवयंकुर्योमसाहसं।एतैरशक्यः
पांचालोगृहीतुंरणमूर्द्धनि।एवमुक्त्वानुकौंतेयोभ्रातृभिःसहितोनघः।अर्धक्रोशेतुनगरादतिष्ठद्बहि
रेवसः।द्रुपदःकौरवान्दृष्ट्वाप्राधावतसमंततः।शरजालेनमहतामोहयन्कौरवींचमूं।तमुद्यतंरथे
नैकमाशुकारिणमाहवे।अनेकमिवसंत्रासान्मेनिरेतत्रकौरवाः।द्रुपदस्यशराघोराविचेरुःसर्वतोदि
शं।ततःशंखाश्चभेर्यश्चमृदंगाश्चसहस्रशः।प्रावाद्यंतमहाराजपांचालानांनिवेशने।सिंहनादश्च
संजज्ञेपांचालानांमहात्मनां।धनुर्ज्यातलशब्दश्चसंस्पृश्यगगनंमहान्।दुर्योधनोविकर्णश्चसुबाहुर्दी
र्घलोचनः।दुःशासनश्चसंक्रुद्धाःशरवर्षैरवाकिरन्।सोतिविद्धोमहेष्वासःपार्षतोयुधिदुर्जयः।अधम
न्नान्यनीकानितत्क्षणादेवभारत।दुर्योधनंविकर्णंचकर्णंचापिमहाबलं।नानारूपसुतान्वीरान्सेनामा २२४
निविविधानिच।अलातचक्रवत्सर्वंचरन्बाणैरवाकिरत्।ततस्तुनागराःसर्वेमुशलैर्यष्टिभिस्तथा।अ
भ्यवर्षतकौरव्यान्वर्षमाणाघनाइव।सबालवृद्धास्तेपौराःकौरवानभ्ययुस्तदा।श्रुत्वातुतुमुलंयुद्धंकौ
रवानेवभारत।द्रवंतिस्मनदंतिस्मक्रोशंतःपांडवान्प्रति।पांडवास्तुस्वनंश्रुत्वाआर्तानांलोमहर्षणं।अ

भिवाद्यततोद्रोणं रथानारुरुहुस्तदा।युधिष्ठिरंनिवार्य्याशुमायुध्यस्वेतिपांडवं।माद्रेयौचक्ररक्षौतु
फाल्गुनस्यतदाकरोत्।सेनाग्रगोभीमसेनः सदाभूद्गदयासह।तदाशत्रुस्वनंश्रुत्वाभ्रातृभिः सहितो
नघ॥३॥आयाज्जवेनकौंतेयोरथेनानादयन्दिशः।पांचालानांततः सेनामुद्धूतार्णवनिस्वनां।भीमसेनो
महाबाहुर्दंडपाणिरिवांतकः।प्रविवेशमहासेनांमकरस्सागरंयथा।स्वयमभ्यद्रवद्भीमोनागानीकं
गदाधरः।सयुद्धकुशलः पार्थोबाहुवीर्येणचातुलः।अहनत्कुंजरानीकंगदयाकालरूपधृक्।तेगजा
गिरिसंकाशाः क्षरंतोरुधिरंबहु।भीमसेनस्यगदयाभिन्नमस्तकपिंडकाः।पतंतिस्थिरदाभूमौवज्रप
ताद्दिवाचलाः।गजानश्वान्नृयांश्चैवपातयामासपांडवः।पादातांश्चरथांश्चैवन्यवधीदर्जुनाग्रजः।गो
पालइवदंडेनयथापशुगणान्वने।चालयन्रथनागांश्चसंचचालवृकोदरः॥ वैशं ॥भारद्वाजोपि
यंकर्तुमुद्यतः फाल्गुनस्तदा।पार्षतंशरजालेनक्षिपन्नागान्सपांडवः।हयौघांश्चरथौघांश्चगजौघांश्च
समंततः।पातयन्समरेराजन्युगांताग्निरिवज्वलन्।ततस्तेहन्यमानावैपांचालाः संजयास्तथा।शरैर्नां
नाविधैस्तूर्णंपार्थंसंछाद्यसर्वशः।सिंहनादंमुखैः कृत्वासमयुध्यंतपांडवं।तद्युद्धमभवद्घोरंसुमहद्गु

आ०प०
२२५

तद्दर्शनं। सिंहनादस्वनं कृत्वा नाशृण्वत्याकर्णसंनिभः। ततः किरीटी सहसा पांचालान्समरेऽद्रवत्। छाद
यन्निषुजालेन महता मोहयन्निव ता। शीघ्रमभ्यस्यतो बाणान्संदधानस्य चानिशं। नांतरं ददृशे कश्चित्
कौंतेयस्य यशस्विनः। सिंहनादश्च संजज्ञे साधुशब्देन मिश्रितः। ततः पांचालराजस्तु ततः सत्यजिता
सहात्वरमाणोभिदुद्राव महेंद्रं शंवरो यथा। महता शरवर्षेण पार्थः पांचालमावृणोत्। ततो हलह
लाशब्दः आसीत्पांचालके बले। जिघृक्षतिमथा सिंहो गजानामिव यूथपं। दृष्ट्वा पार्थं तदायांतं सत्य
जित्सत्यविक्रमः। पांचालं वै परिप्रेप्सुर्धनंजयमदुद्रवत्। ततस्त्वर्जुनपांचालौ युद्धाय समुपागतौ
व्यक्षोभयेतां तत्सैन्यमिंद्रवैरोचनाविव। ततः सत्यजितं पार्थो दशभिर्मर्मभेदिभिः। विव्याध बलवद्गा
ढं तदद्भुतमिवाभवत्। ततः शरशतैः पार्थं पांचालः शीघ्रमर्दयत्। पार्थस्तु शरवर्षेण छाद्यमानो २२५
महारथः। वेगं चक्रे महावेगो धनुर्ज्यामवमृज्य च। ततः सत्यजितश्चापं छित्वा राजानमभ्ययात्।
अथान्यद्धनुरादाय सत्यजिद्वेगवत्तरं। साश्वं ससूतं सरथं पार्थं विव्याध सत्वरः। स तं न ममृषे पा
र्थः पांचालेनार्दितो युधि। ततस्तस्य विनाशार्थं सत्वरं व्यसृजच्छरान्। हयान्ध्वजं धनुर्मुष्टिमुभौ तौ

पार्ष्णिसारथिः।सतथाभिद्यमानेषुकार्मुकेषुपुनःपुनः।हयेषुविनियुक्तेषुविमुखोभवदाहवे।स
सत्पूजितमालोक्यतथाविमुखमाहवे।वेगेनमहताराजन्नभ्यवर्षतपार्षतं।तदाचक्रेमहद्युद्धम
र्जुनोजयतांवरः।तस्यपार्थोधनुःछित्वाधनुश्चोर्वीमपातयत्।पंचभिस्तस्यविव्याधहयान्सूतंच
सायकैः।ततउत्सृज्यतच्चापमाददानस्तुपार्षतं।खड्गमुद्यत्यकौंतेयःसिंहनादमथाकरोत्।पांचा
लस्यरथस्येषामाप्लुत्यसहसाबदेत्।पांचालरथमास्थायअविगस्तोधनंजयः।विक्षोभ्यांभोनिधिं
आदी६ पार्थस्तंनागमिवसागृह्णीतो।ततस्तुसर्वपांचालाविद्रवंतिदिशोदश।दर्शयन्सर्वसैन्यानांसवा
कोर्बलमास्थितः।सिंहनादस्वनंकृत्वानिर्जगामधनंजयः।आयातमर्जुनंदृष्ट्वाकुमारास्सहिता
स्तदा।ममृदुस्तस्यनगरंद्रुपदस्यमहात्मनः॥ अर्जुनउ ॥संबंधीकुरुवीराणांद्रुपदोराजसत्तम
नः।मावधीस्तद्बलंभीमगुरुदानंप्रदीयतां॥ वैशं भीमसेनस्तदाराजन्नर्जुनेननिवारितः।अ
तृप्तोयुद्धधर्मेषुन्यवर्त्ततमहाबलः।ममृदुस्तस्यनगरंद्रुपदस्यमहौजसः।तेयज्ञसेनंद्रुपदंगृही
त्वारणमूर्द्धनि।उपाजह्रुःसहामात्यंद्रोणायभरतर्षभ।भग्नदर्पंहृतधनंतंतथावशमागतं।सवैरं

आ०प० मनसाध्यात्वाद्रोणोद्रुपदमब्रवीत्।विमृद्यतरसाराष्ट्रंपुरंतेमृदितंमया।प्राप्यजीवंरिपुवशंसखिपूर्वं
२१६ किमिष्यते।एवमुक्त्वाप्रहस्यैनंकिंचित्सपुनरब्रवीत्।माभैःप्राणभयाद्वीरक्षमिणोब्राह्मणावयं।आ
श्रमेक्रीडितंयत्तुत्वयाबाल्येमयासह।तेनसंवर्द्धितःस्नेहःप्रीतिश्चक्षत्रियर्षभ।प्रार्थयेयंत्वयासख्यं
पुनरेवजनाधिप।वरंददामितेराजन्राज्यस्यार्द्धमवाप्नुहि।अराजाकिलनोराज्ञःसखाभवितुमर्हति।
अतःप्रयतितंराज्येयज्ञसेनमयातव।राजासिदक्षिणेकूलेभागीरथ्याहमुत्तरे।सखायंमांविजानी
हिपांचालयदिमन्यसे द्रुपद उ अनाश्चर्यमिदंब्रह्मन्विक्रांतेषुमहात्मसु।प्रीयेत्वयाहंत्वत्त
श्चप्रीतिमिच्छामिशाश्वतीं वैशं एवमुक्तःसतंद्रोणोमोक्षयामासभारत।सत्कृत्यचैनंप्रीतात्मा ता
राज्यार्द्धंप्रत्यपादयत्।माकंदीमथगंगायास्तीरेजनपदायुतां।सोध्यावसद्दीनमनाःकांपिल्यंचपुरो २१६
त्तमं।दक्षिणांश्चापिपांचालान्यावच्चर्मण्वतीनदी।द्रोणेनचैवंद्रुपदःपरिभूयाथपालितः।क्षात्रेण
चबलेनास्यनापश्यत्सपराजयं।पुत्रजन्मपरीप्सन्वैपृथिवीमनुसंचरन्।अहिच्छत्रंचविषयंद्रोणः
समभिपद्यत।एवंराजन्नहिच्छत्रापुरीजनपदायुता।युधिनिर्जितपार्थेनद्रोणायप्रतिपादिता ॥